No. ४८४५

Title रामपूजापद्धतिः

Author रामोपाध्यायः

Extent ९४ पत्राणि Age ×

Subject धर्मशास्त्रम्

रामपूजापद्धतिः

५७५८

५७५८

F = १५

पद्धति व. १९

अंक ४७४८

रा॰
सू॰प॰
१

ॐस्वस्तिश्रीगणेशायनमः ॐश्रीरामचरणांभोजभ्रमरायितमानसः रामोरामार्चमेवक्तिनौमिरामपदांबुजे १ सर्वतंत्रानुसा
रेणसंप्रदायानुसारतः करोतिरामानन्दवरः श्रीरामार्चनपद्धतिं २ द्वैतंद्वैराज्यभीतानामिच्छतांनिर्भयंपदं पद्धतिंदर्शयाम्येः
नागमामागमकानुने ३ अथनित्यपूजासाद्विधा अनिर्माल्यासनिर्माल्याचेति अनिर्माल्यामानसपूजा सनिर्माल्याचा
ह्यपूजा तदुक्तंतत्वसारसंहितायां अनिर्माल्यंसनिर्माल्यमर्चनंद्विविधंमतं द्विधैर्मनोभवैर्द्रव्यैर्गंधपुष्पैः स्रगादिभिः
यदर्चनमनिर्माल्यंदिव्यभोगापवर्गदं ग्राम्यारण्यादिसंभूतैर्योगद्रव्यैर्मनोरमैः भक्त्यैवक्रियतेसम्यक्सनिर्माल्यंत
दर्चनं जातमात्राणिपुष्पाणिग्राह्यतान्येवनिसर्गतः पंचभिश्चमहाभूतैर्भोग्यनाशाश्रिनानया प्राणिभिश्चद्विरेफाद्यैः
पौष्पैरेवनसंशयः अतोनिर्माल्यमित्युक्तं अत्रचापिपतीनामधिकारः उक्तंचागस्त्येन द्विविधस्यार्चनस्यमनोवांछ्यांतर
मुपासते न्यासिनोंऽन्यांतरंप्रोक्तमिति यत्त मनसापूजयेद्योगीपुष्पैर्वारण्यसंभवैः शिवार्थंपुष्पहिंसायांनभवेत्सतुहिं
सकः इतिशिवरहस्यवचनेनदजितेंद्रियपतिविषयं वस्तुतस्तुपरिव्राट्स्नानमात्रेणहोमदानादिभिर्विना सर्वदुःख
पिशाचेभ्योमुक्तोभवतिनान्यथा परिव्राडविरक्तश्चविरक्तश्चयथागृही कुंभीपाकेनमज्जेतेतावुभौकमलानने
पुण्यास्त्रियोगृहस्थाश्चयतयःकुर्युरन्वहं संसारान्नोनिवर्तंतेविश्यातिक्रमदोषतः आरूढपतिताश्चैतेभवेयुर्दुःखभा
जनमितिकुंभसंभववचनादेवयतीनामजितेंद्रियत्वदोषायैवानत्वेषांमानसपूजनमेवविहितमिति यद्वा सर्वेषामे १

वाधिकारः तदुक्तं पद्मपुराणे स्मरणे कीर्तने विलोकने ध्याने मानसपूजने सदाधिकारः सर्वेषां महापातकिनामपीति वाह्यपू
जने तु गृहस्थानामधिकारः तदुक्तं कूर्मसंभवेन अमीषामर्पयेतयेति उभयमाभ्यन्तरं वाह्यं च अत्राभ्यन्तरपूजने वाह्यार्च
नस्यांगतेनोक्तं केवलमानसार्चनस्य निषेधात् तदुक्तं स्वयमेव न गृही ज्ञानमात्रेण परं देहत्वमंगले प्राप्नोति वेदवदने दान
होमादिभिर्विना गृहस्थोपि न दानादि दद्याज्जपेज्जुहुयादपि पूजयेद्धि पिनाकी नैव कुर्यादेतदत्वहं नत्वस्य वारिणो दान
मधिकारोस्ति भामिनी गुरुभ्योपि च सर्वेभ्यः कोवा दद्याद्येदितमिति अत्र ज्ञातव्यात्फले सिद्धोदल्पेनो मानसाय
या तस्मादपरिहार्यतादस्याधानानुपायतः अल्पबुद्धित्वतोन्तर्गो वाह्यपूजैव भवेत्क्रियेति एतत्तत्सारसंहितावचनं
तदेगम्भतस्याभ्यन्तरयजनस्यात्यन्तमावश्यकत्वे गृहस्थानामपपादयतीति तस्माद्गृहस्थानां वाह्यपूजैव नित्या
सा च पंचविधा तदुक्तं मंत्रतंत्रप्रकाशे पूजा पंचविधा प्रोक्ता पंचरात्रादितंत्रके ताश्चाभिगमनोपादानेज्याः स्वाध्याय
योगकाः तत्राभिगमनं नाम मनस्त्रिभिः परिकीर्त्यते संमार्जनीपलेपादिसंस्कारो देवमंदिरे उपादाने भवेद्देवपूजासाध
नमेलने तत्राप्यभिवेद्ध्यागोपपुष्पादिभिः पुनः पीठपूजा च देवस्य सांगावरणपूजने मंत्रार्थभावनापूर्वं ज
पो मंत्रस्य कीर्तने तत्वाख्याध्ययने सम्यक् स्वाध्यायो मंत्रिभिः स्मृतः गुरुदेवात्मनामैक्यभावना योग उच्यते
सालोक्यमपि सारूप्यं सामीप्यं सार्ष्टिनामकं सायुज्यमपि चैवातो फलानि वै विडः क्रमात् तत्रादौ विज्ञानिरूप

रा॰
पू॰प॰
२

णेन सर्वासां निरूपणे स्यादिमतः प्रधानभूतेज्या निरूप्यते तत्र श्रीनारदपंचरात्रे निशावसाने शयनात्स्मृत्वा नारायणं प्रभुं उ
घाप दाक्षिणेनैव वामपादेन संस्पृशेद्भुवि निशावसाने ग्रहं प्रहरात्मके तदुक्तं विष्णुना रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयक
स ब्राह्म इति विज्ञेयो विहितः संप्रबोधने व्यासोपि ब्राह्मे मुहूर्ते पुरुषस्त्यक्तनिद्रो हरिं स्मरेत् आलोक्य मंगलद्रव्यं क
र्मावश्यकमाचरेत् आवश्यकमत्र मूत्रपुरीषोत्सर्गः रामार्चनचंद्रिकायां ब्राह्मे मुहूर्ते चोत्थाय चिंतयेद्रघुनंदनं
राम रामेति रामेति तारकाख्यं परं शुभं श्रीपूर्वं जयमध्यस्थं द्विजयांते विचक्षणः रामचिंतनश्लोकाः प्रयोगे वक्ष्यंते मूत्रपु
रीषोत्सर्गविधिस्तत्रैव संध्यासूदङ्मुखोऽह्न्यपि निशि पुनर्दक्षिणास्यो निवीती कुर्यात् मूत्रादि शौचं च बहिरुद्धृतसलिलात्तत्र
लिंगे मृदेका पंचापाने कहस्ते दश पुनरुभयोः सप्त चैतद्गृहस्थे द्विगुणादिक्रमात् तद्व्रतिवनियतिषु स्यात् तदर्धं निशायां कृते
स्यपादशौचे विमलमथ जलैस्त्रिः पिबेदुन्मृजेद्विर्देशिन्यंगुष्ठकाभ्यां स जलमभिमृशेन्नासिकारंध्रयुग्मं ॥ अंगुष्ठानामि
काभ्यां नयनयुगयुतं कर्णयुग्मं कनिष्ठांगुष्ठाभ्यां नाभिदेशं हृदयमथ तलेनांगुलीभिः शिरोंऽसं दंतोल्लेखो वितस्त्या भव
ति परिमितादन्नमित्यादिमंत्रात्ततः क्षीर्यादिकाष्ठात् वटखदिरपलाशैर्विनाम्रार्कबिल्वैः भुक्त्वा गंडूषषट्कान्नहि रपि
कुशमृते देशिनीमंगुलीभिर्न नद्यां भूताष्टपर्वण्यपि न खलु नवम्यर्कसंक्रांतिपाते अन्नाद्याय व्यूहध्वं सोमो राजायमागम
त् स मे मुखं प्रमार्क्ष्यते यशसा च भगेन चेति दंतकाष्ठमंत्रः ततो गुरुं स्वेष्टदेवतां च स्मरेत् तदुक्तं सारसंग्रहे रात्रिवासः परित्य २

2

म्रवासमीपरियायव आवश्यशुद्धदेहः सन्देवतायाश्च मंदिरं मार्जयित्वोपलिप्याथ भक्तियुक्तः स्वशक्तितः उपविश्य शुचौ देशे
प्राङ्मुखः प्रोक्तआसने प्राणायामत्रयं कृत्वा कृत्वान्यासं विधानतः न्यासं करन्यासादिकं षडंगन्यासं निर्माल्यमपहृत्याथ दद्या
त्पुष्पांजलिं तथा अर्घ्यं पाद्यं निवेद्याथ दद्यादेवं तथाचनं मुखप्रक्षालनं दद्यात्पादाचमनीयकं करास्पर्शं कृत्वायायद्दद्याद्दासो
ऽमलं शुभं प्रातः कृत्वायायदेवेशि संस्मरेत्पद्मजले कर्पूराभं स्मरेत्तत्र श्रीगुरुं निजरूपिणं सुप्रसन्नं लसद्भूषामंडितं शोणितभू
षितम् उक्तमागमांतरेपि शिरःपद्मे शिरसि शुक्लेऽब्जे द्विनेत्रं द्विभुजं गुरुं वरदाभयहस्तं तं स्मरेत्तन्नामपूर्वकमिति सारसं
ग्रहे अर्चयेद्गंधपुष्पाद्यैर्वहिर्हैर्मानसैस्तथा नाममिश्रस्वमंत्रेण संसिद्धे गुरुकीर्तितः तदज्ञाने गुरुभ्योथ नमोंतैर्वा समर्च
येत् स्तुवीत स्तुतिभिः प्रीतआचार्यं सर्वसिद्धये स्तुतिः प्रयोगवत्संते सारसंग्रहे इति स्तुत्वा हृदि स्वीये ध्यायेदिष्टां च देव
तां गुरुदेवतयोरैक्यं भावयेच्च निराकुलः इष्टार्थं प्रार्थनां कृत्वा स्वात्मानं संप्रार्थयेत्ततः इष्टदेवस्य मंत्रेण तत्सोम्यासानुसारतः वि
न्यस्य पादमन्यासकुर्याद्वावस्वकीं क्रियां दक्षिणस्यासे दक्षिणपादन्यासो वामे वामपादन्यासः आवश्यकीस्नानादिरूपां प्रार्थ
नश्लोकाः प्रयोगवत्संते अथ स्नानम् तच्चत्रिविधं औदकमांत्रध्यानभेदात् तत्रौदकं स्नानं नारदपंचरात्रे अथाधिकार
सिध्यर्थं स्नानं वक्ष्यामि सर्वतः येन भक्तोऽभिषिक्तस्तु यागहोमार्हतां व्रजेत् शंकुनाऽस्त्राभिजप्तेन शुचिस्थानाच्च मृत्तिकां
गृहीतास्त्रेण संवीतः प्राप्याजलनिकेतनं तत्रादौ जलकूलं तत्क्षालयेदस्त्रवारिणा मृद्दं कृत्वा द्विधा तत्र एकभागोपगं ततः नि

पायगोमयंदर्भांस्तिलांश्चैवाभिमंत्रितान् लौकिकंगोणमायेनभागेनैकेनयत्नतः मलस्नानंपुराकृत्वाविधिस्नानंसमाचरेत् अ
रा॰ भिमंत्रितानस्त्रेण विधिस्नानंवैदिकंस्नानं तदुक्तंवसिष्ठसंहितायां कृत्वादौवैदिकस्नानंततस्तांत्रिकमाचरेत् विम्बसांगुष्ठ
सू॰ प॰ डंगानिशाणयामपुरःसरं श्रीसूर्यमंडलात्तीर्थमाकृष्यांकुशमुद्रया रश्मिमंनेनवात्मामुकवचेनावगुंठयेत् संरक्षास्त्रे
३ णमूलेनमंत्रयेद्बुद्धसंख्यया आत्मरक्षांततःकुर्यात्त्रीविधियेणवास्त्रतः निमज्यतत्रश्रीदेवंध्यायेद्रुत्नामनेजपेत् उन्म
ज्यकुंभमुद्रांचबध्वासिंचेत्स्वमूर्द्धनितीर्थावाहनमंत्राः प्रयोगेवक्ष्यंते मंत्रोक्ततीर्थेषुतीर्थावाहननिषेधनिषेधउक्तोनारदपं
चरात्रे गंगेचेत्यादिमंत्रेणतीर्थावाहमाचरेत् तीर्थांतरेष्विमंमंत्रंनैवसंकीर्तयेत्सुधी प्रसिद्धेषुचतीर्थेषुयद्यन्नस्याभियोस्म
3 रेत् स्नातकःसत्ततीर्थमभिशाप्यत्नाणंव्रजेत् निर्झरादितडागादौसामान्यस्नानकर्मणि गंगाद्यातांनदीनांचतीर्था
नांचप्रकीर्तने मात्रेस्नानक्रमेसम्यक्तीर्थनामानिकीर्तयेदिति गंगादौमूलमंत्रेणगंगाद्यावाहनंकर्तव्यमितिशिष्ट
संप्रदायतः अतएवयोनेनविधिनास्नायाद्यत्रकुत्रजलेद्विजः सतीर्थफलमाप्नोतितीर्थेदशगुणंफलमितिवन्हिपुरा
णवचनमपिसंगच्छते सिंचेत्स्वमथात्रियावा समकृत्वोऽभिषिच्याथमन्त्रनामेत्रितैर्जलैरितिकपिलपंचरात्रवचनात्
त्रियाऽभिषिच्यमूलेनेतिसारसंग्रहवचनाच्च तथा ततः संदेपतौदेवान्मनुष्यांस्तर्पयेत्पितॄन् स्नानेविशेषस्त्रिपु
राऽर्चने विधायवैदिकंस्नानंततस्तांत्रिकमाचरेत् मृदमस्त्रेणवादायतेनतामभिमंत्र्यच शिखामंत्रेणसंशोध्यमे ३

त्रयेन्मूलमंत्रतः मूर्द्धादिपादपर्यंतं विलिप्य वतयावपुः संमुखीकरणीमुद्रां बद्ध्वा प्राणान्निरुध्य च निमज्य तत्सीमूलायनाभिमात्रे
जले स्थितः प्राणायामत्रयं कृत्वा मूलमंत्रेण मंत्रवित् विन्यस्य षडंगानि कल्पयेत्तीर्थमग्रतः ततः संप्रार्थयेत्तीर्थं सूर्यात्तन्मंड
लेततः सृणिमंत्रेण मंत्रतोभिन्नावांकुशमुद्रया तीर्थावाहनमंत्रेण तीर्थमावाहयेत्प्रिये मूलमंत्रेण संयोज्य कल्पिते तीर्थमंडले
तीर्थशक्तिं च तत्रैव समावाह्यार्कमंडलात् ध्यात्वा तन्मनुनाभ्यर्च्य गंगामंत्रेण मंत्रयेत् सप्तकृतः शिवे वह्निसृणिमंत्रद्वयं प्रिये
जलस्यं व्योमषट्दीर्घस्वरभिन्नं सबिंदुकं सर्वानंदमये तीर्थशक्तिं चेहि प्रुगेहि ठठः जलं वकारः व्योम हकारः तेन ह्व एत
त्षड्दीर्घस्वरभिन्नं तेन ह्वां ह्वीं ह्वूं ह्वैं ह्वौं ह्वः इति ठठः स्वाहाकारः तथा एकविंशाक्षरः प्रोक्तस्तीर्थशक्तिमनुः प्रिये तारं
नमो भगवति ह्रूयादेवेतंतोंबिके श्रवालिके महाकालि मेध्याहि भगवत्यथा अशेषतीर्थालवाले मायाश्रीबीजयोरथ
शिवजटाधिरूढे च गंगे गंगांबिके ठठः गंगाविधेयमाख्याता विपंचाशाङ्किवर्णैः तारः प्रणवः मायाह्रीं ठठः स्वाहा
कारः स्मृतवक्त्रये तथा भुवनेशप्रममालोकामृतीकृत्य सुधांशुणा कवचेनावगुंठ्याथ संरक्ष्यास्त्रेण मंत्रयेत् मूले
मूलेन देवतां तत्र संगोगोक्षाक्षरणात्प्रिये समावाह्य जले ध्यात्वा तन्माद हृदय निर्गते ध्यात्वा तीर्थे स्मरन्मूलमंत्रं स्नायाज्जले
त्रिशः उन्मज्य मूलमंत्रेण सिंचेत्कं कुंभमुद्रया कं मूर्ध्नि श्रावमार्ष्यविधिना पश्चान्मूलमंत्रेण तर्पयेत् त्रिधा देवं स
मस्तीर्थजलाद्वैते शुभांबरे परिधायाथ तिलकं कृत्वा संध्यां समाचरेत् तीर्थशक्तिं ध्यानप्रयोगे वच्छने तथैवं वारुण

रा०
पू०प०
४

स्नानाशक्तानामेव स्नानविधिः तत्र नारदपंचरात्रे प्रथमोत्रेशुभेस्मृतः तोयाभावेन्यपक्षार्थ्ये दुर्गेकालेच शीतले गम
नेदिग्प्रसिद्ध्यर्थंगुरुकार्येष्वतंद्रितः आग्नेयमथविप्रेंद्र निशाभागेतथामुने प्रक्षाल्यपादावाचम्यशोद्धृतेनतुवारिणा
स्नानेदशादिशः प्राग्वत्संशोध्योपविशेततः अस्त्रेहस्ततलेन्यस्यक्रमान्मासोस्तनतस्तवैमूलमंत्रादितः कुर्यात्सर्वमेव
गणेनवै केवलादुदकस्नानात्संस्कारपरिवर्जितात् प्रभासादिषुतीर्थेषु यत्फलंस्नातकस्यतु शेषंदशगुणंतस्मान्मं
त्रस्नानस्यनारद ध्यानस्नानमथोवक्ष्ये द्वाभ्यामपिपरंवयत् त्वासितंपुंडरीकाक्षंमेघमूर्त्तिंप्रभंस्मरेत् अनेकादि
त्यसंकाशेवासुदेवेचतुर्भुजे शंखचक्रगदापद्मसर्वाभरणभूषिते श्यामलेशान्तवदने प्रसन्नेविश्वरूपिणि दिव्यचंद
नलिप्तांगेवाहुद्वामसमुत्तुंगे अनेकरत्नसंबद्धहारालन्मकरकुंडले वनमालापरिवृते नारदादिभिरर्चिते केयूर
वलयोपेते सुवर्णमुकुटोज्वले ध्वजवज्रांकुशालब्धपादपद्मोपशोभिते तत्पादोदकजांधारांनिपतंतींस्वमूर्द्धनि विं
तयेद्ब्रह्मरंध्रेण प्रविशंतींस्वकांतनुं तयासंक्षालयेत्सर्वमंतर्देहगतंमलं तत्क्षणाद्विरजोमंत्रीजायतेस्फटिकोपमः इदं
स्नानवरंमोक्षात्स्नानात्कृतगुणंस्मृतं तस्मादेकतमंकार्यंस्नानेश्रद्धापरेणतु स्नानंसर्वाःक्रियाःसर्वायतः सम्यक्स्तुनारद
तस्मात्स्नानेतुराजर्ष्येयायदीक्षेसंक्षेपतस्त्वात्मनः शैवागमे मनसामूलमंत्रेणप्राणायामपुरःसरं कुर्वीतमानसेस्नानेसर्व
त्रविहितंचतत् गमार्थंनेत्रदिकायामाचमनमक्रमम् केशवाद्यैस्त्रिभिःपीत्वाद्वाभ्यांप्रक्षालयेत्करौद्वाभ्यामोष्ठौचसंमृज्यद्वा ६

भामृन्मार्जनेनतथा एकेनहस्तेनप्रक्षाल्यपादावर्पितथैकतः संप्रोक्ष्यैकेनमूर्द्धानंततः संकर्षणादिभिः आस्यनासादिकर्णौ
अनाभ्युरःकंधजौस्पृशेत् एवमाचमनंकृत्वासाक्षान्नारायणोभवेत् केशवनारायण माधव गोविंद विष्णु मधुसूदन
त्रिविक्रम वामनश्रीधर हृषीकेश पद्मनाभ दामोदर संकर्षण वासुदेव प्रद्युम्न अनिरुद्ध पुरुषोत्तम अधो
क्षज नृसिंह अच्युत जनार्दन उपेंद्र हरि कृष्ण इतिनामभिर्वैष्णवाचमनंकुर्यात् रुद्रयामले विष्णुयागाद्यासुसीक्षु
हेतिलकंवर्णभेदतः नारदपंचरात्रे ब्राह्मणःसोर्ध्वपुंड्रस्यात्क्षत्रियस्यात्रिपुंड्रकोवैश्यपुंड्रमर्द्धचंद्रंस्यूद्राणांवर्तुलाकृति
कूर्मपुराणे यस्तुनारायणंदेवंप्रपन्नःपरमंपदं धारयेत्सर्वदाशूलंललाटेगंधवारिभिः यत्तत्प्रधानंत्रिगुणंब्रह्मवि
ष्णुशिवात्मकं धृतंतच्छूलधरणाद्भवत्येवनसंशयः तिलकधारणेमूर्तिपंजरेण मूलमंत्रेणवाकार्यमितिसांप्रदा
यिकः अथसंध्या तत्प्रकारस्तुमहाकपिलपंचरात्रे उपविश्यशुचौदेशेप्राणायामत्रयंक्रमात् मूलमंत्रेणकृत्वावैदे
हेकुर्वीजमार्जनम् शैवागमे प्राणायामत्रयंकृत्वामूलमंत्रेणमंत्रवित् अंगानिविन्यसेद्देहेकरन्यासपुरःसरं
अमृतीकृत्यपुरतोजलंवंधेनमुद्रया अभिमंत्र्यचमूलेनसप्तवारंचसाधकः अकारादिक्षकारांतैर्मातृकार्णैसविंदु
भिः प्रत्यर्णंप्रोक्षयेन्मूर्ध्निकुशैर्मूलेनवात्रिधा देवंध्यात्वाऽथमनुविद्भानुमंडलसंस्थितं आदायतोयमामंत्र्यबीजैर्भूतात्म
केस्तथा लंवंरंयंहमितिवत्तान्युक्तानिसर्गांतिते समस्तकृत्वातेनमूलमंत्रेणत्रिःपुनस्ततः वामहस्तेनिधायाथगालिते

रा॰
पू॰प॰
५

जलविंदुभिः पुनस्त्रिधावमर्षमंत्रेण त्रिः पुनश्चतत् प्रोक्ष्य मूलमंत्रेण मूर्द्धनि नासामार्गाश्रितशिखेनतेजोरूपेणतेनतं प्र
विश्यपापंतर्गतं सर्वमलं संशोध्य निर्गतं वामनासापुटेनतत्तस्वादक्षिणहस्ते गायत्र्यावाऽथमूलेन दृषदर्घे क्षिपेत्ततः
देवायमंडलस्थायरवेर्मूलेनतर्पयेत् त्रिधाजप्त्वाऽथगायत्रीमष्टाविंशतिवारकं जपित्वामूलमंत्रं च शतमष्टोत्तरं ततः
समर्प्यतज्जपं मंत्रीदेवमस्यास्यमंडलात् विधायस्वीयहृदयेततस्तर्पणमाचरेदिति मूलेनार्घ्यं नेत्रगायत्रीरहितमंत्रप
रमनधिकारिपरं चैवंसंध्ये स्यागस्त्यसंहितायां सायंप्रातश्चमध्याह्ने रामसंध्यासमाचरेत् जलमंत्रेण संशोध्यकवचेना
वगुंठ्य च वक्रीकृत्यजलं सम्यग्दर्भं मूलेनमंत्रवित् आवाहनादिमुद्राभिस्तीर्थमावाह्यपूजयेत् ब्रह्मांडोदरतीर्थानि
निकरैः स्पृष्टानितेरवे तेनसत्येनमेदेवतीर्थंदेहिदिवाकर गंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधुकावेरि
जलेऽस्मिन्सन्निधिंकुरु एवमावाह्यचारार्घ्यविधिवत्तज्जलेसुते आदायांजलिनासम्यग्जपेन्मालामनुंसकृत् ज
लंदक्षिणहस्तस्थंसव्यहस्तेविनिक्षिपेत् तान्निःसृतांबुनामूर्द्धिसिंचेन्मालामनुंस्मरन् दशावरेणतच्छेषमभिमं
त्र्यजलंपिबेत् पुनरंजलिनादायजलमूर्ध्वंविनिक्षिपेत् मंडलस्थायरामायनमोऽर्घ्यंकल्पयाम्यहं ततोरामोऽह
मस्मीतिगायत्रीनियतोजपेत् जन्मप्रभृतियत्पापंदशाभिर्यातिमेक्षयं पुराकृतंशतेनैवसहस्रेणजपेनवाबद्धोदाशरथा
येतिवियहेतिपदंततः सीतापदंसमुच्चार्यवल्लभायततोवदेत् धीमहीत्यपितन्नोरामश्चापिप्रचोदयात् एषास्याद्रामगा ५

यत्रीभक्तानो भुक्तिमुक्तिदा पुरश्चरणमस्याश्च तल्लं लजपावधि ओमादिरेषा गायत्री मुक्तिमेव प्रयच्छति मायादिरपि वेडषं
रमादिश्च श्रियं मूने मदनेनापि संयुक्ता संमोहयति मेदिनीं अनयाराधितो रामः सर्वाभीष्टं प्रयच्छति शैवागमे संध्यालो
पो न कर्तव्यः शंभो राशैवमेव हि दीक्षितः संध्याहीनो न दीक्षाफलमश्नुते संध्याहीनोऽन्यसंध्यायां पूर्वसंध्याक्रियामपि
विधायोत्तरसंध्यायाः क्रियां कुर्यादतंद्रितः अत्र प्रायश्चित्तमपि कर्तव्यं तदुक्तं तंत्रराजे स्नानसंध्यार्चनालोपे जपेद्दियां
प्रातेशिवेश्वतितया ध्यातादेवं जले सम्यक् जयित्वाऽथ मूलतः सजातजलेनैव अष्टोत्तरशताहृतांस्तर्पयेन्मूलमंत्रतः
तद्द्वैनतदर्द्धेन दशांशावाथ तर्पयेत् ततश्च सांगावरणदेवतास्तर्पयेत्क्रमात् एकैकांजलिना तत्तन्नाममंत्रेण मंत्रवित् पु
नः सम्यग्जपेद्देवेशं सांगावरणकं ततः समभ्रद्रासपद्द्वितीये स्वात्मानं तन्मयं स्मरेत् रामार्चनचंद्रिकायां तर्पयेच्च ततो मूलमंत्रो
च्चारणपूर्वकं रामं तर्पयामि ततः पीठदेवादिपूर्वकं चत्वारिंशद्द्विंशतादी सीतादीश्चतः क्रमात् हृदादीस्तर्पयेत्पश्चात्मध्ये
मध्येवसूद्वहं इति नारदपंचरात्रे ततश्चोदकसंपूर्णं भांडमादाय पाणिना एकान्ते निर्जने पापात्मनोनांते दोषवर्जिते हस्तमथ
स्पेस्मरेद्धित्वं प्रबुद्धानंदविग्रहं दिगंतरे न वीक्षेत मौनी संरोधितोचनः महाकपिलपंचरात्रे मूलमंत्रं जपन्गच्छेद्यावत्प्राप्नो
ति वेश्म हं प्रायहस्तौ च पादौ च प्रक्षाल्याचम्य यत्नतः यागमंडपमासाद्य विशेत्कृताप्रदक्षिणं उत्तरतंत्रे आचांतः प्रविशेत्प्राज्ञः
सुस्नातो देवपूजने पूजावेश्मावहिः स्थित्वा तावत्तर्हं नरेस्ताधिया गृहे चेतद्वारदेशस्थः प्रणम्य मनसा गुरुं प्रणमेदिष्टदेवं स्वदि

रा॰
सू॰प॰
९

कालानपि चेत्तस्मा यत्सर्वमर्जितं पापं तद्दिनेऽन्यदिनेपि वा प्रायश्चित्तैर्नोपनुदेत्तदा पापं स्मरेद्द्विया तत्पापस्यापनोदार्थं मंत्रद्वयम
दीरयेत् मंत्रद्वयं प्रयोगे वक्ष्यते तथा एवं कृते प्रथमतः पापोत्सादनकर्मणि यस्माद्दृढतरं पापं तद्दूरे वावतिष्ठते अतीतेश्
जने स्नाने स्वप्रयाति घनस्मृतम् यस्मादल्पपरं पापं तन्नाशमुपगच्छति पूजने त्वकपापस्य कामसिद्धं लक्षणं द्वयेत् सारसंग्र
हे ततः प्रक्षाल्य पादौ च हस्तावाचम्य यत्नतः दक्षपादर्घदिने शापतत्प्रकारत्रहोच्यते गोमयेनोपलिप्तायां भूमौ कृत्वा तु मंडलं
सिंदूरेण ततः पश्चादुपविश्य निजासने प्राङ्मुखः प्रणमेदिष्टदेवतां भक्तितत्परः प्राणायामत्रयं कृत्वा सूर्यमंत्रेण मंत्रवित्
विन्यस्य वनहृष्यादीन्ध्यात्वा सूर्यमनन्यधीः ततः कल्पविधानेन पूजयेदुपचारकैः पुरतो मंडले कृत्वा जलेन चतुरस्त्रकं
निधाय तत्र साधारं सजलं ताम्रपात्रकं गंधपुष्पाक्षतान्दर्भान्दूर्वासर्षपसंयुतान् सतिलान्रक्तपुष्पाणि पर्वोप्यपि प्रविन्य
सेत् सूर्यमंत्रेण तत्पात्रे स्पृशन्दक्षोत्तरेशते अभिमंत्र्य ततस्तत्रे समस्त्याय करद्वयात् मूर्ध्नीते सूर्यमंत्रेण दक्षपादर्घ विवक्षणः
जपेत्ततो यथाशक्ति सूर्यमंत्रमनन्यधीः तदर्घोवसनंते सूर्यं ध्यायेद्देशिकसत्तमः स्तुत्वा प्रणम्य विसृज्य तन्मंडलेते दिवाकरं
ॐ ह्रीं सः इति प्रत्ययः सूर्यमंत्रः ततस्त्वग्न्यायपविधिवद्द्वारपूजां समाचरेत् द्वारमूर्धाम्बुनाभीत्याविघ्नमूर्ध्वं समर्चयेत् तद्दक्षि
णे महालक्ष्मी वामे चैव सरस्वती द्वाराश्रियं च तन्मध्ये शाखयोर्दक्षिणान्ययोः गणपं क्षेत्रपालं च शाखयघनिधी क्रमात् मा
याशक्तिं च विघ्नकृतिं गंगां च यमुनां तथा धातारं च विधातारं मूर्ध्वादिक्रमतो यजेत् अधश्च देहलीमिष्ट्वा द्वारपालौ समर्चयेत् ९

6

नेदः स्तनेदंवंद्वेव प्रवेदवलसंत्तकौ प्रवलोमदनामाव सभरश्चाष्टमः स्मृतः क्रमादमीसमत्पर्यावेसवाद्वारपालकः द्वा
रदेवताध्यानम् अंकं लालितार्वेनवेदिकायांतथथा पाशांकुशफलांभोजपाणिंपाठलतेदिले वीरंविघ्नेश्वरंवंदेगजव
क्त्रंत्रिलोचनं १ पद्मद्वयवराभीतिभास्वत्पाणिचतुष्टया निर्दोषहेमगौरांगी महालक्ष्मीस्त्रिलोचनाध्यायेति २ प्रदत्त
स्त्रकुत्तकाभीतीर्दधानांवाङ्गुभिर्वरं त्रिलोचनोस्मरेदेवीं सर्वशुक्लांसरस्वतीं ३ तप्तकार्तस्वराभासादिव्यरत्नविभूषिता
हारश्रीनूर्ध्वपद्मस्थावराभयकरांबुजाध्येयेति ४ सितोगजास्यः परशुंदन्तंपाशंत्रिशूलकं भजैश्चतुर्भिर्बिभ्राणो मूषको
परिसंस्थितः ध्येयइति ५ कपालशूलेबिभ्राणंकपालेकृत्स्नविग्रहं नीलांगंलंसमवीमिदेवेशंततविद्विषम् ६
सक्तामाणिक्यसंकाशो किंचित्स्मितमुखांबुजौ अन्योन्यालिंगनपरौ शावयेकजधारिणौ विगलद्रत्नवर्षाभ्यां शंखा
भ्यांमूर्द्धिलांछितौ शेषासनसमासीनौ विश्वसंकल्पकल्पकौ नैदिलेकंतुकनिधिवसुधारांचनस्तनी वामतः पंक
जनिधिंप्रियया सहितंस्मरेत् सिंदूराभौ भजास्त्रिष्टौ रक्तपद्मोत्पलान्वितौ निःसरद्रत्नवर्षाभ्यां पद्माभ्यां मूर्द्धिलांछितौ
पद्मासनसमासीनौ विश्वसंकल्पकल्पकौ नैदिले पंकजनिधिं तन्वीवसुमतीमपि ७ वरांकुशौ पाशमभीतिमु
द्राः करैर्दधानो भवमावमूलं वनाचनीचप्रभदेहकांतिं मायांत्रिनेत्रामनिशंस्मरामि ८ पाशांकुशवरीभीती
र्दधानामहणप्रभा त्रिनेत्राचिक्तालांवंदे गौरीवक्त्रांवरोद्धता ९ वराभयकरां सौम्यां सोमकोटिसमप्रभाम्

ग॰
सू॰ प॰
७

भजेगंगांमहादेवींपरांदेवतरंगिणीं १० वामपादाग्रसंभूतांपरांदेवतरंगिणीं वराभयकरांवंदेकालिंदींकालविग्रहां ११ भैरींरज
गतांवंदेशंखचक्रगदाभुजे विश्राणांगरुडारूढांधातारेक्तसविग्रहे १२ रक्तेरक्तांबरांविंदस्थवराभयकमंडलून् हंसारूढांविधा
तारंवंदेउत्तमसकलमान्विते १३ सिंहारूढांश्यामवर्णांखङ्गखेटकधारिणीं श्रुधः स्थाद्देहलींवंदेयष्टिमोसांसहवासिनीमिति १४
ततःसारसंग्रहे पश्चिमद्वारमासाद्यतालत्रितयपूर्वकं द्वारमद्वाघवाघेणमंत्रितान्सर्षपाक्षतान् पुष्पपुंजांस्तुविकिरेत्मंडपा
भ्यंतरेबुधः नाराचमुद्रयासम्यगस्त्रमंत्रेणदेशिकः तुर्णयागे सिद्धार्थाक्षतपुष्पाणिनाराचास्त्रक्षिपाद्बुधः अस्त्रमंत्रेसमन्वा
र्थमेनयोतर्विनिक्षिपेत् नाराणीये अपक्रामंतुभूतानीतिवतमंत्रद्वयंगुरुः पठित्वाक्षतसिद्धार्थपुष्पाणिविकिरेततः अस्त्रमंत्रे
णमंत्रज्ञोमंडपाभ्यंतरेबुध मंत्रद्वयंप्रयोगेवदपते अस्त्रेणकोपास्त्रमंत्रग भूतेनफट्कारमात्रेण तुकाऽभरेसर्षपमक्षतो
तडक्तेभुवनेश्वरीपारिजाते हकाररेफौवविसर्गवेतावस्त्रायफट्कारववसदते तुकाऽत्रेसर्षपमक्षतोश्चपुष्पाणिमंत्रविदि
ति तुर्णपद्धतौ निर्गच्छंतांतविघ्नानोवत्संदद्यात्स्ववामतः सोमशंभुःमंडपाभ्यंतरेविघ्नानूदक्षपादपुरःसरं प्रविश्यविघ्नोत्स्वि
विधानुत्सार्यास्त्रमंत्रेसरेत् पामले पाखंडकारिणोभूताभूमौयेचान्तरिक्षगाः दिविलोकेस्थितायेचतेनश्यंतुशिवाज्ञया
इत्यनेऽ संसमन्वार्थ्यपार्ष्णिघातादिभिस्त्रिभिः विघ्नानुत्सारयेदितिशेषः तुर्णयागे पार्ष्णिघातैस्त्रिभिर्भूमौ स्ताल्लैस्त्रानेतवि
क्षगान् विघ्नानुत्सारयेदियानस्थतीक्षणावलोकनात् पार्ष्णिघातैर्वामपादस्यवामपार्ष्णिविनिर्घातैर्भूमिष्ठानितिसोमशंभुव ७

वनात् सारसंग्रहे विधानन्तस्यार्घ्यविधिवद्द्वारमाढ्यायवासमा पेवगत्यार्चितोयाभ्यांप्रोक्षयेन्मंडपांतरे श्रीजलार्णवे संमार्ज
नोपलेपाद्यैर्दर्पणोदरवत्कृतं विमलेऽपुष्पदीपादीपुष्पदामादिशोभिते पंचवर्णैरजश्चित्रैस्स्थानशुद्धिरियंमता सारसंग्रहे नै
ऋत्यामर्चयेद्वास्तुपुरुषं वंदनादिभिः ईशानेदीपनाथं च देत्रपालात्मपातनः संविशेदासने मंत्रीति देत्रपालप्रार्थनमंत्रः प्रयोगेव
त्पने उत्तरतंत्रे अः फडिति वमंत्रेण प्रजावेदीनतो विशेत् संस्कुर्यादासनस्थाने चतुर्भिर्वीक्षणादिभिः संस्कारैस्तत्र सज्जावे
ध्येताः पीठदेवताः आधारशक्तिमारभ्य स्वासनेतत्र विन्यसेत् आपस्तंबः प्रजासनमथात्मीयं चैलाजिनकुशोत्तरे तत्रोपविश्य
विधिवत्स्मरेद्धृदि स्वगुरुं सदा योगिनीतंत्रेऽष्टार्णमंत्रेणासने संनिविश्य इति मंत्रः प्रयोगेवत्पते भैरवीतंत्रे मेरुपृष्ठऋषिः प्रोक्तः
सुतलं छंद ईरितं पृथिवीदेवताप्रोक्ता विनियोगो निजासने निजासने त्वात्मासने सारसंग्रहे आसनस्य चतुःकोणगणेशवस
रस्वती दुर्गां क्षेत्रपतिं चापि च आदिषु समर्चयेत् गौतमीयतंत्रे प्राङ्मुखोदङ्मुखो वापि स्वस्तिकासनमास्थितः उत्तरतंत्रे उ
दङ्मुखः प्राङ्मुखो वाप्यत्र प्रयतमानसः स्वस्तिकासनमासीनः पद्मासनमथापि वा पद्मासने स्वस्तिकासनं चोक्तं योगशा
स्त्रे सव्यपादपुटपादाय दक्षिणोपरि विन्यसेत् तथैव दक्षिणं सव्योपरि ष्टाच्च निधापयेत् विष्टभ्यकधुरो ग्रीवानासाग्रन्यस्तलोचनः
पद्मासनं भवेदेतत्सर्वेषामपि पूजिते जान्वोरंतरे कृत्वा सम्यक्पादतले नेम ऋजुकायः सुखासीनः स्वस्तिकं तत्प्रचक्षते सारसंग्र
हे स्वस्तिकादिकमेणैव ऋजुकायो विशेद्बुधः स्थापयेद्दक्षिणे भागे पूजाद्रव्याणि चात्मनः सुवासितां बु संपूर्णं सव्येकुंभं सुशोभ

रा॰
पू॰ प॰
८
8

ने प्रक्षालननायकरयोः पात्रं पृष्ठे निवेशयेत् घृतादिद्रुलितान्दीपान्स्थापयेत्परितः शुभान् दर्पणंचामरंछत्रंतालवृन्तंचपादुके
यथानयेन्तमेस्थापयेस्तक्रुर्यात्ननिवात्मवान् उत्तरतंत्रे पुष्पैर्नैवेद्यगंधादिह्रोंहुंफडितिमंत्रकैः नारावमङ्गयाहस्यासमपावविलो
कयेत् यदात्मनानवस्त्राते संस्पृश्यादिदूषणं श्मश्रुश्मश्रुस्पर्शनेवापिपदस्याशर्जितेववा तथानिर्माल्यसंस्पृष्टेकीटपारोहणेवयत्
तत्सर्वंनाशमायातिनैवेद्यावलोकयन् ततोरमितिमंत्रेणशिखोदीपस्यसंस्पृशेत् सतत्स्याकुम्भदोदीपोनिःक्रव्यादःसुखप्रदः
पतंगकीटकेशादिदाहाक्रव्यादसंहतेः वसामज्जादिसंभूतैर्यत्तादावुपयोजने प्रक्षालतत्पेनत्सर्वंदोषंस्पर्शोद्भिनश्यति नारसि
हेनमंत्रेणदेवतीर्थेनसंस्पृशेत् पानीयघटमध्यस्थंवीक्षन्गुरुरेवयाजकः वामेनपाणिनावाघ्रत्वावामपार्श्वेस्थितेनदा पा
त्रमाधारमंत्रेणसंस्कुर्वन्स्पर्शोद्भवं यदिस्नानादयेपादिसंस्पृष्टिरिहसंगतापदस्यदूषणंपात्रेतोयेवाःस्नानतोभवेत् ज
जलाशयशवस्पर्शजनस्नानावसंगते दूषणानिविनश्यन्तितानिवैदेवभजने नृसिंहमंत्रः क्ष्रौमितिएकाक्षरः आधारमंत्र
स्तु स्वमेस्ताधान्तरेविंडुवेत्रार्धपरियोजिते मंत्रायूद्धारेनामापदान्तरमिसर्थः उत्तरतंत्रे कृतांजलिपुटोभूत्वावामदक्षिणपार्श्वयो :
नत्वागुरुंगणेशानेपुरतःस्वेष्टदेवते सुगंधपुष्पादोणपायेवेदानाकानिमंत्रवित् मर्दयित्वाकरौसम्यकरभीकृत्यसाधकः वामह
लेसमादायतिर्मंच्याघ्रापयत्ततः वक्ष्यमाणेनमंत्रेणरोशान्तोहरतमन्जेत् मज्जेत्तारावमङ्या छिपेडतरतःपुष्पंमंत्रीनारावः
मङ्येतिसारसंग्रहवचनात् मंत्रःप्रयोगेवक्ष्यते नृसिंहकल्पे करशुद्धिंसमासाद्यकुर्यात्तालत्रयंततः ऊर्ध्वोर्ध्वमस्त्रमंत्रेणदिग्ब ८

धमपिदेशिकः तेनमंत्रजनितेनतेजोरक्षांकुर्यात्समंततः अस्त्रमंत्रस्यैतस्यैकरशुद्ध्यादिषुसंबंधः पाणिविशोधयेदस्त्रमंत्रेणमन्तुवि
तमः इतिदक्षिणामूर्तिकल्पवचनात् अस्त्रमंत्रस्तत्तदंगभूतोनतुकेवलफट्कारः रः अस्त्रायफट्प्रोक्ताआमयेद्दक्षिणंकर
मितिॐभसंभववचनात् अतएवात्रयत्रयत्रास्त्रादिपदेनाभिधानंतत्रतत्रतत्तदंगभूतास्त्रादिमंत्राग्राह्याः नतुफट्कारमात्रम
त्रवचनात् नाराचमुद्रालक्षणं प्रयोगसारे अंगुष्ठाग्रदिष्टतर्जन्यास्येष्टाग्रवलिताग्रयेति सारसंग्रहे प्राकारंचिंतयेद्वन्हेः हू
ताः हेतुणासमुद्रया समुद्रयाग्निप्राकारमुद्रया सातग्रेवक्ष्यते गोपालकल्पे स्वासनेनोपविश्यप्राणायामंविधायवै भूत
शुद्धिंततः कृत्वान्यासंकुर्यादनंतरंन्यासेमातृकायाः सारसंग्रहे भूतशुद्धिंततःकुर्यात्प्राणायामपुरःसरे पादतोजानुपर्यंतंचतु
रस्रंसवज्रकं लंयुतंपीतवर्णंचभुवःस्थानंविचिंतयेत् १ जान्वोरानाभिवंद्राहेतिभेपद्मेनलांछितं शुक्लवर्णंस्ववीजेनयु
क्तंध्यायेदपांस्थले २ नाभितःकंठपर्यंतंत्रिकोणंरक्तवर्णकं सस्वास्तिकंस्ववीजेनयुक्तंवन्हेस्तुमंडले ३ कंठाद्भ्रूमध्यपर्यं
तंकृष्णंवायोस्तुमंडले षट्कोणंबिंदुभिःषड्भिर्युक्तंबीजेनचिंतयेत् ४ भ्रूमध्याद्ब्रह्मरंध्रांतंवृत्तंलंध्वजलांछितं धूम्रवर्णंस्ववी
जेनयुक्तंध्यायेन्नभःस्थले ५ इतिध्यात्वातुभूतानिस्वकायेदेशिकोत्तमः धर्मकंदसमुद्भूतज्ञाननालसुशोभितं कृत्वातत्क
र्णिकेस्थप्रदीपकलिकाभिभे सुषुम्नावर्त्मना त्वात्मानंपरमात्मनियोजयेत् आत्मानंजीवात्मानंपीगयुक्तेनविधिनासोहंमे
त्रेणसाधकः तत्रैवसर्वभूतानिविलीनानिविचिंतयेत् ततःपुरुषनिभमित्यादिनापपुरुषध्यानंप्रयोगेवक्ष्यते तथा ततः सं

रा॰
पू॰प॰
९

9

शोषयेदनेन स्वरकादिक्रमेणैवं विधाय प्राणमेरीषं वायुवीजेन वायुना वह्निवीजेन तेनैव संदहेत्सकलात्तनुं भस्मतद्धाममार्गेण निर्गतं
चिंतयेत्सुधीः ततो वमिति वीजेन प्लावयेत्सकलां तनुं सेजाते सकले देहे देवतोपासनक्षमे आत्मलीनानि तत्त्वानि स्वस्थाने स्थाप
येत्ततः आत्मानं हृदयांभोजमानयेत्परमात्मनः हंसमंत्रेण विधिवत्तेजोह्यपेकलेवरे देवताराधने योग्यमत्यन्तमिति भावये
दिति तथा च स्वयोज्यजीवमथ पुर्यष्टकमध्यनाडीमार्गेण पुष्कर निविष्टशिवे समस्तं हंसेन देवममरेंद्र पुरोगतेनेति योगि
नीतंत्रवचनात् सोऽहंमंत्रेण तामाधांमादाते सिद्धभाविता ध्यात्वैवं ब्रह्मरंध्राच्च हृदि जीवकलान्न्यसेदिति वासिष्ठसंहिता
वचनाच्च हंसमंत्रेण जीवस्योत्थापने सोऽहंमंत्रेण पुनरानयने कुर्यात् क्रमदीपिकायां स्नातो निर्मलहृद्धमधौतवसनो
धौतांघ्रिपाणिर्नमः स्वाचांतः सुपवित्रमुद्रितकरः श्वेतोर्ध्वपुंड्रोज्ज्वलः प्राचीदिग्वदनो निबद्धसुदृढपद्मासने स्वस्तिके
वासीनः सगुरून्गणाधिपमथो वंदेत बद्धांजलिः ततोस्त्रमंत्रेण विशोध्य पाणी त्रितालदिग्वंधहुताशशालान् विधाय भूः
तात्मकमेतदंगं विशोधयेच्छुद्धमतिः क्रमेण इडावक्रे धूम्रमत्तनगानिवीजं सलवकं स्मरेत्तस्यैव मंत्री सकलभवनोच्छोष
णकरं स्वकं देहं तेन मतनवपुषा पूर्ण्यं सकलं विशोष्य यामेनैतत्पवनमथमार्गेण त्वमणेः तेनैव मार्गेण विलीनमाहृते
वीजे विचिंत्यानलणमाशुशुक्लेः आमूर्ध्वदेहं परिदह्य वामनतो मंत्रेवेत्समीरे सह भस्मनावहिः भस्मना पापदेहं भस्मना
ट परमतीव शुभ्रममृतोपशुपथ्येन विधुं नयतु ललाटवेंदममतः सकलाणिमयी लपरजयात्रिपात्परचयेत्सतपासकले ९

वक्षरं स्मृतो यह स्थिमयवज्रकरायमिदं अत्र केचित् वायुबीजादिजपे वन्हः षट्साद्दिसंख्यामाहुस्तत्र प्रमाणं मृग्यं वस्तुतस्तु तत्र
कुंभकभावनावधिरेव जपो वायुबीजादीनां तदुक्तं कामाख्यनीसंहितायाम् ततो भूतात्मकं देहं वायुबीजेन वायुना वायुमन्त्रो·
त्थसंशोषयेत्तावत् मंदस्तु पात्यजेदिति तथा योगिनीतंत्रे दक्षिणे वन्हिबीजेन मारुतरथमिति भावयेदिति च कुंभसंभवः भूत
शुद्धिविधौ वेनकृता भूतशुद्ध्यभिचारवत् विपरीतं फलंदद्याद् भक्त्याऽभ्यजनं यथेति अत एवं यमावश्यकी श्रीकुलार्णवे आत्मस्था
नमनुश्चदेहशुद्धिमथ्यं वमी यावन्न कुरुते देवि तावद्देवार्चने न हि स्नानभूतशुद्धिः स्नात प्राणायामादिभिः प्रिये षडंगा·
यविलन्यासैर्देहशुद्धिरितीरिता आगमः पुष्पालताविङ्गाणां कुर्यात् जलादिशोधनं क्षालनेनानुलेपादेर्मूर्तिशुद्धिं
समाचरेत् अथ यत्नेनात्मशुद्धिं त्रिशुद्धिं ततश्चरेदिति सारसंग्रहे भूतशुद्धिं विधायेत्थं ततो वै स्थापयेदसून् असून् प्राण
न् तत्प्रकारः प्रयोगेव दाते त्रैलोक्यसंमोहनतंत्रे प्राणायामं ततः कृत्वा मातृकान्यासमाचरेत् आगमः वामया पूरयेद्वायुं स्वरैः
कोष्ठं कुंभयेत् रेचयेत् पादिभिर्वर्णैस्ततः पिंगलया पुनः प्राणायामत्रयं चेत्थं कृत्वा व्यापकमाचरेत् अकारादिक्षकारांतैरापादतलम
स्तकं सबिंदुकैर्मातृकाक्षरैरित्यर्थः इति मातृकाप्राणः सिद्धसारस्वततंत्रे दक्षहस्ततलस्पृष्टैककरभेदः गुष्ठकादिषु कनिष्ठां
तामथ वामे च कनिष्ठादितलावधि स्वरान् षोडश देवेशि केवलान्विन्यसेत्प्रिये बिंदुयुक्तान्विलोमेन वामहस्ततलात्प्रिये दक्षह
स्ततलांते तन्न्यसेत् संहारई रितः दक्षस्तेहतलादेवि वामहस्ततलावधिं न्यसेद्विसर्गसंयुक्तान् सृष्टिरेषा प्रकीर्तिता वामहस्तक

रा॰
पू॰प॰
१०

निष्ठादितनलावधिविन्यसेत् विंडसर्गयुतानष्टौ लृकारादीन्स्वरांस्तनः कलहस्ततलादेवितत्क निष्ठावधिप्रिये अकारादि अ
कारांतोऽक्षितिन्यास उदाहृतः दक्षिणांगुष्ठमारभ्य पंचस्वंगुलिषु क्रमात् ककारादिणकारांतान् पर्वस्वेकैकशो न्यसेत् वाम
स्यांगुष्ठमारभ्य पंचस्वंगुलिषु क्रमात् तकारादिशकारांतान्पर्वस्वेकैकशो न्यसेत् अंगुष्ठादिकनिष्ठांतस्वंगुलीषु तथा न्यसेत्
अंगुष्ठादिष्वंगुलीषु व्यापकत्वेन संदरि करशुद्धिविधायैतं मातृकार्णैर्महेश्वरि करांगानि न्यसेत्पश्चाद्धृदयादिसमार्गेण वर्त्मना
मातृसंग्रहे षडंगानि क्रमाद्देवि विन्यसेद्देशिकोत्तमः अंआं मध्ये कवर्गः स्यादिंईं मध्ये चवर्गकः उंऊं मध्ये टवर्गः स्यादेंऐं
मध्ये तवर्गकः ओंऔं मध्ये पवर्गः स्याद्बिन्दुवारविसर्गयोः यशवर्गौ सलक्षौ तौ जातियुक्तानिमान्न्यसेत् अंतर्मातृकान्यासे
विशेष उक्तो मंत्रप्रकाशे आधाराभ्यंतरेभ्यस्य षडाधारेषु पार्वति अकारादिलकारांतान् स्थूलदेहे वहिर्न्यसेत् इति तत्रो
न्न्यासे क्रममाह दक्षिणामूर्तिः कलोपक्षां तु नेकंठे स्वरान्सम्यक्प्रविन्यसेत् हृत्पद्मे पत्रे तद्वर्णान्द्वादशदले न्यसेत्
दशवर्णान् लिंगमूले षड्दले षट् तथेश्वरि चतुर्दले तथाधारे चतुर्वर्णान्समन्यसेत् अमध्ये हि दले हृत्वा विसर्गे मातृकां
न्यसेदिति तद्वर्णान्द्वादशवर्णान्कादिठांतानित्यर्थः दशवर्णान्डादिफांतान् षड्वर्णान्बादिलांतान् चतुर्वर्णान्वादि
सांतान् एतान्विंदुयुक्तान्न्यसेत् विंदुयुक्तान्वर्णानितिज्ञानार्णववचनात् पश्चान्तो वर्ण उक्ता ज्ञानार्णवे मूलाधाराह्वये चक्रे
स्वर्णवर्णे चतुर्दले युते वादिचतुर्वर्णैर्डाकिनी तत्र देवता १ स्वाधिष्ठाने लिंगमूले चक्रे षड्दलशोभिते पृष्ठादिष्ठा दिषड्वर्णेषु १०

10

तेदेवतातत्रराकिनी २ नाभौदशदलेनीलाब्जनाभेमणिपूरकं लाकिन्याधिष्ठितेऽग्न्याद्यैः शोभमानेदशाक्षरैः ३ हृदयेमणिपूराक्षेद
लैर्द्वादशभिर्युते सिंदूराभेकादिठांताक्षरैःकाकिन्याधिष्ठिते ४ कंठचक्रेविशुद्धाख्येधूम्राभेषोडशच्छदे षोडशस्वरसंयुक्तेशाकि
न्याससमधिष्ठिते ५ आज्ञाचक्रेभ्रुवोर्मध्येद्विदलेचंद्रसन्निभे हाकिनीदेवतातत्र हक्षौवर्णौसबिंदुकौ ६ इतिश्रुतमातृकान्यासोमनसैव
कार्यः तदुक्तंदक्षिणामूर्तिसंहितायां पुष्पैरनामयावापिमनसावान्यसेदथ इति अत्रवाशब्दोव्यवस्थितः अत्रान्येत्वाहुः
अत्रैवंव्यवस्था पुष्पैर्देवतामूर्तौ अनामयास्वदेहे मनसामूलाधारादिचक्रेषु तत्रकरस्पर्शासंभवात् अनामयासांगुष्ठ
या अंगुष्ठानामिकाभ्यांतन्न्यासः सर्वत्रसंमतइतिपथवाहिनीवचनात् ऋष्यादिकरषडंगन्यासव्यतिरिक्तेविषयेव्यवस्थाविज्ञेया
तत्रांगुष्ठादिसर्वांगुलीनांविहितत्वात् तथैवसंप्रदायात्षडंगमुद्राणांदृष्टत्वाच्चेतिपादनाच्च बहिर्मातृकान्यासेवर्णस्थाना
न्युक्तानिसारसंग्रहे मस्तकेमुखवृत्तेचनेत्रकर्णेषुविन्यसेत् नासागंडोष्ठदंतेषुसमूर्धास्येषुविन्यसेत् पाणिपादयुगसंधि
संध्यग्रेषुन्यसेत्क्रमात् पार्श्वयोःपृष्ठसन्नाभिजठरेषुप्रविन्यसेत् हृदोर्मूलककुद्धामदोर्मूलेषुहृदादिषु करयुगलेचैवज
ठराननयोर्न्यसेत् मस्तकशब्देनललाटकेशसंधिर्ग्राह्यः मूर्धाब्रह्मरंध्रमिति क्रमदीपिकायांच शिरोवदनवृत्ताक्षिश्रव
णघ्राणगंडोष्ठदंतद्वयेषुसशिरोमास्येषुचइतिन्यसेन्मंत्रवित् हलमूलकरपादसंधिषुतदग्रकेषुवाददत्तपार्श्वयुगपृष्ठनाभ्युदरके
षुपायानथ हृदयकक्षककुत्करमूलकरयुगगोदरवक्त्रगतानजुषः हृदयपूर्वमनेनपथाऽन्वहंन्यसतनुष्टकलेवरसिद्धये

इत्याख्यमथ वर्णाशताद्यैकेन सार्द्धं न्यसेच्छ सविसर्गकसोर्भर्येतैः विन्यस्य केशवपुरः सरमूर्तिपङ्क्तेः कीर्त्यादिशक्तिसहितैर्न्यसेत
ग॰ क्रमेण अर्णशताद्यैकेन पंचाशद्भिर्णैः अथ कथयामि वर्णैर्नाम्नां मूर्तीः शक्तीः समस्तभुवनमयीः केशवकीर्ती नारायणकान्ती मा
पृ॰ प॰ धवस्तथा तुष्टिः गोविंदः पुष्टियुतो विष्णुर्धृती मधुसूदनश्शमथाख्यायः शान्तिस्त्रिविक्रमश्च क्रियायुतनर्वामनो दयायुक्तः श्रीधरयुता
११ वमेधा हृषीकनाथश्च हर्षयायुक्तः श्रद्धा पद्मनाभश्रद्धे दामोदरसंयुता पुनर्लज्जा लक्ष्मी सवासुदेवा संकर्षणकः सरस्वती प्रद्यु
म्नः प्रीतिसमेतोऽनिरुद्धो रतिरिमाः स्वरोपेताः चक्रिजयेगदीदुर्गे शार्ङ्गी प्रभयान्वितस्तथा खड्गी सत्याशंखी चण्डी हली वा
ण्या मुसली विलासिनि काशूली विजयापाशी विरजा विश्वान्वितोऽङ्कुशी भूयः विमदा मुकुन्द युक्तानन्दसुनन्दे स्मृतिश्च नन्दि
युता नरसिंही नरकजिता समृद्धिर्हरियुक्ता शुद्धिः कृष्णः बुद्धियुतः सत्ययुता भक्तिमेति युक्तः सात्वतः शौरिः क्षमया शूरो रम
या जनार्दनोमेव भूधरः क्लेदी विश्वादिमूर्तियुक्ता क्लिन्नावैकुण्ठ युक्ता तथा वसुदा पुरुषोत्तमश्च वसुधा बलिनाव पराबला
भुजोपेता भूयः परायणाख्या बालः सूक्ष्मा ह षत्र्मसंख्येव महेषामर्ता हंसः प्रभा वराहो निशा च विमलोऽमेधा नरसिंह विद्युते
व शाणि गदितान्मूर्त्योहलांशक्तियुताः वर्णान्त्काम सार्द्धेयं ङ्गास्व रक्तान्मूर्तीः शक्तीर्डें व समानान्तिव उक्तान्य सेयादिकान्तमसधातून्
प्राणे शक्तिं क्रोधमथात्मनेऽन्तानूइति ॐ भमसंभवः क्रमेण कामबीजं च मातृकादौ रमेव च केशवे चापि कीर्ति च नमोऽन्ते विन्यसे
ततः शिरो वदन हृन्नादिस्थानेषु च विधिः स्मृतः ओंकारं सारबीजं च मातृकादौ रमेव च एकैदेवं तथा शक्तिमेकोनमङ्गतिक्रमः ॥

केशवादिरयेमासोन्यासमात्रेणदेहिनां अच्युततंददात्येवमनेसत्येनसंशयः इति तथा कामेश्वरोकेवलोवामनेत्रोकर्मी
रेभसान्तकोविन्यसेयः [redacted] मेत्राः सयः ऊर्वेततस्यसिद्धिंदोषैःसार्द्धयातिनाशंजरावं तत्वन्यासमहायागस्यः अथतत्वं
प्रवक्ष्यामितत्वन्यासेतदर्थिनां यत्तत्वन्यासमात्रेणतत्वमेवप्रजायतेइति सारसंग्रहे इतःपरंप्रवक्ष्यामितत्वन्यासमनुत्तमं
यत्तत्वन्यासमात्रेणतत्वात्मासंप्रजायते क्रमदीपिकायां इत्यच्युतीकृतवपुर्विदधीततत्वन्यासंसमपूर्वकपरादरतत्वपेत
भूयःपरायवतदाहृयमात्मनेवनत्येतमहरतत्ततमन्त्रतुक्रमेण सकलवपुषिजीवंप्राणमायोज्यमध्येमसत्वमतिमहे
कारेमनश्चतिमंत्रीकमत्वहृदयगृहाग्निष्ठयीशाहपूर्वं गुणगणमथक्रणांदिष्टितेश्रोत्रपूर्वं वागादीन्द्रियवर्गमात्मनिलः
येषाकाशपूर्वंगणंभूयोसेहृदयेशिवेवराणयोर्हृत्पुंडरीकेहृदि विंवानिद्विषडष्टषुग्दशकलाव्यामानिसूर्येन्दुवाह्नी
नांवयवकासततस्तभूतवसमन्यस्तंदैमेत्रवित् अथपरमेष्ठिपुमान्सौविश्वनिर्वृत्तिःसर्वइत्युपनिषदस्यसेदाकाशादि
स्थानस्थानोपपरवलार्णैः सलवकैः वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः नारायणश्चक्रमतः परमेष्ठ्यादिभिर्युताः
ततःकोपतत्वंहरोविंदुयुक्तेनृसिंहंन्यसेत्सर्वगात्रेषुतन्द्रूः क्रमेणेतिवतात्मकोन्यासयुक्तः स्वसान्निध्यकृद्विवसर्वादिषु
स्यात् यापरवलार्णैः षः षकारः रेफस्यानुपसमीपंनुपरंतेनपकारलकारो वंवकारः लार्णोलकारः एतेकथंभूतैःस
लवकैः विंदुसहितैरित्यर्थः अहकलेपवंविन्यस्यदेहेस्वमातृकोविश्वमानर प्राणायामत्रयेकृत्वामूलमंत्रेणमंत्रवित्

विन्यस्य नरपिंडेदौ देवतानि महामन्त्रे कृत्वा करांगविन्यासं योगपीठं स्मरेत्ततो रुद्रयामले सगर्भश्चाविगर्भश्च प्राणायामो
रा॰ द्विधामतः योगिनीतंत्रे अथ प्राणायामः सकलदुरितध्वंसनकरो विगर्भः प्रोक्तोऽसौ शतगुणफलो गर्भकलितः जपध्याना
सू॰प॰ पेतः सत्वनिगदितो गर्भरहितः सगर्भस्तु प्रोक्तो मुनिपरिदृढैर्योगनिरतैः ज्ञानार्णवे आसने सम्यगासीनो वामेनाङ्गुष्ठेनोदरं
१२ कुंभकेन विरहस्य दक्षिणेन तु रेचयेत् कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं प्राणायामः स विज्ञेयस्तर्जनीमध्यमे
विना विरहस्य मूलमंत्रं त्रिरिति त्र्यनसेव्यावच्छेदके कुंभसंभवः यावच्छक्यं नियम्यास्तन्मनसैव मन्त्रं जपेत् तामेव
ऋमेङ्ग्यो यन्त्रीवोक्तविधिना मन्त्रे अथात्रियम्य कुंभके कृत्वा रामे ध्याय यावच्छक्यं मन्त्रं जपेदिति सेवेयः अतः कुंभकसमय
एवमेत्रजपोतेयः दक्षिणामूर्तिकल्पेपि प्राणापानौ समौ कृत्वा अविषापव कुंभके हृत्पंकजे समासीने ध्यायन्मनमान
12 स मूलमंत्रं यथाशक्ति जपेद्भक्तिपरायणः अतोऽत्र जपसंयोगभूतप्राणायामेषु यथाशक्ति मूलमंत्रस्य जप एव कार्यः
नतु मात्रादिगणनानत्स्यास्तु योगांगप्राणायामपरत्वात् उक्तं च कात्यायनीतंत्रे मध्यामूलाद्यावदग्रमंगुष्ठेन निपीड्यते
मात्रा सा प्रोच्यते सद्भिर्योगिभिर्हि प्रयत्नतीति योगशास्त्रेपि जानुप्रदक्षिणीकुर्याद्यावत्कालेन हस्तकः तावत्का
लमिता मात्रा स्वनिश्वाससमापिसेति कुलार्णवे नपोसितीर्थयात्राया मत्वदानव्रतादयः प्राणायामस्य तस्येते क
लां नार्हन्ति षोडशीं मानसं वाचिकं पापं कायिकं वापि यत्कृतं तत्सर्वं निर्दहेच्छीघ्रं प्राणायामत्रयेणवै दशसंतेध्यापमा १२

नानांधातूनांहियथामलाः तथेंद्रियाणांदह्यन्तेदोषाःप्राणस्यसंयमात् प्राणायामविशुद्धात्मायद्यत्कर्मकरोतिहि तत्तत्फ-
लंप्रसंदेहस्तप्रयत्नेनवाकृतं कुंभसंभवः प्राणायामैर्विनायद्यत्कृतंकर्मनिरर्थकं अतोयत्नेनकर्तव्यःप्राणायामः शु-
भार्थिभिः अतःपरंसोपासमंत्रस्यऋष्यादिकरषडंगन्यासान्कृत्वायोगपीठन्यासंकुर्यात् ऋषिन्यासेविशेषोदक्षिणा-
मूर्तिसंहितायां ऋषिकंदक्षिणामूर्तिरहंशिरसिविन्यसेत् पंक्तिश्छंदस्तुविज्ञेयंमुखेविन्यस्यपार्वति देवताहृदयेवा
लोविन्यसेत्परमेश्वरीति न्यासप्रकारस्तु योगिनीतंत्रे ऋष्यादीन्विन्यसेद्देविवक्त्रधीहृदयान्तिकानिति ऋषयेनमः
छंदसेनमःइत्यादि प्रपंचसारेऋषिर्गुरुत्वाच्छिरसैवधार्यश्छंदोऽक्षरत्वाद्रसनागतंस्यात् धियावगंतव्यतयासुदेवंहृदि
प्रतिष्ठामनुदेवतायाः ऋष्यादिपदानामर्थस्तुसारसंग्रहे ऋवर्णार्थस्तुगमनार्थोधातुःप्राप्त्यर्थकस्तथा षिवर्णार्थस्तुवि-
ज्ञानमतस्तस्यार्थंपश्यतः अनयोरुपसंपन्नात्ऋषिर्गुरुरितीरितः छदीतिधातूरक्षायांदातिर्दानार्थकोभवेत् छंदोवक्तिम-
नोर्वर्णान्नद्वयोरिक्षाप्रदानतः क्रीडार्थकाद्दृशनीतिसंपन्नंदेवतापदं साधकायमनोभावंददातीतिजगुर्यतःइति अत्रकेचि-
त् करन्यासेअंगुष्ठाभ्यांनमः तर्जनीभ्यांनमःइत्यादिन्यासंवदंति तत्रप्रमाणंचिंत्यं वस्तुतस्तुज्ञानार्णवादिनानातंत्रद-
र्शनान्मदज्ञानविजृंभितमितिभाति यथाज्ञानार्णवे मूलविद्यांशिरोहस्तपंचांगुलितलेषुच षडंगक्रमयोगेनविन्यसेत्पर-
मेश्वरीति षडंगक्रमयोगेन हृदयायनमःशिरसेस्वाहा इत्यादिक्रमेणार्थः शारदातिलके अंगुष्ठादिष्वंगुलीषुन्यसे-

देवैः सजातिभिः अस्त्रेत्तत्तलयोर्न्यसेदिति सजातिभिः हृदयायनमः शिरसेस्वाहेत्यादिसहितैः अंगैस्तत्तन्मंत्रोक्तैः तेन
रा॰ रोहृदयानमः रीशिरसेस्वाहेत्यादिभिरित्यर्थः जातिलक्षणंतुकारणागमे नमःस्वाहावषट्हुंवौषट्फट्कारएवच जाति
सु॰ प॰ षट्कमिदंप्रोक्तंहृदाद्यास्त्रान्तसंगतमिति नारदपंचरात्रे अथवांगानियोजयेत् कनिष्ठाद्यास्त्रवत्ततोहृदयादिक्रमेणवि
१२ ति हृदयायनमः शिरसेस्वाहेत्यादिक्रमेणेत्यर्थः योगिनीतंत्रे उच्चरेत्प्रणवंश्वेमाकारंविंडसंयुते त्वङ्कायहृदयायेतिनमो
युक्तंकनीयसि अंगुष्ठेनन्यसेदितिशेषः उकारेप्रणवादेविवेंडविंवसमायुते स्वत्वङ्कायततोवाच्यंशिरसेतदनंतरं स्वाहायु
क्तंप्रविन्यसेत्तर्जन्याऽनामिकांगुलौ उकारंप्रणवादेविविंडलांछितमस्तकं श्रीवज्रायततोवाच्यंशिखायैवततःपरं वष
डंतेप्रविन्यसेन्मध्यमामध्यमांगुलौ मात्राद्वादशिकातारात्विंडपाशयसंयुता कवचायहुमन्तातत्तर्जन्यामध्यनामयाश्चा
13 कारादिविसर्गान्तेयोजयेत्प्रणवात्परे अस्त्रदत्तपमायेवअस्त्रायततदनंतरं फडन्तंवसमायुक्तंविन्यसेत्तलयोर्द्वयोरितिस
ह्रएवोक्तः अत्रतएवनमःस्वाहादीनांहृदयादिपदयोगेनैवाभिधानं नांगुलादियोगेन अन्यथातदप्यभिधीयेतन्त्रन्यायात्
षडंगमंत्राणां वासनातुगौतमीयेईज्यमानोहृदात्माऽयंहृदयेस्याच्चिदात्मकः क्रियतेतत्परत्वेनहृन्मंत्रेणाततःपरम्
सर्वेत्ताद्विगुणोपेतंगेसंविद्रूपेचिदात्मनि क्रियतेविषयाहारःशिरोमंत्रेणधीमता हृत्त्रिकोणत्रयविद्यामयताभावनाद्दृढा
क्रियतेनिजदेहस्यशिखामंत्रेणसादरं मंत्रात्मकस्यदेहस्यमंत्रवाच्येनतेजसा सर्वतोवर्ममंत्रेणक्रियतेऽनन्यसंहृतिः प १३

ददाति परं स्नानं संविद्रूपे परात्मनि हृदयादिमयं तेजः स्यादेतन्नेत्रसंज्ञकं अध्यात्मकादिरूपं यत्साधकस्य विनाशयेत्
अविद्याजातमस्त्रं तत्परं धाम समीरितमिति करन्यासेऽङ्गुलिनियमो लिङ्गपुराणे तले मध्यमयोग्रहे तर्जन्याऽन्याङ्गु
लीश्च अंगुष्ठेन करन्यासं कुर्याद्देवविचक्षणः अत्र केचित् षडङ्गन्यासे नेत्रत्रयाय वौषडिति प्रयोगं वदन्ति तत्र प्रमाणम्
गपे वक्तृतत्त्व हृदयशिरसोः शिखायां कवचाद्यास्त्रेषु महद्वत्तथैभिरिति सारसंग्रहवचनात् षडङ्गविन्यासे मंत्री
हृच्छिरश्च शिखा ततः कवचं नेत्रमस्त्रं चेति दक्षिणामूर्तिवचनात् हृदयं च शिरो देवि शिखा च कवचं ततः नेत्रमस्त्र
मेतद्धेनमिति ज्ञानार्णववचनाच्च वक्त्रैकवचनस्यैव दर्शनान्नेत्रायेति तन्ते अतएव च पविपञ्चमनलारूढं कमस्त्रा
लेगोपशान्तिके केवलः शंकरः स्यान्नेत्रसंज्ञकं पश्चिमाम्नाये अजितजवामृताधारसंस्थितेषोद्देशे ततः धरेल
णे केवले दद्यान्नेत्राय स्वदतेर्पदं तदन्ते वौषडित्युक्तं नेत्रमंत्रोऽयं प्रयुक्त इति नारदपंचरात्रे स्फुटमेवोक्तः अन्यथा हि ने
त्रदेवतापदेनेत्राभ्यामिति पदान्तरप्रक्षेपापत्तेः प्रपंचसारे मदीयादितो मन्त्रमिमं प्रतिजप्यमिक्षन्तुकुर्यान्निजेन वपुषैव
तयोगपीठे अंसोरुयुग्मपदमाननाभिमूलपार्श्वहृदये विहितमात्रमसूक्ष्मलं च मध्ये नेतावपि रपिसन्नानात्मादिकै
र्यजेन्मंत्री पीठाख्यमेवं पश्चिममिति शानननाथामपार्श्वनाभिमूलदक्षपार्श्वैरिति पद्मपादाचार्याः आधाराख्यापङ्के
कर्णिकिं हृद्हृदयेंऽसे च दक्षिणे धर्मं ज्ञानं च सव्यांसेऽरुवौ वामान्ययोरपि वैराग्यसंज्ञमैश्वर्यमिति अनेन्ताद्यैरित्या

ग. सू.प. १४

द्विपदेनपद्मसूर्यसोमवह्निसत्त्वरजस्तमआत्मान्तरात्मपरमात्मज्ञानात्मनोग्रहणे सारसेग्रहे मूलाधारेमंडूकेतद्रुहदे
कालाग्निसेतके स्वाधिष्ठानेयनाम्ब्रजेप्रकृतिंमूलपृथिविंको आधारशक्तिंहृदयेविन्यस्यमन्त्रवित्तमः कूर्मानन्तौवराहे
वधरणीवसुधार्णवे रत्नद्वीपेचविन्यस्यतत्रस्वर्णमहीधरे तदूर्ध्वेनंदनोद्यानेतन्मध्येमणिमंडपे कोटिसूर्यप्रभेहेम
प्राकारपरिवेष्टिते रत्नमंडपमध्यस्थोवेदिकोहेमनिर्मितो विन्यस्यतस्यामध्यस्थेरत्नसिंहासनेशुभे रत्नद्वीपे०
नवरत्नमयेद्वीपे· उक्तंचतंत्रराजे नवरत्नमयेद्वीपेनवखंडविराजिते पुष्पेनीलेचवैडूर्येविद्रुमेमौक्तिकेतथा ५
इशान्मरकतेवज्रेगोमेदेपद्मरागकं ईशात् ईशानकोणेमरकतखंडंयथोभवतितथा पश्चिमादिविलोमेननवर
त्नमयानिखंडानिमध्यात्रानिज्ञेयानीत्यर्थः तत्रैवरूरुजत्स्थापदले पश्चिमेपुष्परागेतत्संशाद्यावनरेनतत्क्रमात्
मणिमंडपेनारत्नमयेस्वर्णप्राकारवेष्टितेच अमृताब्धौमणिद्वीपेकल्पवृक्षवनोज्ज्वले स्वर्णप्राकारेद्वीमेस्मरेन्मा
णिक्यमंडपमितिदेवीयामलवचनात् तथा शरीरेस्वस्यधर्माद्यैःपीठकल्पनमाचरेत् दक्षिणांसेन्यसेद्धर्मंज्ञानं
वामांसकेन्यसेत् वामोरुमूलेवैराग्यमैश्वर्यंदक्षिणेन्यसेत् मुखेऽधर्मंवामपार्श्वेचाज्ञानंनाभिमंडले अवैराग्यंपद
तपार्श्वेचानैश्वर्यंन्यसेत्क्रमात् तथा शरीरेस्वस्यधर्माद्यैःपीठकल्पनमाचरेत् दक्षिणांसेन्यसेद्धर्मंज्ञानंवामांस
केन्यसेत् वामोरुमूलेवैराग्यमैश्वर्यंदक्षिणेन्यसेत् मुखेऽधर्मंवामपार्श्वेचाज्ञानंनाभिमंडले अवैराग्यंपदत्पार्श्वेचा

नैश्वर्यं न्यसेत्क्रमात् धर्मादीपीठपादेष्वाग्नेयादिष्वन्यान्प्रकल्पयेत् हृद्यन्ते न्यसेदासिन्मध्ये तत्कर्णिकोपरि अर्कं वके
सरे सोमे पत्रे वह्निं ततो न्यसेत् तेषां कला न्यसेत्तत्तन्मंडले तद्यनन्तरैः तद्वत्तत्तन्मंडलान्यासं समयपट्वेत्सर्थः वेशाहस्त्रव
कारार्थवाची तथा न्यसेद्गुणत्रयं पश्चात्सत्त्वादिक्रमतः परं आत्मान्तरात्मपरमात्मविज्ञानात्मकान्न्यसेत् ज्ञानमायाका
लाविद्यापरतत्त्वानि च क्रमात् पीठमंत्रं प्रविन्यस्य ततो देशिकसत्तमः देहात्मके ततः पीठे ध्यायेदिष्टां च देवताम् अ
गस्त्यसंहितायां महामेरुककालाग्निरुद्राभ्यां प्रणमाम्यहं आधारशक्तिकूर्माभ्यां नागाधिपतये तथा पृथिव्यै च
तथा क्षीरसागराय नमो नमः श्वेतद्वीपाय रत्नाढ्यकल्पवृक्षाय ते नमः स्वर्णमंडपमध्योद्भवकाय महार्हते विमा
नाय हरत्नाय सम्यक्सिंहासनाय च उग्रपदादित्यसंशोभितपद्माय तदनन्तरे नमामि धर्मज्ञानाभ्यां वैराग्याय ततः क्रमा
त् ऐश्वर्याय नमो धर्मोज्ञानाभ्यां सर्वतस्तथा अवैराग्याय च तथाऽनैश्वर्याय नमो नमः अमर्कमंडलायाहमपप्युप
रिसंवेद्य उं वेदमंडलायेति ध्यात्वा ध्यात्वा नमाम्यहं सवह्निमंडलायेति संस्थेव प्रयत्नतः सत्त्वाय रजसे नित्यं तमसेपि
नमो नमः विमलोत्कर्षिणी ज्ञाना क्रिया योगाभ्यस्तथापि नमामि प्रह्वी सत्याभ्यामीशानायै दलाग्रतो सर्वादितोनुग्रहाः
यै प्रणमामि तदन्तरे नमो भगवते तद्वद्विष्णवे तदनन्तरे सर्वभूतात्मने चैव निवासदेवाय तथापि ततः सर्वात्मसंयोगयो
गपीठात्मने नमः प्रणवादिनमोऽन्तोऽयं मंत्रः पीठात्मने नमः इति क्रमदीपिकायां आत्मादित्रयमादिबीजसहिते

षोमाग्निमायालवैर्ज्ञानात्मानं याहदिक्षु परितो मध्ये च शक्तीर्नव न्यस्त्वा पीठमन्त्रं वन्त्रविधिवत्तत्कर्णिकामध्यमे नित्यानंदचिति
प्रकाशममृतं सविन्नयेद्धाममतत् इति आदिवाजसहिते ० सविंडस्वीयस्वीयप्रथमाक्षररूपवीजसहिते षोमोहकारः अग्नीरे
रा० फः मायादीर्घईकारः लवोविंदुः एतैः सहज्ञानात्मानेभुवनेश्वरीवीजसहिते ज्ञानात्मानमित्यर्थः नित्यानंदचितिप्रकाशे
पू० प० अविनाशचैतन्यस्वप्रकाशरूपे अमृतेमक्षस्वरूपे ततोमंत्रपुटितमातृकान्यासउक्तः क्रमदीपिकायाम् पुटितैर्मनु-
१५ नाथमातृकार्णैरभिविन्यस्यविंडभिः पुरोवत् इति सारसंग्रहेपि ततोमंत्रपुटैर्वर्णैर्मातृकायाः सविंडभिः विन्यसेन्मंत्र
वित्सम्यकपाशरहेनकर्मणेति अथमूलमंत्रन्यासः रुद्रयामले प्राणायामत्रयंकृत्वा मूलमंत्रेणसाधकः विन्यसेदृ
ष्यिच्छंदोदेवतानियथाविधि करांगन्याससंयुक्तो न्यासानन्यान्समाचरेत् ततःकल्यादिनान्मंत्री ततोमुद्राःप्रदर्शयेत् अग
15 स्त्यः न्यासंसम्यकप्रवक्ष्यामिमनोः सर्वफलप्रदम् न्यासंविनाजपंप्राहुरासुरंविफलंबुधाः ऋषिर्ब्रह्मास्यमंत्रस्यगायत्रंछं
दउच्यते श्रीरामाख्येपरेधामदेवतापरिकीर्तिता आद्यंवीजंनतिःशक्तीरामायेतिचकीलकं ऋषिर्गुरुत्वाच्छिरसैवधार्य-
श्छंदोऽक्षरत्वाद्रसनागतंस्यात् धियावगंतव्यतयासदैवहृदिप्रतिष्ठामनुदेवतायाःवीजंसगुह्यंभवतीतिगुह्येनतिःपदो
र्मोधवसंश्रितत्वात् अथवावीजशक्तीस्तः स्तनयोहृदिकीलकं शिरोभ्रूमध्यहृदयनाभिगुह्यपदस्थले मूलमंत्राक्षरै-
र्न्यासोऽत्रन्यासः सउच्यते सर्वांगमपिसर्वेणमंत्रेणापिप्रविन्यसेत् इति प्रपंचसारे विन्यस्येदेवंमंत्रीमंत्रवर्णात्म १५

कोहरिः मंत्रतंत्रप्रकाशे विन्यसेद्वर्णमेकैकं विद्धनेठवेष्टिते इति ठवेष्टितं प्रणवपुटितमित्यर्थः नारदपंचरात्रे पंचे
न्यासे पुराकृतादाकरयोर्विग्रहे ततः मूलमंत्रादि सर्वस्य न्यस्तमंत्रगणस्य च मुद्राः प्रदर्शयेत्तस्य ध्यानमंत्रसमन्विताः ततस्त
द्विग्रहे ध्यायेद्दानेदं विश्वरूपिणं मामंप्रदे ततः स्वोपास्यमंत्रस्य न्यासान् ऋष्यादिकान्न्यसेत् यस्य मंत्रस्य ये न्यासाः कर्तव्याः
सिद्धिमिच्छता श्रागल्पः तन्मूर्तिपंजरन्यासे सर्वस्मिन्मूर्तिसिद्धये आकर्णयैकचित्तः सन् यतोऽस्ति न फलान्तरे नमो भग
वते ब्रूयाद्वासुदेवाय इत्यथ ॐमादेरस्य मंत्रस्य आदायैकाक्षरे ततः एकैकमक्षरे तद्वच्छ्रीरामाख्यमनोरपि द्विरावृत्तात्
गादाने विष्णोर्द्वादशनामसु नामैकैकमथादाय सर्वेषामपि च नामसु ॐ ततश्च स्वरस्तद्वद्वासुदेवाक्षरे ततः श्रीराममंत्र
वर्णांश्च ततः स्युः केशवादयः धात्राद्यो नमोन्ताश्च न्यस्तव्या न्यासयोगतः ललाटनाभिहृदये कंठपार्श्वांसकंधरे
पार्श्वांसेंसस्कंधेष्वपृष्ठेककुदि च क्रमात् केशवश्च ततो ब्रूयान्नारायण इति स्वयं माधवश्चैव गोविंदो विष्णुश्च मधुसूदनः
त्रिविक्रमो वामनश्च श्रीधरो नवमः स्मृतः हृषीकेशः पद्मनाभस्तथा दामोदरः प्रभुः विष्णोर्द्वादशनामानि विमानि स्मृतानि सप्त
म धातार्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा विवस्वदिंद्रौ पूषा च पर्जन्यो द्वादशः स्मृतः तथा च विष्णुरित्येव नामानि
द्वादशात्मनः तन्मूर्तिपंजरन्यासोऽभिहितः परमेष्ठिना सकृन्न्यासाद्भवेन्मंत्री राममूर्तिरनुत्तमः क्रमदीपिकायाम्
स्मृतं येऽथास्य मंत्रस्य कीर्तये मूर्तिपंजरं आर्तिग्रहविषारिघ्नं कीर्तिश्रीकांतिवर्द्धनं केशवादियुगषड्कमूर्तिभिर्धातृपूर्वे

रा.
पू. प.
१९

16

मिहिरात्रमौंतिकान् द्वादशान्तरभवान्तरैः स्वरैः क्लीववर्णरहितैः क्रमात्र्यसेत् भोलोदरहृद्गलकूपतलेवामेतरपार्श्वस
ज्जानगले वामत्रयपृष्ठककुत्स्तथा मूर्द्धन्यन्नपष्ठगवर्णमेत चैतन्यामृतवपुरर्ककोटितेजा मूर्द्धे स्त्रावपुरारविलेसवास
देवः श्रीधस्समविमलपाघसीवसिक्केव्याप्नोति प्रकटितमेत्रवर्णकीर्णमिति चैतन्येतिमेवामृतेनदेववपुर्यस्समतया
यद्वा चैतन्यं स्वप्रकाशं ज्ञानेनामृतेन स्त्रवे तथा च स्वप्रकाशानेदन्नपश्रस्यार्थः अथवा चैतन्यं ज्ञानेनेनयदमृतं मोदस्तन्देव
वपुर्यस्समतया रामार्चनवेदिकायां वक्ष्येऽहमिंद्रियन्यासमिंद्रियाणां विशुद्धये यथा सम्प्राप्यते रामो देशिकेंद्रेण धीमता
न्यासः प्रयोगे स्पष्टीकरिष्यते सारसंग्रहे अथर्ष्यंगकरन्यासोस्ततो मुद्राः प्रदर्शयेत् आवाहन्याः महामुद्रा तथैव च शंखच
क्रगदापद्मधेनुकौस्तुभगारुडाः श्रीवत्सवनमालाख्यायोनिमुद्राः प्रदर्शयेत् धनुर्वाणकपिमुद्राश्चेति श्रीकुलार्णवे आग
मोक्तेनमार्गेणन्यासान्नित्यंकरोतियः देवताभावमाप्नोति मंत्रसिद्धिश्चजायते योन्यासकवचच्छन्नोमंत्रंजपति तंप्रिये दृष्ट्वा
विघ्नाः पलायंते सिंहं दृष्ट्वा यथा गजाः अकृत्वान्यासजातं यो मूढात्माकुरुते जपं विघ्नैः स बाध्यतेनूनंव्याघ्रैर्मृगशिशुर्यथा
कालिकापुराणे न्यासानां प्रचुरत्वेहि फलानामपि भूरिता उक्तन्यासो न हि न्यासः सतताधिकं तत्समाचरेत् उक्तरतंत्रे वाग्भवस्य
द्वितीयेनकामराजेनभैरव मुद्रायांवेधनेकार्ष्येमूलमंत्रेणदर्शने परित्यागस्तु मुद्रायां तारावीजेन चाचरेत् मोतादिचेद्
विंदुभ्यां षष्ठस्वरसमन्विते तारावीजमितिप्रोक्तमिति मात्रादिरिहेकारः अस्यन्तु गमे सारसंग्रहे ध्यानेकृतेततो मंत्रीतन्मकल्प्या १९

क्रवर्त्मना ध्यानमात्मेष्टदेवस्य वेदने मनसा मतं तदपि द्विविधं प्रोक्तं सगुणं निर्गुणं तथा आत्मनो हृदयाम्भोजे कर्णिकाके
सरोहुले प्रफुल्ले सोमसूर्याग्निमण्डलेन विराजिते स्वीयेष्टदेवतां तत्र ध्यायेदागमबोधितां एवं यद्वेदनं तद्धि सगुणं ध्यान
मुच्यते यज्जीवब्रह्मणोरैक्यं सोऽहमस्मीति वेदने तदेव निर्गुणं ध्यानमिति ब्रह्मविदो विदुः ध्यानेन प्रयोगेव दाने फल
कारिणीतंत्रे आराध्य मनसा भक्त्या वासनापूजनं यथाचरेत् गौतमीये पूजां वमानसीं कृत्वा ततोऽर्घ्यं स्थापनं चरेत् सार
संग्रहे ध्यानान्तरं पूजेत्पीठं मानसमार्गेण मंत्रवित् तस्मिन्पीठे स्थितामिष्टदेवतामुक्तविग्रहां ध्यानात्पूजेत् देवनाद्यैर्मा
नसैर्भोजनान्तिकैः भोजनावसरे चान्ते वैश्वदेवं समाचरेत् मूलाधारे स्मरेत्कुण्डे ऊर्ध्वस्याग्निसमुज्जले आत्मान्तरात्मपरमज्ञा
नात्मचतुरस्रकं धर्माधर्मादिनेतनं च मूलमंत्रपुरःसरं अमेज्जुहोमि स्वाहेति प्रत्येकं जुहुयात्ततः अहंतामसत्पैशुन्य
कामक्रोधादिकं हविः मन एव स्रुवः प्रोक्तः सुषुम्ना स्रुगुदीरिता तदन्ते तन्मयीभूत्वा यथाशक्ति जपेन्मनुं तज्जपं सर्वमे
तस्यै देवतायै निवेदयेत् जपनिवेदनमंत्रस्त्वग्रे वक्ष्यते लक्ष्मसागरे इत्थं जपं यथाशक्ति कृत्वा देवि समर्पयेत् गुरुं प्रणा
म्य विधिवत्पूजावर्कं समाहरेत् सिद्धेश्वरीतंत्रे प्रणम्य श्रीगुरुं भक्त्या साधकः कुंकुमादिभिः स्वर्णादिरचिते पीठे पूजाव
र्कं समाहरेत् संस्थाप्य पुरतो देवि शुभे पीठे मनोरमे दर्पणं ज्योतिर्जलितं च मूलमंत्रेण साधकः 'दक्षिणामूर्तिसंहितायां
श्रीविद्याचक्रं श्रीविद्याश्रीपर्णीसंभवे पटे वर्कं संस्थापयेद्देवि नान्यत्र वरवर्णिनि सौवर्णे राजते ताम्रे स्फटिके वैद्रुमे तः

(अथ यन्त्रनिर्माणसंस्कारविधिः)

या चक्रेयथोक्तविधिनापूज्यादेवीनरोत्तमैः दक्षिणामूर्तिकल्पे गंडकीभवपाषाणेस्वर्णेरजतताम्रयोरिति रत्नसा
रा॰ पू॰ प॰ १७ गरे यावज्जीवंस्वर्णेस्यात्पूज्याद्वाविंशतिंप्रिये ताम्रेद्वादशकंवर्षंतदर्द्धंभूर्जपत्रके सारमेयग्रहे ताम्रेद्वादशकंवर्षंस्फा
टिकादौतुसर्वदा तेषांमध्येस्फाटिकंतुसर्वसिद्धिप्रदंभवेत् भूमौसिद्धरजसारचितेसर्वकामदे स्वर्णरचितेयंत्रे
सर्वराजवशंकरे रजतेनकृतेयंत्रमायुरारोग्यकामदे ताम्रेविरचितेयंत्रेसर्वैश्वर्यप्रदंमतं यंत्रेहिस्फाटिकेदेविमनोभि
लषितप्रदं माणिक्यरचितेयंत्रेराज्यदंमुक्तिदंमतं गोमेदरचितेयंत्रेसर्वैश्वर्यप्रदंमतं लक्ष्मेमरकतेयंत्रेसर्वशत्रुविना
शने लोहत्रयोद्भवेयंत्रेसर्वसिद्धिकरंमतं लोहत्रयविभागंतुकथयामितवानघे भागादशस्वर्णस्यरजतस्यषो
17 डश ताम्रस्यरविभागेनपीठंकुर्यान्महेश्वरि तस्मिन्पीठंतुनिर्माणेपूजाचक्रस्यकारयेत् शांतिदंपुष्टिदंप्रोक्तंसर्व
शत्रुनिवर्हणे आयुरारोग्यजनकंकांतिदंपुष्टिदंमतं नेत्रराज्ये सीसकांस्यादिभिःपुनः पूर्वोक्तविपरीतंस्यात् फल
कायोपटेभित्तौस्थापयेन्नकदाचन विशेषविध्यभावेनलिखितमित्यर्थः स्थापनेयदिमोहेनलोभेनाज्ञानतोपिवा
कुलेविनैवसम्पदंनिर्मूलेयातिसर्वथा कुलमूलावतारे चतुरंगुलविस्तारेशाकाशदक्षिणोत्तरे पलप्रमाणेकर्त्त
व्यमर्च्चापीठंमनोहरं यवार्द्धोच्चप्रकुर्वीतचतुरस्रंसमंततः तस्मिन्पीठेवनिर्माणेपूजाचक्रस्यकारयेत् सौवर्णमणिते
त्रे ऋजुरेखाभवेल्लक्ष्मीर्वक्ररेखादरिद्रता लक्ष्मसारे चतुरंगुलहेमस्यरजतस्यतथैवच ताम्रस्यपर्वंसंख्येवमा १७

णिकादौ पद्येकया अष्टाविंशत्यंगुलविस्तारस्त्र्यंगुलायाम इत्यर्थः पलैर्विंशत्युत्तरत्रिंशतानवजापरिमिते अंगुलविस्तारस्तु मानो
न्तरांगुलमानेन वेदिकापीठशिविकारथ्यादीनां विधिः पुनः मानान्तरांगुलेनैव भवेत्रान्येनकेनचिदिति महाकपिल
पंचरात्रवचनात् पूजाचक्रस्य पीठस्य शाखाव्यत्वात् मानान्तरांगुलेन विन्यस्तैस्तिर्यग्रेखाभिर्यवैर्मानान्तरांगुलेशालिभिर्वा
ऋजुन्यस्तैस्त्रिभिर्मानान्तरं भवेदिति कपिलपंचरात्रोक्तेस्तेये तन्त्रराजे चक्रे देव्यो जन्याशीर्षे प्रतिष्ठाविधिर्विशेषोच्यते साव
न्तरविदा कार्या संप्रदायानुरोधिना चक्रे पूजाचक्रे देव्यां देवीमूर्तौ देवीत्युपलक्षणेनेन स्वेष्टदेवतामूर्तौ संप्रदायानुरो
धिना नित्यनैमित्तिकोपास्तिनिरतेन तथाक्षिरैः शुभग्रहोपेतैः नक्षत्रे गुणशालिनि मुहूर्ते कारयेदिति तथा दौग्ध्रा
ज्यपंडगव्यैः प्रथमं नालिकेराम्भसा ततः अभिषिच्याथ तोयेन कथितेनाष्टौषधैः आवाह्याभ्यर्च्य तत्रस्थं चक्रे संस्थाप्य प्र
जयेत् गंधैः पुष्पैः नैवेद्यैः धूपैर्दीपैर्नैवेद्यैस्तर्पणैः त्रिरात्रं पूजयेद्देवीमिति तथा एवं दिनत्रयं कृत्वा ततो नित्यक्रमं भजेत्
१८ एवं देवीप्रतिष्ठायाः क्रमः सान्निध्यकारकः इति देवीप्रतिष्ठायामित्युपलक्षणमस्तेन स्वेष्टदेवताप्रतिष्ठायामित्यर्थः लदः
सागरे आदौ वेदादितो मंत्रैरुत्तारणमाचरेत् धातुनिर्मितचक्राणां मूर्तीनां च विशेषतः अग्न्युत्तारणप्रकारः प्रयोगे
वक्ष्यते स्कंदयामले आदौ विरच्य षट्कोणं तन्मध्ये बीजमालिखेत् तद्बीजं नरधः साध्यं साधकाख्यानमूर्ध्वतः
कर्ममध्ये समालिख्य देवि तस्यार्थयोः क्रियां रमाबीजेन वतस्यान्तस्ततस्तं वै वेष्टयेत्ततः संमुखाभ्यां तु ताराभ्यां कोणेषु गम

(इतिमूलवाक्यानि ।

न्नृहिविन षट्कोणपार्श्वयोर्मायाश्रीवीजेः ग्रेषु मन्मथं षट्संधिषु वह्नेर्वीजं ततः सर्वं वेष्टयेन्नतः वाग्भवेन वहिः पद्ममष्टपत्र
रा. सकेसरं केसरेषु स्वरान्वर्गान्स्त्रेषु विलिखेत्क्रमात् पत्राग्रेषु लिखेन्मालामंत्रवर्णान्तदन्मितान् पंचवोल्पदलेवाह्ये
पू.प. पुनरष्टदलांबुजे तत्केसरेषु श्रीवीजं दलेष्वष्टाक्षराणि च नारायनमनोवाह्ये पद्मे द्वादशभिर्दलैः तत्केसरेषु वक्ता
१८ रिवत्तादि विलिखेत्क्रमात् अकारादिलकारान्तान्मातृकार्णान्सविंडकान् शिष्टानन्येतद्दलेषु विलिखेत्परमेश्वरि वा
स्वदेवमनोर्वर्णान्द्वादशैकैकशः क्रमात् वहिः षोडशपत्राब्जे मायावीजाग्रकेसरं ततस्त्रेषु च वर्गांस्त्व हृदंतो द्वादशार्णं
कान् विलिखेत्संधिषु च वायुश्चादिवीजकान् द्वात्रिंशद्दलसंयुक्तं पद्मं कृत्वा ततो वहिः तन्मूलेषु लिखेत्क्लींमारश्री
वीजकानि च रामानुष्टुभमंत्रार्णान्नृसिंहानुष्टुभवर्णकान् दलेष्वेकैकशो देवि विलिखेत्तदनंतरं पत्राग्रेषु च मंत्रस्तोत्र:
षडिमन्तरद्वयं वहिर्भूपुरमालिख्य वज्राष्टकविराजितं नृसिंहवीजं तद्वद्वाराहं कोणकेषु च लिखेत्क्लीं रामयंत्रं हि सर्वं
पंचोत्तमे प्रिये साधिते जपसंख्याभ्यां होमसंपातकैस्ततः हुतेशीरसिवा वाहावाग्रारोमपदं नृणां रत्नाकरं महेशानि महद्दे
स्वर्यं वहते वंध्यानामपि नारीणां पुत्रदं सर्वदं परं भुक्तिमुक्तिप्रदं चैव गोपनीयं सुरेश्वरि यस्मै कस्मै न देयं वा त्रिषु लोकेषु ड
हीभं किं वहूक्तेन देवेशि सर्वदं नात्र संशयः अस्यायमर्थः षट्कोणं कृत्वा तन्मध्ये श्रीरामवीजं विलिखेत्तदधः साध्यनाम
द्वितीयांते विलिख्य वीजसोर्ध्वं साधकनाम षष्ठ्यन्तं संलिख्य वीजपार्श्वयोः ॐ हृदयं लिखित्वा वीजमध्ये श्रीवीजं विलिखेत्तत्सर्वं १८

18

मन्त्रोन्याभिमन्त्रणवाभ्यां संवेष्ट्य षट्सु कोणेषु षडङ्गमन्त्रानालिख्य षट्कोणपार्श्वयोर्वामे मायां दक्षिणे श्रीवीजं च विलि
ख्य तत्कोणाग्रे कामवीजं विलिख्य षट्कोणं संवेष्टयेत् बहिर्वीजमालिख्य तद्बहिर्वृत्तत्रयं संतत्य रजसा मोहयेत् कृत्वा तन्मध्यवी
थ्यां वाग्भववीजानि निरन्तरं वृत्ताकारेण विलिख्य तद्बहिरष्टदलं कृत्वा तत्केसरेषु द्वंद्वशः षोडशस्वरानालिख्य त
द्दलेषु कचटतपयशलाख्यानष्टवर्गानालिख्य तदग्रेषु ॐ नमो भगवते रघुनंदनाय रक्षोघ्नविशदाय मधुरप्रसन्न
वदनाय अमिततेजसे बलाय रामाय विष्णवे नमः इति मालामन्त्रवर्णान् षट् समालिख्य तिर्यग्वर्णानालिख्य तद्ब
हिः पुनरष्टदलमालिख्य तत्केसरेषु श्रीवीजं पत्रेषु नारायणमन्त्रस्याष्टाक्षराणि विलिख्य तद्बहिर्द्वादशदलं क
मलं कृत्वा तत्केसरेषु मातृकार्णेष्वन्तरस्वरान्वालिख्य अग्रे इति मे षट्दूर्णानालिख्य तद्दलेषु वासुदेवमन्त्रस्य ॐ नमो
भगवते वासुदेवायेत्यस्य द्वादशार्णानेकैकशो विलिख्य तद्बहिः षोडशदलपद्मं कृत्वा तत्केसरेषु मायावीजं प्रतिकेस
रं विलिख्य तद्दलेषु वासुदेवद्वादशाक्षराणि द्वादशदलेषु अवशिष्टदलचतुष्टये यं हुं फट् नमः इति विलिख्य तद्दला
न्तरेषु हन्त्र मदायहृकष्टछ्यायहृकयोनी मायाद्यक्षराणि सविंदुकानि वीजानि विलिख्य तद्बहिर्द्वात्रिंशद्दलपद्मं कृत्वा
तत्केसरेषु मायावीजं कामवीजं श्रीवीजं चैतत्त्रयं प्रतिकेशरं विलिख्य तद्दलेषु रामभद्र महेष्वास रघुवीर नृपोत्त
म दशास्यान्तक मां रक्ष देहि दापय मे श्रियम् इति द्वात्रिंशदक्षरा मन्त्रवर्णान् उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखं

नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं इति नृसिंहानुष्टुभो वर्णाश्चैकैकशो विलिख्य पत्राग्रेषु वषट् अस्य दलस्य हृदयं प्रणवं ग्रं
ॐ. विलिख्य· तद्बहिश्चतुरस्रहृदये वज्राष्टकेनेष्टकान्तं तद्दिक्षु श्रौमिति नृसिंहवीजं विदिक्षु ह्रुमिति वाराहवीजं लिखेदिति
१९ वज्रलक्षणं नानार्णवे वालायंत्रोद्धारे ऽस्के ग्रंथी स्नग्प्रणवाभ्यां तत्स्मृष्टतेन कारयेत् ग्रंथयः कुलिशाग्रेयाः प्रणवै
रथसङ्ग्रन्ते इति सारसंग्रहे दक्षनश्वरसुगेवमारवीजे विलिखेत् साध्यसमन्वितं च वीजे हतसिद्धमण्डवर्णैकैकशो शि
ष्टेस्लदमदशान्तरमेत्रवर्णवीजे षट्पिवहृदयायमध्यकोणे विलिखेत् शक्तिरमे च कोणपार्श्वे कवचमनमयोर्लि
गुलिभिर्जपेत् अंगुष्ठेनविनाजप्तंविफलंभवतिप्रिये पर्वभिर्वांगुलीनांतज्जपेदनुदिनेप्रिये मध्यमानामिकामध्य
पर्वद्वयमिहप्रिये मेरुंप्रकल्पयेत्कुर्वन्प्रदक्षिणमनुक्रमात् अनामामूलपर्वादिकनिष्ठानुक्रमेण तु तर्जन्यग्रादि
तोदेवि मध्यामूलावसानकं गणयेद्व्युत्क्रमेणैवं किंचित्संकोचयेत्तले अंगुलीर्नैवियुंजीतजपकालेमहेश्वरि अंगुली
नोवियोगेतच्छिद्रेषुस्रवतेजपः उल्लंघ्यगणनांदेविनमेरुंप्रजपेत्क्वचित् यतस्तज्जपमीशानिबलाद्धरंतिराक्षसाः
अथवामध्यमामध्यमूलपर्वद्वयेप्रिये मेरुंकृत्वाजपेद्देवितर्जनीमूलकावधि अनामामध्यपर्वादिप्रादक्षिण्यक
मेणैवइति अंगुलिजपोरेखाजपःपर्वजपश्चेतित्रिविधःकरमालाजपःतत्रकनिष्ठाद्यंगुष्ठपर्यंतंपुनःपुनर्ग
णनांगुलिजपः कनिष्ठाद्यंगुलिगतरेखाभिर्जपोरेखाजपः पर्वजपस्तुप्रोक्तलक्षणएव जपकालेनिषिद्धं
वायवीयसंहितायां उष्णीषीकंचुकीनग्नोमुक्तकेशोगलावृतः अपवित्रकरोऽशुद्धःप्रलपन्नजपेत्क्वचित् असं
वृतौकरौकृत्वाशिरसिप्रावृतोपिवा विनाव्याकुलचित्तोवाशक्तोऽस्थितएववा रथ्यायामशिवस्थानेनजपेत्ति
मिरांतरे उपानद्गूढपादोवायानशय्यागतस्तथा प्रसार्यनजपेत्पादावुत्कटासनएववा विन्नेपादस्थवालस्याज्ज
पहोमार्चनातरा उतिष्ठतितदास्यास्येषडंगोविनस्येत्पुनः अपवित्रकरइति पवित्रंकुशः अस्त्रीकुशंकुथोदर्भः
पवित्रमित्यमरकोशात् विनादर्भेणयत्कर्मविनासूत्रेणवापुनः राक्षसंतद्भवेत्सर्वंनेहामुत्रफलप्रदमिति

कर्मोपुराणवचनेनतस्यावस्यकताभिधानात् सूत्रेयज्ञोपवीते लघुहारीतः जपेहोमेतथादानेस्वाध्यायेपितृत
ग० र्पणे अशून्यंतुकरंकुर्यात्सुवर्णरजतैःकुशैरिति नग्नइति नग्नमहोरात्रिः नग्नोमलिनवस्त्रः स्यान्नग्नश्चार्द्धप
सू०प० टःस्मृतः नग्नोद्विगुणवस्त्रः स्यान्नग्नोरक्तपटस्तथा नग्नश्चस्यूतवस्त्रः स्यान्नग्नः क्लिन्नपटस्तथाद्विकच्छोऽनुत्तरी
३९ यश्चनग्नश्चावस्त्रएवच भविष्यपुराणे द्विकच्छः कच्छशेषश्चवहिः कच्छस्तथैवच एककच्छः कच्छस्त्रमोनग्नः
पंचविधःस्मृतः देवलः वहुवासाभवेन्नग्नोनग्नःकौपीनवासमेति प्रौढपादमाहकात्यायनः आसनारू
ढपादस्तुजानुनोर्जंघयोस्तथा कृतावसक्थिकोयस्तुप्रौढपादःसउच्यते वाचनिकातिरिक्तस्थलेप्रौढपा
39 दनिषेधोज्ञेयः मंत्रतंत्रप्रकाशे उक्तनियमानभिधायशक्तावेवंसर्वमेतत् शक्तः शक्तितोजपेदित्युक्तम् फे
त्कारिणीतंत्रे यथाशक्तिजपंकृत्वाप्राणायामत्रयंचरेत् नारदपंचरात्रे जपंतदनुकुर्वीतयथाशक्त्यास्तु
तादिकं निवेदयेद्विभोस्तेचवाक्कर्ममनसान्विते ॐपुंडरीकाक्षविश्वात्मन्मंत्रमूर्तेजनार्दन गृहाणमेजपंता
वममदीनस्यशाश्वत इत्युक्त्वार्घोदकंपुष्पंकृत्वादक्षिणपाणिनामे अग्रतोनिक्षिपेद्विप्रोमूलमंत्रेणनारद
मंत्रात्माभगवान्विश्वरविशान्तिहिदोभवेत् शैवागमे इत्थंजपंसमाप्याथघंटावादनपूर्वकं स्तुवीतस्तु
तिभिःसम्यक्तापकोभक्तिसंयुतः उत्तरतंत्रे पौराणिकैर्वैदिकैश्चमूलमंत्रेणचैववहिः प्रदक्षिणप्रणामं ३९

वकुर्याद्धर्मोर्थसाधके ततः क्षमापयेन्मंत्रैर्वक्ष्यमाणैर्महेश्वरी क्षमापनमंत्राः प्रयोगे वक्ष्यन्ते अत्र पौराणिकै
र्वैदिकैरिति चैवर्णिकपरं मूलमंत्रेणेति शूद्रपरं ज्ञेयं शूद्राणां पौराणिकादिपाठे निषेधात् तदुक्तं कालिकापुराणे
मोहाद्वा कामतः शूद्रः पुराणं संहितां स्मृतं पठन्नरकमाप्नोति पितृभिः सह पापकृदिति पंचरात्रागमेतु श्रवणे
पिनाधिकारः तदुक्तं नारदपंचरात्रे ब्राह्मणक्षत्रियविशां पंचरात्रं विधीयते शूद्रादीनां न तच्छ्रोत्रपदवीम
धिरोहतीति अथ द्वात्रिंशदपराधाः वाराहपुराणे तिर्यक्पुंड्रधरो भूत्वा १ अकृत्वा दंतधावने २ याचितैः पत्र
पुष्पाद्यैर्यः करोति ममार्चनं ३ अप्रक्षालितपादस्तु प्रविशेन्मम मंदिरे ४ मम दृष्टेरभिमुखे तांबूलं चर्वयेत्तु यः ५
कौसुंभशाकं मत्स्यं यो भक्षयेन्मम सेवकः ६ एरंडकपालाशस्थैः पुष्पैः कुर्यान्ममार्चनं ७ ममार्चां वासुरे काले
यः करोति विमूढधीः ८ अवलोकितपक्वान्नं यन्मह्यं विनिवेदयेत् ९ अवैष्णवेषु पश्यत्सु मम पूजां करोति य : १०
अधूतं गुग्गुलं मर्त्यो मत्तु यो विदहेत यः ११ केवलेन हस्तेनैव धूपयेन्मां विमूढधीः १२ वामहस्तेन मां धृत्वा स्नपनं य
करोति यः १३ गुरूणां सन्निधौ मर्त्यो मत्पूजां विदधाति यः १४ वस्त्राभावे बलवातेन धूपं मह्यं निवेदयेत् १५
नखोदकेन स्नपनं ऊर्ध्वहस्ते मम मानवः १६ नीलरंजितवस्त्रं यो मर्त्यो मह्यं निवेदयेत् १७ नवप्रक्षालितं चैव जी
र्णं मह्यं निवेदयेत् १८ दिनान्तरितसिद्धान्नं मह्यं यो विनिवेदयेत् १९ अमानीयमलिनांगो मत्पूजां कुरुते तत्

यः २० वातसूत्रनिरोधेनमत्पूजांकुरुतेनरः २१ सकावानमनावम्य २२ तथाशाहृतसकेवले २३ पीठासनोपविष्टोवाप्र
रा॰ जयेद्यानिरासनः २४ भूताहमोर्नैकुरुतेनकभोजनमादरात् २५ परस्परिधानेयः परिधायार्चयेतमां २६ प्रसूत
पू॰प॰ गृहविप्रैशौसैभाष्यवकपालिने २७ सूर्यमयेधूपदहनेदीपंवकुरुतेर्चने २८ मत्पूजकीनकुरुतेत्रिकालार्चनवि
४० तेतपूजांवद्दामनी २९ मत्पूजकः शिवेद्विष्टेमङ्कोऽस्मनरायमः ३० कुद्धोयः कर्मकुरुतेत्रिकालार्चनविप्रकाल ३१
श्रेयकारेसूप्रेशान्मायः सैभाष्यवरजस्वलो ३२ महापराधान्जानीहिद्वात्रिंशान्वन्नमाम्यहं बुद्धिपूर्वमपराधेमस्यू
र्णोदोषः अज्ञानप्रमादकृतकदाचिद्ः परिहरकृतापराधवान्नतः कालियर्ममारे अपराधसहस्राणिस्त्रपराध
शतानिच पद्मैनैकेनदेवेशः क्षमतेहेलयाचितः तदभावेतुतुलसीमंजरीभिः प्रपूजयेत् तदुक्तंपद्मपुराणे
तुलसीमंजरीभिर्यः कुर्याद्धरिहरार्चने अपराधविनिर्मुक्तोमुक्तिभागीभवेन्नरइति गोविंदार्चनसूपायो
।।येऽर्चयंतिजगन्नाथंकरवीरैः सितासितैः चतुर्युगानिविप्रेंद्रप्रीतोभवतिकेशवः ।। ससितेपायसंविप्रैः स
र्पिषायस्समभ्यर्चते तस्यापराधदेवेशः क्षमतेविप्रवल्लभइति स्कंदपुराणे ।। कुंकुमारुणवर्णाभोगंधाढ्याश
तपत्रिका योददातिजगन्नाथेवैकुंठाच्यवतेनहि अगस्त्यहृदसंभूतैः कुसुमैरसितैः सितैः येऽर्चयंतिवदेवे
शंतैः प्राप्तेपरमेपदे मुनिपुष्पकृतामालांयेपश्यंतिजनार्दने तथाकदंवकुसुमैःप्रीतोभवतिकेशवः कौ ४०

मीपुष्पेनदेवर्षेप्रयच्छतिजनार्दने सुवर्णपलमेकंतुपुष्पेपुष्पेभवेन्मुने नरसिंहपुराणे मल्लिकापुष्पसहस्रा
जातिपुष्पंविशिष्यते जातीनामपिसर्वासांशुक्लाजातिर्विशिष्यते स्कंदपुराणे जातीपुष्पप्रदानेनगंधर्वैःसह
मोदते जातीपुष्पाष्टकेदत्वावह्निष्टोमफलंलभेत् जातिपुष्पसहस्रेणयथेष्टंगतिमाप्नुयात् श्वेतद्वीपमवा
प्नोतिलक्षपूजाविधायकः जातीपुष्पयुतांमालांकर्पूरपुटवासितां निवेद्यदेवदेवाययत्फलंप्राप्नुयान्नरः
नतद्वर्णयितुंशक्यमपिवर्षशतायुतैः सुवर्णकेतकीपुष्पंयोददातिजनार्दने कोटिजन्मार्जितंपापंदहते
गरुडध्वजः विष्णुरहस्ये बिल्वपत्राच्छमीपत्राज्जातीपुष्पात्सरोरुहात् वल्लभंतुलसीपत्रंकौस्तुभादपि
केशवः स्कंदपुराणे तुलसीपीठलीपद्ममुनिकादेवमल्लिकैः वाजिमेधायुतंपुण्यंसालग्रामशिलार्च
नात् दूर्वांकुरैर्हरेर्यस्तुपूजाकालेप्रयच्छति पूजाफलेशतगुणंसम्यगाप्नोतिमानवः दूर्वांकुरप्रदानेनवात
मीप्स्यतिरिक्तेकालत्रये तथावाक्यसाधनदीपिकायां अपामार्गःशमीदूर्वाभृंगोधात्रीचकुञ्जकः समेदेवे
नदेयानिनिद्राभंगकराणिषडिति इत्यपराधपरिहारायविशिष्टफलाप्तयेचपुष्पपूजाकार्या अथपूजा
यामशक्तानांपूजानुकल्पोऽगस्त्यसंहितायां आराधनासमर्थश्चेत्पादार्चनसाधने योदातुंनैवशक्नोतिकु
र्यादर्चनदर्शने विस्तारयतिदेवेशस्तंभवान्मुनिसत्तमः नैकंचयस्यसिद्धेतसोऽयोपात्यवनात्तथा यत्तु

रा०
पूप०
८१

भक्त्याप्रयत्नेनस्वयंसंपाद्यवाखिलै साधनैःक्रयणादिभिः समग्रफलंलभेत् योऽर्चयेद्धिधिवद्भक्त्यापरानीतैश्चसा-
धनैः पूजाफलार्द्धमेवास्यनसमग्रंफलंभवेदिति कृत्स्नाराधने अयाचितमशक्तेनदत्तंवाशीतिपूर्वकं साधनेयो
नगृह्णातिमद्द्रोहीभक्तकृत्स्नयोः अयाचितोपलब्धंयद्दत्तंवाभक्तशिष्ययोः नतत्फलविनाशायहरिपूजनसाध-
ने शक्तोवापदिवाऽशक्तः पूजाकालेविशेषतः अन्यानीतैर्हरेर्दत्वा नतत्क्षिपेत्स्वयंकृतविदिति शैवागमे अर्घ्य-
पात्रेसमस्तद्रव्यस्मलमर्घ्यमेवविन् साधुवासाधुवाकर्मयद्यदाचरितंमया तत्सर्वंभगवन्शंभोगृहाणा-
राधनेपरं इत्यर्घोदकमुत्सृज्यकिंचिद्देवस्यदक्षिणे करेसमर्पयेद्धिदानंकृत्वासमाराधनेशिवे शंभोइत्यत्र
सोपास्यदेवनामोहःकार्यः शिवेइतिपार्वतीसंबोधने श्रीकुलार्णवे कृतार्चनादिकंसर्वंसमर्पयेद्गुरःस-
रे इतःपूर्वादिमन्त्रेनादेवतायैसमर्पयेत् सारसंग्रहे वदेदितःपरंपूर्वंप्राणाद्बुद्धिंततोवदेत् देहधर्माधिका-
रेवतोजाग्रत्स्वप्नसुषुप्तीतिवदेद्देवस्याहमनसावाचावपदमनुचरेत् कर्मणावदहस्ताभ्यांपद्भ्यामुदरेण
व वदेच्छिश्नावयत्कृतंस्मृतंतेपतदनुचरेत् उक्तंवयत्कृतंतेनतत्सर्वंब्रह्मार्पणंभवतु स्वाहान्तममसंशोक्तोब्रह्मा-
र्पणमन्त्रमः मन्त्रःप्रयोगेस्यशौनकर्नेयः सनत्कुमारः उद्वासयेत्ततोदेवंपरिवारगणैःसह शिवरहस्ये र-
श्मिरूपामहेशस्यपूजितायाश्चदेवताः श्रीशिवाङ्गेविलीनास्ताः संतुसर्वंसुखावहाः इतिपुष्पाञ्जलिंदत्वा ८१

41

शणमपरिभावयेत् महेशाशिवस्थानेसोपास्यदेवनामोहः कार्यः देवसांगोविलीनेनदाक्षिहंदमशेषतः तेजो
रूपंशिवेध्यात्वादमसेतिपुनःपुनः तस्माध्यारोपयेत्स्वीयेहृदंभोजेमहेश्वरे गच्छगच्छपरेस्थानेस्वस्थानेपरमेश्व
र यत्रब्रह्मादयोदेवानविदुःपरमंपदं विसर्जनानेनमंत्रेणततः पूरकवायुना ध्यायेत्स्वमंत्रेणानेनततातेस्थाप
येहृदि तिष्ठतिष्ठपरेस्थानेस्वस्थानेपरमेश्वर यत्रब्रह्मादयः सर्वेसुरास्तिष्ठंतिमेहृदि विसृजेत्संहारमुद्रया
संहारमुद्रांवध्वायतेजोरूपंमहेश्वरीं विभाव्यपुष्पेणहृत्पवहत्कामाध्वनाशिवे प्रवेश्यद्वादशांतः स्थसः
हस्रारसरोरुहे विश्राम्यमध्यमानाड्यातमानीयहृदंबुजे संस्थाप्यसम्यक्संशप्यस्वात्मानेतन्मयंस्मरेदिति
हंसपारमेश्वरवचनात् कुलमूलावतरे पेशान्योमंडलेकुमाहारपत्रविवर्जिते विसर्जनार्थंनिर्माल्ययाः
णः पूजनायवै निक्षिप्यतस्मिन्निर्माल्यंमंत्रेणानुसमर्चयेत् देवमितिशेषः संमोहनपंचरात्रे विष्वक्सेनायनि
र्माल्यंनैवेद्यंचनिवेदयेत् रामार्चनचंद्रिकायां मत्स्यादीशानतः पात्रान्नैवेद्यादंशमुद्धरेत् सर्वदेवस्वरूपायपरायप
रमेष्ठिने श्रीरामसेनाधुर्यायविष्वक्सेनायतेनमः वामनोरामवेदसतीर्थ्यास्त्रिनेत्रंसमर्पयेत् शांतोशैवासहस्रां
शामन्यथानिःफलंभवेत् उत्तरतंत्रे ततोभास्करवीजेनसहितेनामनापुनः मंत्रेणभास्करायार्घ्यमाक्षिप्यार्घ्यंनि
वेदयेत् ॐ नमोविवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे जगत्सवित्रेशुचयेसवित्रेकर्मदायिने ततः कृतांजलिर्भू

तापठित्वा मंत्रमीरितं एकाग्रमनसा वाग्भिरच्छिद्रमवधारयेत् ॐ यत्तच्छिद्रं तत्पाच्छिद्रं यच्छिद्रं पूजने मम तः सर्वं तद
च्छिद्रमस्तु भास्करस्य प्रसादतः भास्करबीजं ह्रां ह्रीं सः अत्यन्तरं विजयमालिनीतंत्रे अर्घ्यं तोयेन देवेशि शिरां यं पंचाव शोधि
ते आलोड्य किंचिन्मूलेन मंत्रयेदष्टधा शिवे प्रोक्षयेत्तेन तोयेन स्वात्मानं मूलमंत्रतः निर्माल्यं मस्तके धार्यं मूलमंत्रेण
मंत्रिणा पाद्यपाद्योदकं देवि नैवेद्यं विभजेत्प्रिये तद्भक्तेभ्यः स्वयं भक्त्या तन्मयो विहरेत्सदा तत्फलं स्कंदपुराणे शंखो
दकं हरेर्मूर्ध्नि निर्माल्यं पादयोर्जलं गंधपुष्पादि शेषं च ब्रह्महत्याविनाशनमिति तत्तीर्थमेवने संप्रदायः सालग्रामशि
लातोयमपीत्वा यस्तु मस्तके धारयेन्मानवो मूढो ब्रह्महा स निगद्यते इति तीर्थपानफलं ब्रह्माण्डपुराणे प्रा
यश्चित्तं यदि प्राप्नोति कृच्छ्रो वाप्यघमर्षणं सोपि शुद्धिमवाप्नोति पीत्वा पादोदकं हरेः अपेयं पिबते यस्तु भक्ष्यं वा भो
ज्यभोजने अगम्यागमना ये वा पापाचाराश्च ये नराः तेपि पूता भवंत्याशु सकृत्पादांबुसेवनात् स्कंदपुराणे विल
यं यांति पापानि विप्रपादोदकेन वै किं पुनर्विष्णुपादोदं शालग्रामशिलाप्लुते पद्मपुराणे ये पिबन्ति नरा नित्यं सा
लग्रामशिलाजलं पंचगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनं पीत्वा पादोदकं विष्णोः प्राणान्यदि विमुंचते हत्वाय
मभटान्सर्वान्वैष्णवं लोकमाप्नुयात् नित्यपूजायां सैवैष प्रकारः प्रयोगो वक्ष्यते आगमः अंगैरात्मादिभिर्वा सदेवाय
वांगजादिभिः धूम्राद्यादिभिर्लोकपालैरस्त्रदसैर्वा यजेत्प्रभुं यद्वाङ्गैर्वा गुरुत्रयैर्ध्वजाद्यैश्च दिगाधिपैः तदस्त्रैश्च ४२

42

पजेदेवंसंदेपार्वां समीरिता अथनित्यपूजायामप्तिसंदेपेपियावत्सावश्यकीक्रियासंप्रोक्ताप्रपंचसारे अथपुनराचमगुरुःशाम्ब
दनोविष्टरोपविष्टः सन् प्राणायामंमालिपिन्यासंकृत्वाम्नमेनदृष्यादिकान्इति अतएवमात्रकांसृष्यादिकरांगन्यासान
भिधायोक्तं तत्रैवजपारंभेन्नांतसामामेयंप्रकल्पनेति इयंप्राणायामादिक्रियाप्रकर्षेणप्रकल्प्यतेअधिकार्यतेइति
प्रकल्पनाअधिकारसंपादनासामान्यासर्ववर्णसाधारणातेनेनेरेवसर्वेषांपूजाधिकारः अतएवैतेषामकरणेनिंदाश्रू
यते तडक्कमगस्त्यसंहितायाम् प्राणायामैर्विनायद्यत्कृतंकर्मनिरर्थकं अतोयत्नेनकर्तव्याः प्राणायामाः शुभाः
र्थिभिरिति दक्षिणामूर्तिकल्पे जपार्थंसर्वमंत्राणांविन्यासेनलिपेर्विना कृतेनत्रिःफलंविद्यात्तस्मादादौलिपिन्य
सेत् कपिलपंचरात्रे ऋषिछंदोदेवतानांविन्यासेनविनायदा जप्यतेसाधितोप्येषतंत्रतत्त्वफलंभवेत् गौतमीये
ध्यानेजपार्चनाहोमाःसिद्धमंत्रकृतापि अंगन्यासविहीनानदास्यतिफलान्यमी अतएवविधिहीनानुष्ठानेदोषमाह या
ज्ञवल्क्यः विधिहीनंतथाकर्मकरोत्यविधिनानरः फलंनकिंचिदाप्नोतिक्लेशमात्रंहितस्यतदिति उज्वरतेजे प्रवा
सेपथिदुर्गेवास्थानाशौचेजलेपिवा कारागारनिबद्धोवाभायोवशगतोपिवा मनोभयेसमस्तपत्रेसिंसव्याप्तसमा
कुले परवक्तागमेचैवऊर्ध्वस्नानमपूजनं मनसाहृदयस्थान्तर्ध्यानायोगात्यपीठकं तत्रैवपृथिवीमध्येपूजांस
मवक्रमाचरेत् मंत्रेप्रमायनेस्नानेदन्तधावनकर्म्मणि अन्यत्सर्वंमनसाध्यानाकुर्यात्पूजनं यथाप्तुष्पादिभिःप्र

रा॰ पृ॰ प॰ ४२

जावहिर्देशो विधीयते तथाहृदयपिकर्त्तव्याः सर्वाश्चप्रतिपत्तयः जलेप्रवहणादौ प्रायोपवेशनागतो हीतानशनव्रतः
ग्रन्थस्वसर्वमिति मैत्रप्रसाधनदंतपावनव्यतिरिक्तमित्यर्थः मैत्रादीनां मानसात्संभवात् नारदपंचरात्रे शास्त्रोमहतो
दारभ्यप्रागेशेविप्रवासरात् जपध्यानार्चनस्तोत्रैः कायवाङ्मनसाधुतैः अभिगाख्येजगद्योनिंतत्राभिगमनंस्मृते त
तः पुष्पफलादीनांमृत्पायोर्जनमाचरेत् भगवद्यागनिष्पत्तिकारणंप्रहरंपरं ततोपर्द्धेनयोगेनमूजयेत्परमेश्व
रं साधकः प्रहरेविप्रेज्यकालोहिसस्मृतः श्रवणंचिंतनंव्याख्याततः पाठसमन्विता स्वाध्यायकालेनहिहिका
लान्तेस्मातिसत्तम दिनावसानेसंप्राप्तेप्रजोकत्वा समभ्यसेत् योगंनिशावसानेऽपविश्रामैरमरीकृते विप्रेति
नारदसंबोधने आदिपदेनसमिदाद्याहरणंसमित्पुष्पकुशादीनांसकालः समुदाहृतउतिदक्षवचनात् अंगेनया
गेनेतिस्वयमेवविवृणोति मध्याह्नेत्येनेनमधुपर्कउक्तः पशुस्तदंगं विस्तयमौनरे माधुपाकिंकयष्वर्थेततः पा
त्रेनिवेदयेत् सहिरण्यंवीजपात्रंद्रविणेनसदैवहि पशुः कलौनकर्त्तव्यस्तथाहभगवान्भृगुः द्रविणंदक्षिणा प
तन्मध्याह्नपूजानन्तरंसतिसंभवेकार्यं तंत्रसारसंहितायां आनृशंस्यमतंकौवैवत्रासीदौषधकीनया साधनाभाव
तीवेतिपंचयाभिधतेपुनः पदिलेयनपर्य्यंतोव्याधितात्मानिरूप्यते तदाप्रजानकर्त्तव्यास्थंडिलेप्रतिमासुच नतत्रा
नेदेतकाष्ठेवाकुर्याद्होमंसमध्यापिवा रविमंडलमालोक्यप्रतिमाप्रथयवापुनः मूलमंत्रंसकृजप्त्वाप्युष्पंसादतनमृतद्वि ४२

येत् श्रान्तो व्याधिभिरत्युग्रैः क्लान्तश्चैवोपवासकैः निजसामयिकैर्वापि सकलं नैव समाचरेत् स्नातादेवमथाग्रीष्मः
गुरून् विशान्यपूज्य वा एतावत्कालविच्छिन्ना पूजा युष्मत्प्रसादतः न दोषोऽस्त्विति संप्रार्थ्य पुनः पूर्ववदाचरेत् से
प्राप्यं जपहोमादिकं च कार्यम् यस्तु रोगवशान्मोहाद्वेषादोष उपागतः जपेन लालनीयः स्याद्दानेन हवनेन
च ध्यानेनापि मुनिश्रेष्ठ ज्ञात्वा कर्मबलाबलमिति नारदपञ्चरात्रवचनात् तथा अथ सूतकिनः पूजा यदा
प्यागमचोदिता स्नात्वा नित्यं च निर्वर्त्य मानस्या क्रियया त्वथ बाह्यपूजाक्रमेणैव स्नानयोगेन पूजयेत् यदि
कामी न चेत्कामी नित्यं पूर्ववदाचरेत् आसिनो वदते पूजा यथैवागमचोदिता लब्धं वा यदि वा लब्धमर्घ्यपाद्यादि
मायने पूजोदकेन कर्मण्यावानवेतायवविधते तदा संपूजयेद्देवं भावनाकुसुमादिभिः दौर्वौषधकीयवद्या
मिपूजामागमचोदिता स्नार्वं स्त्रीबालवृद्धाया उर्वीधा इति भाषिताः रत्नमेउयथमादिचतुष्कमस्तगोक्षुजे म
लमूर्तिः षडेतानि तेषां पूजा विधीयते अन्येषामपि सर्वेषां प्रोक्ता संलेपकर्मणि सर्वेषामेव वस्तूनाममलाभेमा
वेनैव हि निर्मलेनोदकेनार्घ्यपूर्णितेत्याह नारदः तथा पुनस्त्रिया पूजा उत्तमाधममध्यमा अपिकाविनिमिता·
न्याभिधते पात याघ्रनः पागोपकरणैः कृत्स्नैः क्रियमाणोत्तमामता यथालब्धैर्विनिष्पाद्यार्घ्यैः पूजात
मध्यमा पत्रपुष्पांबुनिष्पाद्या पूजा चाधमसंज्ञिका विदिताखिलवेदार्थैर्ब्रह्मर्षिभिरकल्मषैः क्रियमाः

रा॰
पू॰प॰
४४

एतन्त्रयापूजासात्त्विकीसाविमुक्तिदा राजर्षिभिस्तपोनिष्ठैर्भगवत्तत्ववेदिभिः यापूजाक्रियतेसम्यग्राजसीसासु
खप्रदा स्त्रीबालवृद्धमूर्खैर्याधर्मकैरदन्तदमानसैः यापूजाक्रियतेनित्यंतामसीसाप्रकीर्त्तिता कुंभसंभवः सस्युःस
मर्थैःकुर्वीतचोत्तमैरेवसाधनैः मध्यस्तुमध्यमैरेवन्यूनोन्यूनैस्तपोधन आपत्स्वेत्समर्थोपिन्यूनैरेवसमाचरेत्
पूजाकर्म्मविशेषेणदेशकालानुसारतः भविष्यपुराणे विभवेसतियोमोहान्नकुर्याद्विधिविस्तरे नतत्फलम
वाप्नोति प्रलोभाक्रान्तमानसः अथमुद्राः तास्त्वंकुशामुद्रा॰ कुंभमुद्रा॰ अग्निप्राकारमुद्रा॰ ऋष्यादिन्यासमुद्रा॰
षडंगमुद्रा॰ गालिनीमुद्रा॰ योनिमुद्रा॰ मत्स्यमुद्रा॰ आवाहनादिनवमुद्रा॰ शंखमुद्रा॰ चक्रमुद्रा॰ गदामुद्रा॰
पद्ममुद्रा॰ श्रीवत्समुद्रा॰ कौस्तुभमुद्रा॰ वनमालामुद्रा॰ ज्ञानमुद्रा॰ हृन्नमन्मुद्रा॰ गरुडमुद्रा॰ धेनुमुद्रा॰ बा
णमुद्रा॰ व्याख्यानमुद्रा॰ प्रार्थनामुद्रा॰ वंदनीमुद्रा॰ आसनादिनैवेद्यान्ताः पंचदशमुद्राः ग्रासमुद्रा॰ प्रा
णादिपंचमुद्रास्तन्मंत्राश्च विष्वक्सेनमुद्रा॰ सप्तजिह्वामुद्रा॰ भूतवालिमुद्रा॰ नाराचमुद्रा॰ पादुकामुद्रा॰ कच्छ
पीमुद्रा॰ त्रिशूलमुद्रा॰ पाशमुद्रा॰ संहारमुद्रा॰ एतासांलक्षणानि तत्रश्रीयंत्रराजे कनिष्ठानामयोः पृष्ठे
स्यादंगुष्ठस्तर्जनी कुटिलाऋज्वीमध्यस्यामुद्रासावंकुशाभिधा नारदपंचरात्रे दत्वांगुष्ठपरांगुष्ठेश्लिष्टाह
स्तद्वयेनतत् सावकाशंतेकनिष्ठिंकुर्यात्कुंभस्यमुद्रिका २ प्रयोगसारे त्रिशूलाग्रौकरौकृत्वाबद्धस्तस्तावभितो ४४

नयेत् अस्त्रमुद्रेयमाख्याता वह्निप्राकारलक्षणा ३ नारदपंचरात्रे मंत्राभिमृष्टयोः पाण्योः पल्लवांगानि विन्यसेत्
अंगुष्ठेनाथ रेखास्ते मध्यांगुलिसमाश्रयं ४ अंगुष्ठविषयन्यासे तर्जनीशिरसैव हि इति ५ अंगुष्ठवर्जमंगुल्यश्चतस्रो हृ
दि मुद्रेति ६ शिखायां मुष्टिरेव स्यादंगुष्ठकृतनालिका ७ सर्वांगुल्यग्रनाभेः पाण्योः कवचवेष्टने ८ तर्जनीम
ध्यमानामाः प्रोक्ता नेत्रत्रये क्रमात् ९ अंगुष्ठतर्जन्यग्राभ्यां हस्तयोरभिताडयेदिति १० चतस्रः प्रसारिताः प्रसारित
तलेनैव पाणिना हृदये शिर इति वचनात् ध्यानाभेः स्कंधात् तथाभूताभ्यां पाणिभ्यां वर्मस्कंधादिनाभिगमितवच
नात् क्रमदीपिकायां नाराचमुष्ट्युच्छ्रितबाहुयुग्मकांगुष्ठतर्जन्युदितो ध्वनिस्तु विघ्नद्विषघ्नः कथितास्त्रमुद्रा १० य
त्रादिष्णीतर्जनिमध्यमे स्तः नेत्रत्रये तत्र भवेदनामा इति मंत्रतंत्रप्रकाशे कनिष्ठांगुष्ठकौ सक्तौ करयोरितरे
तरे तर्जनीमध्यमानामाः संहता भुग्नवर्जिताः मुद्रैषा गालिनी प्रोक्ता शंखस्योपरि चालिता इति संहताः पर
स्परसंयुक्ताः भुग्नवर्जिता अकुटिलाः ११ लक्षसंग्रहे मिथः कनिष्ठिके बध्वा तर्जनीभ्यामनामिके अनामिको
र्ध्वसंश्लिष्टदीर्घमध्यमयोरधः अंगुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता १२ अधोमुखे वामहस्ते ताटशो दक्षहस्त
के विन्यसांगुष्ठयुग्मे तत्पार्श्वयोः संप्रसार्येव दर्शयेदर्घ्यपात्रेषु मत्स्यमुद्रेयमीरिता १३ अथावाहनादिमुद्रा
लक्षसंग्रहे हस्ताभ्यामंजलिं बध्वाऽनामिकामूलपर्वणोः अंगुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता १४

अधोमुखीति यं चेत् स्यात् स्थापनीति निगद्यते १५ उच्छ्रितांगुष्ठमुष्ट्योस्तु संयोगात् संनिधापनी १६ अन्तः प्रवेशितांगुष्ठा
गा. सैव संरोधिनी मता १७ उत्तानमुष्टियुगला संमुखीकरणी भवेत् देवतांगे षडंगानि न्यासः स्यात् सकलीकृतिः १८
सू.प. सकलीकरणस्वरूपं सिद्धान्तशेखरे अथ मित्रस्वभावानां यदमित्रप्रयोजने अंगानामंगिनां सार्द्धं सकलीकरण
४५ विदमिति तथा सव्यहस्तकृता मुष्टिर्दीर्घोर्ध्वांगुष्ठतर्जनी अवगुंठनमुद्रेयमभितो भ्रामिता मता २० अन्योन्या
भिमुखाश्लिष्टाकनिष्ठानामिका ततः तथैव तर्जनीमध्या धेनुमुद्रेयमीरिता अमृतीकरणं कुर्यात्तया साध
कसत्तमः २१ अन्योन्यग्रथितांगुष्ठप्रसारितकरांगुली महामुद्रेयमुदिता परमीकरणे प्रिये प्रयोजयेदिमां मु
द्रां देवतायागकर्मणि २२ अथ वैष्णवमुद्राः लक्षसंग्रहे वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना कृत्वोत्तानां
तथा मुष्टिमंगुष्ठं तु प्रसारयेत् वामांगुल्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः दक्षिणांगुष्ठसंस्पृष्टा मुद्रैषा शंख
संज्ञिका २३ विपर्यस्ततलौ कृत्वा वामदक्षिणहस्तयोः अंगुष्ठौ रचयेत् सैव कनिष्ठानामिकान्तरे चक्रमुद्रेयमु
दिष्टा सर्वसिद्धिकरी शुभा २४ अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथितांगुली अंगुल्यौ मध्यमे भूयः संलग्ने सुप्रसा
रिते गदामुद्रेयमाख्याता विष्णोः संतोषकारिणी २५ हस्तौ तु संमुखौ कृत्वा संहतावुन्नतांगुली तलान्तमिलिता
गुष्ठौ मुद्रैषा पद्मसंज्ञिका २६ कालिकापुराणे मणिबंधादाकरभं संयोज्य करयोर्द्वयोः अंगुष्ठेनापि संयोज्य ततः ५५

ष्ठैवं कनिष्ठिके निःसृतासितसोर्द्वयोः पाणिपार्श्वांगुली विरलास्तयोः पद्ममुद्रा समाख्याता वनदुर्गाप्रदा नृणां अंगुष्ठोन्य
ष्ठकरयोर्मध्यमानामिकांगुली अंगुष्ठेन तु बध्नीयात्कनिष्ठामूलसंश्रिते तर्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञिका २७
अनामाङ्गुष्ठमूलस्था दक्षिणस्य कनिष्ठिका कनिष्ठयान्यया बद्धा तर्जन्या दक्षिणया तथा वामानामां च बध्नीयाद्दक्षांगुष्ठस्य
मूलके अंगुष्ठमध्यमे वामे संयोज्य सरलाः पराः चतस्रोऽथ समेलाग्रा मुद्रा कौस्तुभसंज्ञिका २८ स्पृशेत्कण्ठादिपादान्तं
तर्जन्याङ्गुष्ठनिष्ठया करद्वयेन मालावन्मुद्रेयं वनमालिका २९ तर्जन्यंगुष्ठकौ सक्तावग्रतो हृदि विन्यसेत् वामहस्ता
म्बुजे वामजानुमूर्द्ध्नि विन्यसेत् ज्ञानमुद्रा भवेदेषा रामचन्द्रप्रियंकरी ३० तर्जन्यग्रेऽङ्गुष्ठमूले कृतान्यांगुलियोजनाम्
स्यात्संमुद्रितयोः पाण्योर्मुद्रा वानरसंज्ञिता ३१ हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठिके मिथस्तर्जनिके श्लिष्टे श्लि
ष्टावंगुष्ठकौ तथा मध्यमानामिके द्वे तु द्वौ पक्षाविव चालयेत् एषा गरुडमुद्रा स्याद्विष्णोः प्रीतिविवर्द्धनी ३२ वा
मस्य मध्यमाग्रे तु तर्जन्यग्रे नियोजयेत् अनामिकां कनिष्ठां च तस्यांगुष्ठेन पीडयेत् दर्शयेद्वामके स्कन्धे धनुर्मुद्रेयमी
रिता ३३ दक्षमुष्टेस्तु तर्जन्या दीर्घया बाणमुद्रिका ३४ दक्षिणांगुष्ठतर्जन्यावग्रलग्ने तथाङ्गुलीः प्रसार्य संहता ना
नावैषा व्याख्यानमुद्रिका रामस्य च सरस्वत्याश्च संततप्रेयसी मता ३५ प्रसृतांगुलिकौ हस्तौ मिथः श्लिष्टौ च संमुखौ
कुर्यात्स्वहृदये चैषा मुद्रा प्रार्थनसंज्ञिका ३६ कालिकापुराणे संपुटं प्राञ्जलिं वापि यदि शीर्षे प्रदर्शयेत् वंदनीयेम

माल्यानाम्मुद्राविस्मयःप्रमोदनी ३९ सारसंग्रहे आसनेपद्ममुद्रास्याद्धस्तद्वयमधोमुखे मुद्रैषाकूर्मपृष्ठेनदेवो
गा. र्ध्वमुखेपुनः मुद्रास्यात्पात्रनामेतिवार्घेमुद्रावोजलिरुच्यते अनामांगुष्ठयोर्योगात्सैवोक्तापात्रमुद्रिका उत्तानेदक्ष
सू.प. हस्तेतुकृत्वानिम्नतलेसुधीः कनिष्ठाहीनाःसंयुक्ताश्चतस्रोऽगुल्यउन्नताः मुद्रैषावमनेप्रोक्ताऽधोमुखीसात
४९ नामया स्पृष्टांगुष्ठाभवेन्मुद्रामधुपर्केवरानने ४५ अधोमुखोदक्षहस्तकृतामूर्ध्नि:कनिष्ठया वियुक्ताःस्नान
मुद्रैषागदितापरमेश्वरि ४६ उत्तानेदक्षिणेहस्तेकृत्वातन्मध्यमांपुनः अंगुष्ठेनस्पृशेदेषामुद्रावस्त्रस्यकीर्तिता ४७
पुष्पेवानामिकास्पर्शान्मुद्राभूषणसंज्ञिका ४८ कनिष्ठास्पर्शनोद्भूषावोपवीतस्यमुद्रिका ४९ ज्येष्ठाग्रेणकनि
96 ष्ठाग्रेस्पृशेद्गन्धस्यमुद्रिका ५० अधोमुखेकरंकृत्वातर्जन्यग्रेतुयोजयेत् अंगुष्ठाग्रेतुमुद्रैषाधूपाख्यापरमेश्वरि ५१
अंगुष्ठाग्रेणतर्जन्यास्पृशेदग्रेमहेश्वरि धूपमुद्रेयमाख्यातासर्वदेवप्रियंकरी ५२ ज्येष्ठाग्रेणस्पृशेदग्रंमध्यमाया :
सुरार्चिते दीपमुद्रेयमुदितासर्वदेवप्रियाशिवे ५३ अनामाग्रेस्पृशेद्विज्ञेष्ठाग्रेणतुदेशिकः नैवेद्यमुद्रा
कथितादेवानांतृप्तिदायिनी ५४ नारदपंचरात्रे ग्रासमुद्रासव्यहस्तेप्रफुल्लकमलाकृतिं दर्शयन्नेवंवा
मनामन्यहस्तेनदर्शयेत् ५५ कनिष्ठानामिकेसम्यगंगुष्ठाग्रेणयोजयेत् प्राणमुद्रासमाख्याताप्रथमंदर्श
येदिमां ५६ योजयेत्तर्जनींमध्यामपानस्यायमुद्रिका ५७ मध्यमानामिकेतद्व्यानमुद्राप्रकीर्तिता ५८ ४९

तर्जनीमध्यमानामास्तद्वन्मुद्रान्तरीयका ५९ सर्वाभिरंगुलीभिश्च पंचमी मुद्रिका मता ६० स्वकीयैर्मन्त्रभि
र्युक्ताः पंचमुद्राः प्रकीर्तिताः प्राणसंज्ञस्तथापानो व्यानोदानसमन्वितः समानोऽयुताः सर्वे प्राणवायाद्दिवा
नकाः पंचमुद्रा भवन्तीह क्रमेणैव समीरिताः मुष्टीकृतस्य वामस्य तर्जन्यूर्ध्वाऽवरादधः दक्षस्य तादृशस्या
धो कूर्पराङ्के विनस्य वेत् विष्वक्सेनस्य मुद्रेयं हरेः संतोषवर्द्धनी ६१ लक्ष्मसंग्रहे मणिबंधास्थितौ कृत्वा
प्रहृतांगुलिकौ करौ कनिष्ठांगुष्ठयुगलं मिलितान्तः प्रसारयेत् समजिह्वाख्यमुद्रेयं प्रिया वैश्वानर
स्य हि ६२ सर्वाभिरंगुलीभिश्च दर्याङ्कृत वलिप्रिये ६३ ईषदुन्नतवक्राग्रमिलिताङ्गुष्ठकोऽञ्जलिः मिलि
तः पाडकामुद्रा दामोदरमुदावहा ६४ उत्तानवामहस्तस्य मध्यमानामिकांगुली अनामामध्यमाभ्यां
चतिर्यग्वा दक्षिणस्य च गाढमावध्य तलयोः गुष्ठकेन च देशिन्यादेशिनी युग्मको कनीयस्या कनीयसी
नाभिदेशान्नयेदूर्ध्वं कच्छपी मुद्रिकामिमां कालिकापुराणे अंगुष्ठेन कनिष्ठां तु बध्वा शिष्टांगुलित्रयं
प्रसारयेत् त्रिशूलाख्या मुद्रेयं परिकीर्तिता ६६ वामपार्ष्णिस्पृक्तर्जन्या दक्षमुष्टिस्थतर्जनी संयोज्यांगुष्ठका
ग्राभ्यां तर्जन्यग्रस्य कोदिपेत् पद्मापाशाह्वया मुद्रा विद्वद्भिः परिकीर्तिता नृसिंहपरिचर्यायां च मध्यमातर्जे

नीरेत्व वामेऽङ्घ्रेवमेमत्वे अधोमुखितयानीय दक्षिणे हि पराङ्मुखे मिथः संपीडयेताभ्यां मुद्रा पाशस्य वै भवेत्
गा. लत्तसंग्रहे अधोमविवाहस्तेऽङ्घ्रीसदक्षहस्तके क्षिप्त्वाङ्गुलीरङ्गुलिभिः संयोज्य परिवर्तयेत् पद्मासंहारमु
स्व.प. द्रा स्याद्विसर्जनविधौ मता ८८ अथ जपकालविहितासनानि जान्वोरन्तरे सम्यक्कृत्वा पादतले उभे ऋजुकायः स
४० मासीनः स्वस्तिकं तदुदीरितं १ गुल्फौ च वृषणस्याधः सीमन्याः पार्श्वयोः क्षिपेत् पार्श्वपादौ च पाणिभ्यां दृढं बध्वा
सुनिश्चलः सिंहासनं भवेदेतत्सर्वव्याधिविषापहं २ दक्षेपदमधः कृत्वा विन्यसेदूरौ तथेतरं ऋजुकायो विशेद्यो
गी वीरासनमितीरितं ३ उपासनायां वीरासनं नेति सेप्रदायिकाः वामपादमुपादाय दक्षिणोरौ प्रविन्यसेत् ४
57 तथैव दक्षिणं पादं सव्यस्योपरि विन्यसेत् पद्मासनं भवेदेतत्सर्वेषामपि पूजितं ५ स्वस्तिकं पद्मकं वीरं सिद्धं चे
ति चतुष्टयं जपप्रशस्तमन्येषां प्रसंगादेव कीर्तनमिति गौतमीयतन्त्रे प्राङ्मुखोदङ्मुखो वापि स्वस्तिकासनमा
स्थितः रात्रावुदङ्मुखः कुर्याद्देवकार्यं सदैव हि शिवार्चने सदाप्येवं शुचिः कुर्यादुदङ्मुखः इति तथा उदङ्मु
खः प्राङ्मुखो वाम्नता प्रयतमानसः स्वस्तिकासनमासीनः पद्मासनमथापि वा इति गदितमशेषं राघवोपा ४८
सनायां यजनजपकृतादौ शास्त्रदृष्टे विधाने गुरुचरणसरोजाराधनाल्लब्धमेतत्कृतमकृतमहस्रैर्गोपनीयं
हितस्मात् इति रामोपाध्यायकृतायां श्रीरामपूजापद्धतौ पूजायां प्रमाणवाक्यनिरूपणं सम्पूर्णं
त

विश्वंयत्कुरुतेविभर्तिहरतेशैलूषवत्स्वात्सहेयच्छामसमभवान्वर्तिनिगमाःसांगाःसशास्त्रागमाःसंसारार्णवतारणायजगतांय
च्चामनैकारपदातहंदेसहजप्रकाशममलेचैतन्यरूपंमहः १ अनेकग्रंथानालोक्यश्रीमद्रामस्यपूजनेलिख्यतेचितसं-
तुष्ट्यैशिष्टैरादृतमादरात् २ अथश्रीरामपूजाविधिः तत्रश्रीमान्साधकोंब्राह्मेमुहूर्तेशयनाद्दक्षिणांगेनसमुत्थाय
श्रीरघुनंदनंस्मरेत् रामरामेतिरामेतितारकाख्यंपरंशुभं श्रीसर्वज्ञयमध्यस्थेह्निजेयातेविचक्षणः प्रातःस्मरामिरघुनाथ
मुखारविंदंमंदस्मितंमधुरभाषिविशालभालं कर्णावलंबिचलकुंडलगंडशोभंकर्णांतदीर्घनयनेनयनाभिरामं १
प्रातर्नमामिरघुनाथपदारविंदंपद्मांकुशादिशुभरेखिसुखावहंमे योगींद्रमानसमधुव्रतसेव्यमानंपापापहंसपदिग-
गौतमधर्मपत्न्याः २ प्रातर्भजामिरघुनाथकरारविंदंरक्षोगणायभयदंवरदंनिजेभ्यः यद्राजसंसदिविभज्यमहेशचा
पंसीताकरग्रहणमंगलमापसद्यः ३ प्रातःश्रयेश्रुतिनुतांरघुनाथमूर्तिंनीलांबुजोत्पलसितेतररत्ननीलां आमुक्तमौ
क्तिकविशेषविभूषणाढ्यांध्येयांसमस्तमुनिभिर्निजमृत्युहत्यै ४ प्रातर्वदामिवचसारघुनाथनामवाग्दोषहारिसकलंश
मलेनिहंति यत्पार्वतीस्वपतिनासहभोक्तुकामाप्रीत्यासहस्रहरिनामसमंजजाप ५ यःश्लोकपंचकमिदंमनुजःपठे
न्नित्यंप्रभातसमयेनियतःप्रबुद्ध श्रीरामसेवकजनेषुसएवमुख्योभूत्वाप्रयातिहरिलोकमनन्यलभ्यं ६ गुर्वंघ्र्यसक्त
राज्योववरदत्नवनेपद्मपद्भ्यांप्रियायाःपाणिस्पर्शाक्षमाभ्यांमृजितपथरुजोयोहरींद्रानुजाभ्यां वैरूप्याच्छूर्पणखाःश्रि

द्यां

अस्त्रमन्त्रेणतालत्रयपूर्वकं देवतायागमन्दिरद्वारमुद्घाट्य = ३

यविरहरुषारोपितम्रविग्रहः स्त्रलाञ्छिर्वहमेनः खलदवदहनः कोशलेन्द्रोऽवतान्नः ७ इतिरामंसंस्तुत्वा पूर्वाभिमुखः केशवंप्रसा
रा. दनेनविधायययावत्स्वगुरौ षोडशगणेशेवावमनदेतथावनानहेदिनद्वादशमांइषजिह्वोह्वोखनराविवस्त्रत्यागस्वद्रवस्त्रपरिधा
पू.प. नद्विरावमनानिविधाय देवतायागमेदिरेसंमार्ज्यगोमयेनोपलिप्यवितानादिभिरलंकृत्यनत्वकंबलाद्यासनमास्तीर्य
९८ ह्रीं आधारशक्तिकमलासनायनमइत्यासनेसंपूज्यतत्रप्राङ्मुखउपविश्य ॐरामस्यजायोगपतासेपत्येमानसंस्नानमहंकरि
ष्ये इतिसंकल्प्य मानसंप्राणायामंविधायवासुदेवंध्यायेत् तद्यथा स्वशिरस्तनपरिभागेकमलोपरि अनेकादित्यसंकाशे
वासुदेवेचतुर्भुजे शंखचक्रगदापद्मसर्वाभरणभूषिते श्यामलेशांतवदनेप्रसन्नेविश्वरूपिणि दिव्यचंदनलिप्तांगेवारु
98 हासमनोरुभुजे अनेकरत्नसंकाशज्वलन्मकरकुंडले वनमालापरिहितेनारदादिभिरचिंते केयूरवलयोपेतेसुवर्णमु
कुटोज्वले ध्वजवज्रांकुशालक्ष्मपादपद्मोपशोभिते तत्पादोदकजांधारांनिपतंतींस्वमूर्द्धनि चिंतयेद्ब्रह्मरंध्रेणप्रवि
शंतींस्विकांतनो तयासंक्षालयेत्सर्वमंतर्देहगतंमलं तत्क्षणाद्विरजोमंत्रीजायतेस्फटिकोपमः इदंस्नानवरंमंत्रात्स
हस्रमधिकंस्मृतमितिस्नात्वामानसमेवावमनंविधाय पूजामूर्तेर्निर्माल्यमपकृष्यवक्ष्यमाणविधिनामूलेनप्राणायामत्र
येऋष्यादिन्यासत्रयंविधायपूर्वदिनानीतमुकुलविकासितपुष्पादिनामूलमंत्रेणत्रिरभ्यर्च्यपाद्यावमनीयेदत्वादेवायदंत
धावनगंडूषमुखप्रक्षालनादिदत्वापुनरावमनीयंनिवेद्यकरास्पर्शोच्छनायसुक्ष्मानिर्मलवस्त्रंदत्वास्वशिरसिस्थितेनसहस्रदल

ॐ उत्तिष्ठ ब्रह्म ... देवयन्त ... महेहाउप प्रयन्तुमरुतः सुदानव इन्द्र ... प्राशूर्भवा ... सचा १
ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दितवन्दनाय ॥ बुध्यस्वदेवेशजगन्निवास मन्त्रप्रभावेणसुखेन देव राम २
सोमावदमकरुणो भगवान्प्रबुद्धः प्रेमस्मितेननयनाम्बुरुहं विजृम्भन् । उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिराऽपनयतात्पुरुषः पुराणः इति मन्त्रैः ९८
घंटादिवादयन्श्रीराममुत्थाप्य = ३

दलकमलकर्णिकायां श्रीगुरुं चंद्रकान्तनिभं श्वेतवस्त्राभरणभूषितं श्वेतगंधानुलेपनं श्वेतमालाविभूषितं वराभयकरं द्विभुजं
ध्यात्वा पंचोपचारैः संपूज्य आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तं योगींद्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामी ।
ति प्रणम्य आधारे चतुर्दलकमले गणपतिं सिंदूराभं वामे पाशांकुशौ दक्षिणे मोदकाभये दधानं चतुर्भुजं ध्यात्वा मानसैः पंचो
पचारैः संपूज्य हृदये ॐ विष्णुपीठात्मने नमः इति पीठं संपूज्य आधारहृदयभ्रूमध्ये त्रेधा मंत्रमयं तेजो विभाव्य रामबीजेन कृतां
नीत्वा रां हृदयाय नमः रीं शिरसे स्वाहा रूं शिखायै वषट् रैं कवचाय हुं रौं नेत्राय वौषट् रः अस्त्राय फट् इति तेजस्मिन्न्यासं
विधाय इंदीवरनिभं पीतवस्त्रभूषितविग्रहं ज्ञानमुद्राभुजं सस्मीतं रामं हृदिस्थं विभाव्य पंचोपचारैः पूजयेत् तद्यथा ॐ लं पृ
थिव्यात्मना नारायणेन गंधं कल्पयामि ॐ हं आकाशात्मना वासुदेवेन पुष्पं कल्पयामि ॐ यं वाय्वात्मना संकर्षणेन धूपं कल्पया
मि ॐ वह्न्यात्मना प्रद्युम्नेन दीपं कल्पयामि ॐ वं अबात्मनानिरुद्धेन नैवेद्यं कल्पयामि इति गंधादिमंत्रैः सर्वत्र पंचोपचाराः का
र्याः एवं पूजयित्वा समन्त्रे रामं ध्यात्वा स्तुत्वा प्रणम्य त्रैलोक्यचैतन्यमयादिदेव श्रीराघव त्वच्चरणात्तथैव प्रातः समुत्थाय तव
प्रियार्थं संसारयात्रामनुवर्तयिष्ये संसारयात्रामनुवर्तमानं त्वदाज्ञया राघव देवदेव स्पर्द्धातिरस्कारकलिप्रमादभया
नि मां माभिभवंतु नाथ जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः त्वयेंद्रियाणामधिदैवतेन यथा नियुक्तो
ऽस्मि तथा करोमि गुरुर्देवता मंत्रेषु विष्णुर्यथा शिवेषु च नत्वमे भेदबुद्धिर्न्नो भूयादाज्ञा रघुनंदन इति संप्रार्थ्य देवात्मामादा

इति प्रातःकृत्यं

रा॰
पू॰प॰
४५

49

यसमुद्रमेखले देवि पर्वतस्तनमण्डले विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमिं संप्रार्थ्य आसानुसारेण तत्संपादने नि
धाय श्रीरामस्तुदीर्घोन्माय कुशमृत्तिलगंधाक्षतगोमयपुष्पधौतवस्त्राण्यादाय देवस्तोत्राणि पठन् स्नातुं जलाशयमभिग
च्छेत् अस्त्रमंत्राभिमंत्रितजलेन तीरं प्रक्षाल्य तत्र अस्त्राभिमंत्रिते कुशादिकं निधायोद्धृतजलेन तीर्थाद्बहिः कटिशौचं विधाय मृ
त्तिकां द्विधा कृत्वा एकेन भागेन स्वशाखोक्तविधिना वैदिकं स्नानं विधाय तदंगतर्पणं कृत्वा तीरमागत्य अस्त्रमंत्रेण मृदो द्वि
तीयभागमादाय अस्त्रमंत्रेणाभिमंत्र्य शिखामंत्रेण विघ्नादिकं निरस्य मूलमंत्रेणाभिमंत्रितया मृत्तिकया मस्तकादिपादांतं विलिप्य
आधारः सर्वभूतानां विष्णोरतुलतेजसः तद्रूपाश्च ततो जाता आपस्ताः प्रणमाम्यहं इति तीर्थजलं प्रणम्य वरुणमंत्रेण संमु
खीकरणमुद्रां बध्वा प्राणवायुं निरुध्य जलांतः प्रविश्य तत्रैव निमज्योन्मज्याचम्य नाभिमात्रे जले स्थित्वा अद्येत्यादि श्रीराम
प्रीत्यर्थं तांत्रिकं स्नानमहं करिष्ये इति संकल्पं कृत्वा मूलमंत्रेण प्राणायामत्रयं मूलमंत्रस्य ऋष्यादिकरषडंगन्यासांश्च विधा
य स्वपुरतो हस्तमात्रं चतुरस्रं तीर्थं परिकल्प्य ॐ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे तेन सत्येन मे देव तीर्थं देहि दिवा
कर इति सूर्यात्तीर्थं संप्रार्थ्यांकुशमुद्रया सूर्यमंडलं भित्वा ॐ गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधुकावेरि
जलेऽस्मिन् संनिधिं कुरु इति सूर्यमंडलात्तीर्थमावाह्य पुरः कल्पिततीर्थमंडले मूलमंत्रेण संयोज्य आवाहनादिमुद्रा दर्शये
त् तद्यथा हे तीर्थानि इह आवाहितानि भवत १ हे तीर्थानि इह स्थापितानि भवत २ हे तीर्थानि इह सन्निहितानि भवत ३ हे

तीसन्निरुद्धानिभवंतु ४ हेतीसंमुखानिभवंतु ५ हेतीअवगुंठितानिभवंतु ६ हेतीः सकलीकृतानिभवंतु ७ इतिसकली
कृत्यतीर्थेभ्योनमइतितीर्थानिसंपूज्य॰ ततोवक्ष्यमाणतीर्थशक्तिमंत्रेणतीर्थशक्तिमावाह्यतोध्यायेत् तद्यथा सर्वानंदमयी
मशेषडरितध्वंसामृगांकप्रभांअब्जांचोर्द्धकरद्वयेनदधतींपाशंसृणिंविक्रमात् दोर्भ्यांचामृतपूर्णहेमकलशंमुक्तादममालांव
रांगंगासिंधुसरिद्वयादिसहितांश्रीतीर्थशक्तिंभजे इतितीर्थशक्तिंध्यात्वा ह्रांह्रींह्रूंह्रैंह्रौंह्रः सर्वानंदमयेतीर्थशक्तिपद्मेहि
स्वाहाइत्यावाह्यध्यात्वातीर्थशक्त्यैनमइतितीर्थशक्तिंसंपूज्य ॐनमोभगवतिअंबेअंबिकेअंबालिकेमहामालिनिएह्येहिभ
गवतिअशेषतीर्थालवालेह्रींश्रींशिवजटाधिरूढेगंगेगंगांबिकेस्वाहेतिमंत्रेणसप्तवारंजलमभिमंत्र्यतत्रह्रींकारेणलोडयञ्च
वमितिधेनुमुद्रयाः मृतीकृत्यकवचमंत्रेणावगुंठनमुद्रयावगुंठ्यास्त्रमंत्रेणछोटिकाभिः संरक्ष्य तत्रषट्कोणगर्भमष्टदले
पद्मंविलिख्यकर्णिकायांप्रणवपुटितंरामबीजंविलिख्यतत्रस्वहृदयकमलाद्देवमावाह्यआवाहनादिमुद्रादर्शयेत् तद्यथा हेरा
मइहावाहितोभव १ हेरामइहसंस्थापितोभव २ हेरामइहसन्निहितोभव ३ हेरामइहसन्निरुद्धोभव ४ हेरामइहसंमुखोभव ५
हेरामइहावगुंठितोभव ६ देवहृदये रांहृदयायनमः देवशिरसिरींशिरसेस्वाहा देवशिखायांरूंशिखायैवषट् देवकवचे
रैंकवचायहुं देवनेत्रेरौंनेत्रायवौषट् देवपरितोदिक्षुरः अस्त्रायफट् एवंषडंगैः हेरामसकलीकृतोभवइतितीर्थआवा
हितंदेवंसांगावरणंध्यात्वाजलमध्येः पंचोपचारैर्देवंसंपूज्य मूलमंत्रेणाष्टवारंजलमभिमंत्र्यमूलेनसप्तशिरोऽष्टवारमभिषिं

अघमर्षमंत्रेणात्मरक्षां वा विलेपनं कृत्वा तत्र मूलमंत्रं जपन् १२ हृदि देवं स्मरन् त्रिर्निमज्ज्योन्मज्य ॐ भगवद्ध्रौवधा मूलमंत्रेण
रा॰ स्वशिरसि त्रिर्निमज्ज्योन्मज्याभिषिंच्य ॐ वेसिसहृदोर्मिविलेविस्त्रमङ्गः शुक्रे प्रजायते मातरः सर्वभूतानामापो देव्यः पुन
पू॰प॰ न्तुमां वै ॐ इति स्वशिरः प्रोक्ष्य श्रलक्ष्मीमलरूपा या सर्वभूतेषु संस्थिता क्षालयन्ति निजस्पर्शादापो नित्यं पुनन्तु मां इति
५० मंत्रेणात्मानमभ्युक्ष्य यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु वो नमः इति प्रणम्य
मूलमंत्रेण स्वाहान्तेन त्रिराचम्य जलेन तिलकं विधाय मूलमंत्रेण त्रिर्देवं संतर्प्य स्वहृदि विसृज्य च तीरमागत्य विप्रविस्र
तीर्थं गृहीतायौ ते वाससी परिधायोद्धृतकरौ मृदा द्विः प्रक्षाल्य वैसवेद्धि राचमनं विधाय तिलकीयद्ध्येतारशुटि तेरामबीज
50 मालिख्य मूलमंत्रेणाष्टवारमभिमंत्र्य मूर्तिपंजरेण मूलमंत्रेण वा द्वादश तिलकान्विधाय वैदिकसंध्यानंतरं तांत्रि
कसंध्यां कुर्यात् तद्यथा आसनविधिं विधाय श्रीरामराधनयोग्यतासिद्ध्यर्थं मंत्रसंध्यामहं करिष्ये इति संकल्प्य मूलेन प्रा
णायामत्रयं कृत्वा मूलमंत्रस्य ऋष्यादिकरषडंगन्यासान्विधाय स्वपरितो जलप्रक्षेपेण सप्तप्राकारवचनाद्वगुंठ्य दर्भमूलेन तत
जले वक्र त्स्फारं कृत्वा सूर्यमंडलात्तीर्थमावाह्य आवाहनादिमुद्राः पूर्ववत्प्रदर्श्य तीर्थानि जलैः संपूज्य तज्जलमंजा
लिनादाय दक्षिणहस्ते - घवामेनाच्छाद्य ॐ नमो भगवते रघुनंदनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनाय अमित
तेजसे बलाय रामाय विष्णवे नमः इति मंत्रेण सकृदभिमंत्र्य वामहस्ते कृत्वांगुलिविवरनिःसृतांबुना मालामंत्रं जपन्

ड्विसकृदभिषिंचेत् अवशिष्टजलं दक्षिणहस्ते कृत्वा ॐ जानकीवल्लभाय स्वाहेति मंत्रेणाभिमंत्र्य पिबेत् आचमनं विधाय सू
र्यमंडले रामं यथोक्तरूपं ध्यात्वा दक्षिणकरेण जलमादाय वामकरेण स्पृशन् लंवंरंयंहं इति पंचभौतिकबीजैः सप्तवारं मूलमं
त्रेण च वारत्रयमभिमंत्र्य तज्जलं वामकरे कृत्वा तदंगुलिविवरनिःसृतजलबिंदुभिर्मूलमंत्रेण दक्षिणकराग्रेण स्वशिरसि त्रिः प्रोक्ष्या
वशिष्टजलं दक्षिणहस्ते कृत्वा नासासमीपे नीत्वा तेजोमयेवामनासारंध्रेण स्वदेहान्तः प्रविष्टं ध्यात्वा तेन जलेन स्वदेहान्तः स्थसम
कलकल्मषं प्रक्षाल्य कृष्णवर्णं दक्षिणनासाविवरनिर्गतं विभाव्य स्ववामभागे कल्पितवज्रशिलायां रः अस्त्राय फडिति मंत्रेण
स्फाल्य हस्तौ प्रक्षाल्य पुनरंजलमादाय ॐ दाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात् सूर्यमंडलस्था
य श्रीरामाय अर्घ्यं कल्पयामीत्यर्घ्यं वारत्रयमंजलिं सूर्याभिमुखं तदनु मूलमंत्रमुच्चार्य श्रीरामं तर्पयामीति त्रिः
संतर्प्य प्राणायामं दाशरथाय हृदयाय नमः विद्महे शिरसे स्वाहा सीतावल्लभाय शिखायै वषट् धीमहि कवचाय हुं
तन्नो रामः नेत्राय वौषट् प्रचोदयात् अस्त्राय फट् इति मंत्रैः करषडंगन्यासौ मूलमंत्राक्षरैर्वादिकरषडंगन्यासौ च विधाय सूर्यमंड
ले देवं ध्यायेत् ॐ दाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात् इति रामगायत्री यथाशक्ति जपित्वा मू
लमंत्रं वाष्टोत्तरशतं जपित्वा वक्ष्यमाणजपसमर्पणमंत्रेण जपं समर्प्य स्तुत्वा प्रणम्य सूर्यमंडलाद्देवं स्वहृदि विसृज्य श्रीगुरुं प्र
णमेदिति त्रिषु कालेषु तांत्रिकसंध्योपासनं हीनो न दीक्षाफलमश्नुते इति शिवरहस्यवचनात् संध्यात्रयमावश्यकमिति ततः

ध्याविधिः पूर्वसंध्यालोपो न कर्तव्यः शंभो रात्रैवमेव हि ६
दीक्षितः सं = १

रा॰
पू॰प॰
५१

प्रातःसंध्यानन्तरं वैदिकतर्पणं विधाय स्वपुरतो वामितिधेनमुद्रया जलममृतीकृत्य तत्र षट्कोणगर्भं भूपुरवेष्टितमष्टदलपद्मं लि
खित्वा तत्र ॐगुरूंस्तर्पयामि ॐपरमगुरूंस्तर्पयामि ॐआदिगुरूंस्तर्पयामि ॐमहागुरूंस्तर्पयामि ॐअस्मद्गुरूंस्तर्पयामि ॐपू
र्वगुरूंस्तर्पयामि ॐनारदादिदेवर्षींस्तर्प्पयामि ॐपूर्वसिद्धांस्तर्प्पयामि ॐभागवतांस्तर्प्पयामि॰ ॐगणपतिंतर्पयामि॰ ॐ
दुर्गांतर्पयामि॰ ॐक्षेत्रपालंतर्पयामि ॐसरस्वतींतर्पयामि॰ ॐमंडूकंतर्पयामि ॐकालाग्निरुद्रंतर्पयामि २ ॐआधारश
क्तिंतर्पयामि ३ ॐकूर्मंतर्पयामि ४ ॐअनंतंतर्पयामि ५ ॐपृथ्वींतर्पयामि ६ ॐक्षीरसमुद्रंतर्पयामि ७ ॐश्वेतद्वीपं
तर्पयामि ८ ॐरत्नाद्रिंतर्पयामि ९ ॐकल्पवृक्षं १० ॐस्वर्णमंडपं ११ ॐपुष्पकविमानं १२ ॐरत्नसिंहासनम् १३
ॐधर्मं १४ ॐज्ञानं १५ ॐवैराग्यं १६ ॐऐश्वर्यंतर्पयामि १७ ॐअधर्मं १८ ॐअज्ञानं १९ अवैराग्यं २० अनैश्वर्यंतर्पयामि २१
ॐमायां २२ ॐअनंतं २३ ॐपद्मं २४ ॐआनंदकंदं २५ ॐसंविन्नालं २६ ॐप्रकृतिमयपत्राणि २७ ॐविकारमयके
सरान् २८ ॐपंचाशद्वर्णबीजाढ्यसर्वतत्वरूपकर्णिकां २९ ॐअंद्वादशकलात्मकार्कमंडलं ३० ॐउंषोडशकलात्मकसोममंडलं ३१
ॐमंदशकलात्मकवह्निमंडलं ३२ ॐसंसत्वं ३३ ॐरंरजः ३४ ॐतंतमः ३५ ॐआंआत्मानं ३६ ॐअंअंतरात्मानं ३७ ॐपंपर
मात्मानं ३९ ॐज्ञानतत्वंतर्पयामि ४० ॐमायातत्वंतर्पयामि ४१ ॐकलातत्वंतर्प्पयामि ४२ ॐविद्यातत्वंतर्प्पयामि ४३ ॐपर
तत्वंतर्प्पयामि ४४ ॐविमलांतर्पयामि ४५ ॐउत्कर्षिणीं ४६ ॐज्ञानां ४७ ॐक्रियां ४८ ॐयोगां ४९ ॐप्रह्वीं ५० ॐसत्यां ५१

51

ॐईशानो ५२ ॐब्रह्मग्रहांतर्पयामि ५३ ॐनमोभगवतेविष्णवेसर्वभूतात्मनेवासुदेवायसर्वात्मसंयोगपीठात्मनेनमः योगपीठा
त्मकंरामंतर्पयामि इतिपीठदेवान्संतर्प्यतत्रकर्णिकायांप्रणवपुटितेरामबीजेसंलिख्यतद्बीजेस्वहृदयाद्देवावाहनस्थापनादि
पूजानन्तरेसांगावरणंदेवंध्यात्वामूलमंत्रमुच्चार्यश्रीरामंतर्पयामि इत्यष्टोत्तरशतवारंतदर्द्धमष्टाविंशतिवारंवादेवस्यमु
खकमलेपरमामृतरूपात्मीर्थजलैःसंतर्प्य श्रींसीतायैस्वाहासीतांतर्पयामि ४ लंलक्ष्मणायनमः लक्ष्मणंतर्प्यया
मि ४ शांशार्ङ्गायनमः शार्ङ्गंतर्पयामि ४ शंशरेभ्योनमः शरांस्तर्पयामि ४ मूलमंत्रेणांजलिंदत्वा हंहनूमतेनमः
हनूमतंतर्पयामि ४ संसुग्रीवायनमः सुग्रीवंतर्पयामि ४ भंभरतायनमः भरतंतर्पयामि ४ लंलक्ष्मणायनमः लक्ष्म
णंतर्प्ययामि ४ शंशत्रुघ्नायनमः शत्रुघ्नंतर्प्ययामि ४ विंविभीषणायनमः विभीषणंतर्प्ययामि ४ मूलमंत्रेणांजलिं
दत्वा रांहृदयायनमः हृदयंतर्प्ययामि रींशिरसेस्वाहाशिरस्तर्पयामि रूंशिखायैवषट् शिखांतर्पयामि रैंकवचायहुं
कवचंतर्प्ययामि रींशिरसेस्वाहाशिरस्तर्पयामि रौंनेत्रायावौषट् नेत्रंतर्प्ययामि रःअस्त्रायफट् अस्त्रंतर्प्ययामि मंत्रा
तेप्रथमावरणात्मकंरामंतर्प्ययामीतिसकृत् ॐआत्मानंतर्प्ययामि ॐअंतरात्मानं ॐपरमात्मानं ॐज्ञानात्मानं
ॐनिवृत्तिं ॐप्रतिष्ठां ॐविद्यां ॐशांतिंतर्प्ययामि मंत्रांतेद्वितीयावरणात्मकंरामंतर्प्ययामीतिसकृत् ॐवासुदे
वंतर्प्ययामि ॐसंकर्षणं ॐप्रद्युम्नं ॐअनिरुद्धं ॐश्रियं ॐशान्तिं ॐप्रीतिं ॐरतिंतर्प्ययामि मंत्रांतेतृतीयाव

रा॰
पू॰प॰
५२

रणात्मकं रामं तर्प्पयामीति सकृत् ॐ हनूमन्तं तर्प्पयामि ॐ सुग्रीवं ॐ भरतं ॐ विभीषणं ॐ लक्ष्मणं ॐ अंगदं ॐ शत्रुघ्नं
ॐ जाम्बवन्तं तर्प्पयामि मंत्रान्ते चतुर्थावरणात्मकं रामं तर्प्पयामीति सकृत् ॐ दृष्टिं तर्प्पयामि ॐ जयन्तं ॐ विजयं ॐ सुराष्ट्रं
ॐ राष्ट्रवर्द्धनं ॐ अकोपं ॐ धर्म्मपालं ॐ सुमन्त्रं तर्प्पयामि मंत्रान्ते पंचमावरणात्मकं रामं तर्प्पयामीति सकृत् ॐ वसिष्ठं तर्प्प
यामि ॐ वामदेवं ॐ जाबालिं ॐ गौतमं ॐ भरद्वाजं ॐ कौशिकं ॐ वाल्मीकं ॐ नारदं ॐ सनकं ॐ सनंदनं ॐ सनातनं
ॐ सनत्कुमारं तर्प्पयामि मंत्रान्ते षष्ठावरणात्मकं रामं तर्प्पयामीति सकृत् ॐ नीलं तर्प्पयामि ॐ नलं ॐ सुषेणं ॐ मैंदं ॐ शरभं
ॐ द्विविदं ॐ वेदनं ॐ गवाक्षं ॐ किरीटं ॐ कुंडलं ॐ श्रीवत्सं ॐ कौस्तुभं ॐ शंखं ॐ चक्रं ॐ गदां ॐ पद्मं तर्प्पयामि मंत्रा
न्ते सप्तमावरणात्मकं रामं तर्प्पयामीति सकृत् ॐ ध्रुवं ॐ धरं ॐ सोमं ॐ आपं ॐ अनिलं ॐ प्रत्यूषं ॐ प्रभासं ॐ वीरभ
द्रं ॐ शंभुं ॐ गिरिशं ॐ अजैकपादं ॐ अहिर्बुध्न्यं ॐ पिनाकिनं ॐ भुवनाधीश्वरं ॐ कपालिनं ॐ दिक्पतिं ॐ स्थाणुं
ॐ भगं ॐ वरुणं ॐ सूर्य्यं ॐ वेदांगं ॐ भानुं ॐ इंद्रं ॐ रविं ॐ गभस्तिनं ॐ यमं ॐ स्वर्णरेतसं ॐ दिवाकरं ॐ मित्रं ॐ विष्णुं
ॐ धातारं तर्प्पयामि मंत्रान्ते अष्टमावरणात्मकं रामं तर्प्पयामीति सकृत् ॐ सुराधिपं इंद्रं तर्प्पयामि ॐ तेजोधिपमग्निं ॐ
प्रेताधिपं यमं ॐ रक्षोधिपं निरृतिं ॐ जलाधिपं वरुणं ॐ प्राणाधिपं वायुं ॐ यक्षाधिपं कुबेरं ॐ विद्याधिपमीशानं
ॐ नागाधिपमनंतं ॐ लोकाधिपं ब्रह्माणं तर्प्पयामि मंत्रान्ते नवमावरणात्मकं रामं तर्प्पयामीति सकृत् ॐ वज्रं त॰

52

र्पयामि ॐ शक्तिं ॐ दंडं ॐ खड्गं ॐ पाशं ॐ अंकुशं ॐ गदां ॐ त्रिशूलं ॐ चक्रं ॐ पद्मं तर्पयामि मूलमंत्रांते दशमावरणात्म
कं रामं तर्पयामीति सकृत् ॐ वषट्कारं तर्पयामि ॐ सत्वं तर्पयामि ॐ रजस्तर्पयामि ॐ तमस्तर्पयामि ॐ मेषादिराशीस्त
र्पयामि ॐ अनंतं तर्पयामि ॐ वासुकिं तर्पयामि ॐ तक्षकं तर्पयामि ॐ कर्कोटं तर्पयामि ॐ पद्मं तर्पयामि ॐ महापद्मं त
र्पयामि ॐ शंखं तर्पयामि ॐ कुलिकं तर्पयामि मूलमंत्रांते एकादशावरणात्मकं रामं तर्पयामीति एकेनांजलिना रामं तर्प
यित्वा रामं तत्स्वभावयित्वा जलमध्ये पंचोपचारैः संपूज्य मूलेन प्राणायामत्रयं कृत्वा ऋष्यादि करषडंगन्यासान्विधाय यथा
शक्ति जपं विधाय जपं भगवते निवेद्य ततो गानि देवे देवं स्वहृदि विसृज्य तीर्थं वसूर्यं विसृज्य सूर्यायार्घ्यं दत्वा गृहदिकृदिक्पा
तिग्रहान्प्रणम्य वस्त्रगालितशुद्धोदकपूर्णं पात्रं गालिनीमुद्रयाभिरक्षितमादाय हृदि रामं स्मरन्मौनी स्वपद्मात्रटाह्यैः स्ना
त्रादि पठन्स्वगृहं गच्छेत् ततो द्वारि स्थितः ॐ देवव्रतमहंते विनेयायाक्रांतमस्मन्मम तन्निःसारयवितान्मे पापं फट् फट्
ते नमः सूर्यः सोमो यमः कालो महाभूतानि पंच च एते शुभाशुभस्येह कर्म्मणो नव साक्षिणः इति पठित्वांतः प्रविश्य पाद्
णौ क्षालयित्वा दीप्रज्वाल्य वस्त्रं गृहं भूमौ गोमयेनोपलिप्तायां सिंदूरादिना रचितं हृन्मंडलम ध्येत्सामनमास्तीर्य श्रीग्राथा
र प्राक्कमलासनाय नमः इत्यासनं संपूज्य तत्र प्राङ्मुख उपविश्य ह्रां ह्रीं सः इति सूर्यमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मा
य ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीसूर्यदेवतायै नमः इति विन्यस्य सूर्यार्घ्यदाने विनियोगः इति कृतांजलि

वंदेत् अंगुष्ठयोः ह्रां हृदयाय नमः तर्जन्योः ह्रीं शिरसे स्वाहा मध्यमयोः ह्रूं शिखायै वषट् अनामिकायोः ह्रैं कवचाय हुम्
कनिष्ठिकयोः ह्रौं नेत्रत्रयाय वौषट् करतलकरपृष्ठयोः ह्रः अस्त्राय फट् इति करयोर्विन्यस्य तानेव मंत्रान् हृदयशिरः शिखा
कवचनेत्र स्थानेषु विन्यस्यास्त्रमंत्रेण तालत्रयं दशदिग्बंधनं च कृत्वा रक्ताम्बुजासनम शेषगुणैकसिंधुं भानुं समस्तजगतामधि
पं भजामि [illegible] पद्मद्वयाभयवरान् दधतं कराब्जैर्माणिक्यमौलिमरुणांगरुचिं त्रिनेत्रं इति सू
र्यं तन्मंडले सांगावरणं ध्यात्वा स्व पुरश्चतुरस्रहृत त्रिकोणात्मके मंडले ह्रां ह्रीं सः सूर्याधारमंडलाय नमः इति मंडलं संलिप्य त
त्र साधारं शंखं जलपूरितं ताम्रपात्रे निधाय सूर्यमंत्रेण शुद्धोदकेनापूर्य तिलयवसर्षपश्यामाकतंडुलकुशाग्रगंधरक्तपुष्पाणि
रक्तचंदनं च निक्षिप्य कुशैराच्छाद्य तत्पात्रं कराभ्यामाच्छादयन् सूर्यमंत्रमष्टोत्तरशतं जपित्वा जानुभ्यामवनीं गतस्तत्पात्रं कराभ्याम्
मामस्तकमुद्धृत्य पूर्वोक्तरूपं सूर्यं रामरूपाभेदेन ध्यायन् ह्रां ह्रीं सः सप्तहयाश्विन नक्षत्रयोगकरणपरिहृतासनसंस्थित श्रीसू
र्याय एषतेऽर्घ्यः स्वाहा इति सूर्यायार्घ्यं दत्वा तन्मंत्रं यथाशक्ति जपित्वा जपं निवेद्य सूर्यं स्तुत्वा प्रणमेदिति सूर्यार्घ्यविधिः ततः पूजामं
डपद्वारं गत्वा तत्र वक्ष्यमाणविधिना सामान्यार्घ्यं संस्थाप्य तदशक्तौ ताम्रादिपात्रस्थेन जलेन धेनुमुद्रयाऽमृतीकृतेन जलेन वा
पूजामंडपस्य द्वारं प्रोक्ष्य द्वारस्योर्ध्वशाखायां ॐ विघ्नाय नमः तद्दक्षिणे ॐ महालक्ष्म्यै नमः वामे ॐ सरस्वत्यै नमः मध्ये
ॐ द्वारश्रियै नमः द्वारस्य वामदक्षिणशाखयोः ॐ गं गणपतये नमः ॐ क्षौं क्षेत्रपालाय नमः ॐ शंखनिधिवसुधाराभ्यां नमः

ॐ पद्मनिधिवसुमतीभ्यां नमः ॐ मायाशक्त्यै नमः ॐ विघ्नशक्त्यै नमः ॐ गंगायै नमः ॐ यमुनायै नमः ॐ धात्रे नमः ॐ विधा-
त्रे नमः इति देहलीक्रमेण संपूज्य ॐ अधोदेहल्यै नमः वामदक्षिणद्वारपार्श्वयोः ॐ नंदाय नमः ॐ सुनंदाय नमः इति द्वारपा-
लौ संपूज्योत्तरद्वारं गत्वा तद्वदेवाभ्युक्ष्य प्राग्वद्विघ्नादिदेहल्यंतं प्रोक्तक्रमेण संपूज्य द्वारपार्श्वयोः ॐ चंडाय नमः ॐ प्रचंडाय नमः
इति द्वारपालौ संपूज्य पूर्वद्वारं गत्वा तथैवाभ्युक्ष्य विघ्नादिदेहल्यंतमभ्यर्च्य द्वारपार्श्वयोः ॐ बलाय नमः ॐ प्रबलाय न-
मः इति द्वारपालौ संपूज्य दक्षिणद्वारं गत्वा तथैवार्घ्यबिन्दुभिरभ्युक्ष्य विघ्नादिदेहल्यंतमभ्यर्च्य द्वारपार्श्वयोः ॐ भद्राय नमः
ॐ सुभद्राय नमः इति द्वारपालौ पूजयेत् पुनः पश्चिमद्वारं गत्वास्त्रमंत्रेण तालत्रयपूर्वकं द्वारं समुद्घाट्य सर्षपान्तत्र स- द्य
मान्यादायास्त्रमंत्रेण सप्तधाभिमंत्र्य अपक्रामंतु भूतानि पिशाचाः प्रेतगुह्यकाः ये चात्र निवसंत्यन्ये देवता भुवि संस्थि-
ताः अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया इत्यनेनास्त्रमंत्रं प्रजपन्नाराच-
मुद्रया मंडपांतः प्रक्षिप्य तस्मान्निर्गच्छंतो विघ्नानो स्ववामांगसंकोचेन मार्गं दत्वा अस्त्रमंत्रं स्मरन्वामपार्ष्णिघातत्रयेण भौ-
मान् ऊर्ध्वोर्ध्वं तालत्रयेणांतरिक्षगानतिरमहष्ट्यावलोकनेन दिव्यान्विघ्नानुत्सार्य दक्षिणपादपुरःसरं देहलीमलंघयन्वाम-
शाखामाश्राय पंचगव्यार्घ्यतोयाभ्यां घंटावादन पूर्वकं मंडपाभ्यंतरं प्रोक्ष्य मंडपस्य नैरृतकोणे वास्तुपुरुषाय नमः
तत्रैव वास्त्वधीशाय ब्रह्मणे नमः इति संपूज्य मंडपस्येशानकोणे रक्तवर्णाय रक्तद्वादशशक्तिसहिताय श्रीदीपना-

रा॰
पू॰प॰
५८

54

पायनमः इतिदीपनाद्यम् संपूज्य अतितीक्ष्णमहाकायकल्पान्तदहनोपम भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि इति भैर
वाज्ञां गृहीत्वा अस्त्राय फडिति मंत्रेण मध्यस्थां पूजावेदीं गत्वा तत्रस्वासनस्थाने मूलमंत्रेण संवीक्ष्य अस्त्रमंत्रेण संप्रोक्षते
नैव मंत्रेण ऊं शौः स्त्रिः संताड्य कवचमंत्रेण अभ्युक्ष्य तत्र चैलाजिनकुशोत्तरं हृल्लेखया मात्रं वा तत्र संवत्सरं शुक्लो क्षिप्ते स्वासनं
मालीर्ष्य मूलमंत्रेण द्वादशधाभिमंत्रितजलेनाभ्युक्ष्य शिरसि मेरुपृष्ठऋषये नमः मुखे सुतलंछन्दसे नमः हृदये पृ
थिव्यै देवतायै नमः आसने विनियोगः इति कृतांजलिर्वदेदिति ऋष्यादिविन्यस्य ओं पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृ
ता त्वं च धारय मां देवि पवित्रं कुरु चासनमित्यासनमभिमंत्र्य ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य त
त्र प्राङ्मुख उदङ्मुखो वा पद्मस्वस्तिकसिद्धासनानामन्यतमेनासनेनोपविश्य आसनस्य स्वदक्षिणाग्नेयकोणादि चतुष्कोणे
षु प्राग्दक्षिणे पन गं गणपतये नमः डें दुर्गायै नमः क्षौं क्षेत्रपालाय नमः सें सरस्वत्यै नमः इति संपूज्य गंधपुष्पाक्षता
दीनि पूजाद्रव्याणि स्वदक्षिणभागे निधाय ह्रां ह्रूं फट् इति दिव्यदृष्ट्यावलोक्य कर्पूरादिवासितशुद्धोदकपूर्णं वामभागस्थं ऊं
भं अत्र इति वामपाणिनास्पृशन् दक्षिणकरांगुल्यग्रेण करांगुल्यग्रेण क्षौं इति ऊं भस्थं जलं संस्पृश्य रं इति दीपशिखां स्पृष्ट्वा
करौ प्रक्षाल्य कृतांजलिः शिरसि कमलासनात्स्वदेशिकोत्तमपर्यंतेभ्यो नमः वामे गुं गुरुभ्यो नमः दक्षिणे गं गणपतये नमः
अग्रे स्वेष्टदेवाय श्रीरामाय नमः इति प्रणम्य वंदनस्रगंधपुष्पाण्युपहृत्य मंत्रेण मदीयिताकरो मरभीकृत्य तत्त्वमाचाय ओं ते स

स्थं

वैं विलयं यान्तु ये मां हिंसन्ति हिंसकाः मृत्युरोगभयक्लेशाः पतन्तु रिपुमस्तके इति पठित्वा अस्त्रमंत्रेण नाराचमुद्रया रोशान्यां दिशि
द्रे प्रक्षिप्य अस्त्रमंत्रेण पुनः करयोरस्त्राख्यामामार्जनेन शुद्धिं विधाय अस्त्रमंत्रेणोर्ध्वोर्ध्वतालत्रयमंगुष्ठतर्जन्युत्थशब्देन दशदिग्बंधनं
च कृत्वाऽस्त्रमंत्रेण त्रिशूलमुद्रामुद्दिश्य भूमिस्थौ मणिबंधेः सौम्यसंस्पृष्टौ करौ सम्मुद्रीतेन परितः पार्ष्णिघातेन त्रिभ्रीमयन्नग्निप्राकार
त्रयं विधाय तन्मध्ये गगनमात्मानं विचिन्त्य वक्ष्यमाणविधिना मूलमंत्रेण प्राणायामत्रयं कृत्वा भूतशुद्धिं कुर्यात् तत्र श्रीरामपूजायोग्य
तासिद्ध्यर्थं भूतशुद्धिमहं करिष्ये इति संकल्प्य शिरसि सहस्रदले श्रीरामरूपां परां देवतां ध्यात्वा हृदि दीपशिखाकारं जीवा
ज्योतिर्ध्यात्वा आधारे सार्धसप्ततिवलितसर्पत्वरूपां कुंडलिनीं ध्यात्वा सर्वे यंत्रे रेशति मे आभ्यां सं[illegible]लितवह्निना मेरुदंडमध्ये दंडा ज्ये=६
कारकुंडलिनीं शिरसि नानाभौच्छितां ककुपीमुद्रया च्छापितां विभावतं त्रहं सइति मंत्रेण करद्वयांकुशमुद्रया जीवज्योतिः स्वा
पिते विचिन्त्य सर्वावर्त्मना शिरसि कमलकर्णिकाश्रितं सेमाशिवगुरुरूपे रामे परतेजसि योजितमिति भावयित्वा पादादिजान्व
पर्यन्तं पृथिवीमंडलं चतुरस्रं वज्रलाञ्छितं पीतवर्णं लंबीजयुक्तं नाभिपर्यन्ते आप्यमंडले विलापयामि जान्वादिनाभिपर्यन्ते आप्य
मंडलं अर्धचन्द्राकारं शुक्लवर्णं पद्मलाञ्छितं वंबीजयुक्तं कंठपर्यन्ते वह्निमंडले विलापयामि नाभ्यादिकंठपर्यन्तं वह्निमंडलं स्वस्ति
कोपेतं त्रिकोणं रक्तवर्णं रंबीजयुक्तं भ्रूपर्यन्ते वायुमंडले विलापयामि कंठात् भ्रूपर्यन्तं वायुमंडलं षड्बिन्दुलाञ्छितं षट्को
णं कृष्णवर्णं यंबीजयुक्तं ब्रह्मरन्ध्रपर्यन्ते गगनमंडले विलापयामि भ्रूमध्याद्ब्रह्मरन्ध्रपर्यन्तं गगनमंडले वर्तुलं ध्वजलाञ्छितं

रा.
भू.प.
५५

55

ध्रुम्रवर्णे हंबीजयुक्ते शिरसि सहस्रपत्रे स्थिते परे ज्योतिषि रामरूपे विलापयामीति विलाप्य सकलप्रपंचशून्यरामोऽहमिति विभाव
केवले शरीरे वामकुक्षौ पापपुरुषं चिन्तयेत् तद्यथा वामकुक्षिस्थितं पापंपुरुषं कज्जलप्रभं ब्रह्महत्याशिरस्कंधं स्वर्णस्तेयभु
जद्वयं सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं ख
ड्गचर्मधरं क्रुद्धं कुक्षौ पापं विचिंतयेत् इति पापपुरुषं विचिंत्य वामनासारंध्रेण वायुमापूर्य नाभिस्थषट्कोणाकारे वायुमं
डले संयोज्य तत्र यमिति वायुबीजे धूम्रवर्णे संचिंत्य कुंभकेन यंबीजमावर्तयेत् ततस्तेन प्रचंडवायुना सपापपुरुषं स्वदेहं संशोष्य तं वायुं
दक्षिणनासया विरेच्य पुनर्दक्षिणनासया वायुमापूर्य मूलाधारे त्रिकोणाकारे वह्निमंडले संयोज्य तत्र रमिति वह्निबीजे रक्तवर्णं
विचिंत्य कुंभकेन रमिति बीजमावर्तयेत् ततस्तेन महावह्निना सपापपुरुषं स्वदेहं संदग्ध्य पापपुरुषभस्मना सह तं वायुं वामनासया विरे
च्य पुनर्वामनासया वायुमापूर्य ललाटेऽर्धचंद्राकारे चंद्रमंडले संयोज्य तत्र वमिति अमृतबीजे शुक्लवर्णं विचिंत्य कुंभकेन वंबीजमा
वर्तयेत् ततस्तेन अमृतधारया स्वदेहभस्म संसिच्य ततः करचरणाद्यवयवयुतं शरीरं समुत्पन्नं विभाव्य तं वायुं दक्षिणनासया विरेच
येत् ततः सोऽहमिति मंत्रेण रामे लीनां जीवकलां ब्रह्मरंध्रात् हृदि विन्यस्य रामादाकाशः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृ
थिवी इति क्रमेणाकाशादीनि रामे लीनानि ततानि स्वस्वस्थाने स्थापितानि भाव्य तेजोरूपं शरीरं देवताराधनयोग्यमिति भावयेत् इति
भूतशुद्धिः अथ प्राणप्रतिष्ठा सा यथा शिरसि ब्रह्मविष्णुशिवेभ्य ऋषिभ्यो नमः मुखे ऋग्यजुःसामच्छंदोभ्यो नमः हृदये

दी=२ धा=३ तरे

ॐ आं ह्रीं क्रौं एं वं ४ ऐं वाक्पाणिपादपायूपस्थात्मने
कवचाय हुम् = ३

परापाणशक्तिर्देवतायैनमः गुह्ये श्रांवीजायनमः पादयोः ह्रीं शक्तयेनमः हृदि क्रौंकीलकायनमः इतिविन्यस्य ममप्राणप्र
तिष्ठार्थे विनियोगः इतिकृतांजलिर्वदेत् ततः ॐ आं ह्रीं क्रौं अंकंखंगंघंङं आं पंचभूतात्मने हृदयायनमः ॐ आं ह्रीं क्रौं इंचं ४
ईं पंचविषयात्मने शिरसे स्वाहा ॐ आं ह्रीं क्रौं उंटं ४ ऊं ज्ञानेन्द्रियात्मने शिखायै वषट् ॐ आं ह्रीं क्रौं एंपं ४ ऐं कर्मेन्द्रियवि
षयात्मने नेत्राय वौषट् ॐ आं ह्रीं क्रौं ओंयं ४ अः अंतःकरणचतुष्टयात्मने अस्त्राय फट् इतिमंत्रान् अंगुष्ठादितलान्तं कर
योर्विन्यस्य हृदयादिषडंगेष्वपि विन्यसेत् ततो नाभ्यादिपादद्वयान्तं आं नमः कंठादिनाभ्यन्ते ह्रीं नमः मूर्द्धादिकंठा
न्ते क्रौं नमः ततो हृदयकमले वायव्यदले यं त्वगात्मने नमः आग्नेये रं असृगात्मने नमः पश्चिमे लं मांसात्मने नमः पूर्वे
अ वं मेदसात्मने नमः ईशाने शं अस्थ्यात्मने नमः नैर्ऋते षं मज्जात्मने नमः उत्तरे सं शुक्रात्मने नमः दक्षिणे हं प्राणा
त्मने नमः कर्णिकायां हंसः सोहं जीवात्मने नमः इतिन्यसेत् ततो ध्यानम् रक्तां[redacted]भोताः हृणपद्मसे[redacted]पाशांकुशा
विद्युच्छरासवाणान् शूलं कपालं दधतीं कराग्रैः रक्तां त्रिनेत्रां प्रणमामि देवीं वामाद्यूर्ध्वं योरधेतदायधः [redacted] योरन्येतदा
यधः स्पयोरपरे इत्यांगुष्ठध्याने शराः सौधनुः इतिध्यात्वा हृदि हस्तं दत्त्वा ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहं
ममप्राणा इह प्राणाः ॐ आमित्यादि पठित्वा ममजीव इह स्थितः पुनः ॐ आमित्यादि पठित्वा मम सर्वेन्द्रियाणि इह
सर्वेन्द्रियाणि पुनः ॐ आमित्यादि पठित्वा ममवाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा त

[redacted]
स्था = ५

स्थ = ४

द्वि

ग्र॰
पृ॰ प
५८

56

वामकरपृष्ठ्वा
मकर

तो हृदये स्पृष्ट्वा षोडशप्राणवायुमायथोवितसंस्कारान्विभाव्य निजवपुर्ज्योतीरूपं ध्यायेत् इति प्राणप्रतिष्ठाविधिः अथ मातृ
कान्यासः तत्र मातृकार्णैः प्राणायामत्रयं कृत्वा मातृकान्यासं कुर्यात् तत्र स्वरैः पूरकः कादिभिः कुंभः यादिभी रेचकः इति
प्राणायामक्रमो ज्ञेयः इत्थं प्राणायामत्रयं कृत्वा शिरसि पादपर्यंतं मातृकावर्णव्यापकं विधाय शिरसि ब्रह्मणे ऋषये न
मः मुखे गायत्रीछंदसे नमः हृदये मातृकासरस्वतीदेवतायै नमः गुह्ये हल्भ्यो बीजेभ्यो नमः पादयोः स्वरेभ्यः शक्तिभ्यो नमः
हृदि व्यक्तये कीलकाय नमः इति विन्यस्य मातृकान्यासे विनियोगः इति कृतांजलिर्वदेत् ततो दक्षिणकरतले ॐ अं नमः तत्पृ
ष्ठे ॐ आं नमः दक्षकरमध्ये ॐ इं नमः दक्षांगुष्ठादिवामांगुष्ठांतेषु दशस्वंगुलीषु चतुर्थस्वरादि ॐकारांतं विन्यस्य वामक
रमध्ये तत्पृष्ठतलेषु औंकारादिविसर्गांतं न्यसेत् अयं केवलो न्यासः ततो वामकरतलादिदक्षकरतलांते विसर्गाद्यकारां
तान्स्वरान्सबिंदुकान्न्यसेत् अयं संहारन्यासः दक्षकरतलादिवामकरतलांतं सविसर्गान्स्वरान्न्यसेत् अयं सृष्टिन्यासः
वामकरकनिष्ठादितलावधि अष्टौ स्वरान्बिंदुविसर्गयुतान् लृकारादीन्विन्यस्य दक्षकरतलादितत्कनिष्ठांतं अकारादिऋ
कारांतानष्टौ स्वरान्बिंदुविसर्गयुतान्न्यसेदिति स्थितिन्यासः एवं मातृकास्वरान्विन्यस्य ककारादिणकारांतान्सबिंदुका
न्दक्षिणांगुष्ठमूलादितत्कनिष्ठाग्रपर्वांतेषु पंचदशस्थानेषु विन्यस्य वामांगुष्ठादितत्कनिष्ठाग्रांतेषु तादिशांतान्स
बिंदुकान्विन्यस्य करहृदये यं गुष्ठादिकनिष्ठांतेषु गपदेव षादिलांतान्सबिंदुकान्न्येव वर्णान्विन्यसेदिति मातृकावर्णैः

करशुद्धिंविधाय अंगुष्ठयोः अंकंखंगंघंङंआंहृदयायनमः तर्जन्योः इंचंछंजंझंञंईंशिरसेस्वाहा मध्यमयोः उंटंठंडं
ढंणंऊंशिखायैवषट् अनामिकयोः एंतंथंदंधंनंऐंकवचायहुं कनिष्ठिकयोः ओंपंफंबंभंमंऔंनेत्रत्रयायवौषट् करतल
करपृष्ठयोः अंयंरंलंवंशंषंसंहंक्षंअःअस्त्रायफट्इतिकरयोर्विन्यस्यैतानेवमेवान् हृदयशिरःशिखाकवचनेत्रेषुविन्य
स्यास्त्रमेवेणतालत्रयेदशदिग्बंधनेकृता बोमेंद्वौरसनाग्रेकर्णिकमवांद्दंहैःस्फुरत्केसरेयच्चान्तर्गतपंचवर्गयशालाः
र्णादित्रिवर्गक्रमात् आधारस्वाधिस्थलातलाकृतिपुनाद्दोर्णीपुरेणाहतेवर्णाज्ञाशिरसिस्थितेविषमदप्रबोधिसिमृत्तेजये
इतिब्रह्मरंध्रेवर्णैरविदेवसमाणेमातृकाहृपेध्यात्वाअंतर्मातृकापूर्वंवहिर्मातृकान्यासंकुर्यात् उक्तंचमेरुतंत्रप्रकाशे
अदावभ्यंतरेन्यस्यषडाधारेतुपार्वति अकारादिक्षकारांतान्स्थूलेदेहेवहिर्न्यसेदिति तथान्तर्न्यासक्रममाहदक्षिणा
मूर्तिःकंठपत्रेषुजेकंठेस्वरान्समभ्यर्च्यविन्यसेत् हृपर्कपत्रतद्वर्णांश्चाभौदशदलेन्यसेत् हृपर्कपत्रेतद्वर्णांश्चाभौद
शदलेन्यसेत् दशावर्णान्लिंगमूलेषड्दलेषुतथेश्वरि चतुर्दलेतथाधारेचतुर्वर्णान्नितोन्यसेत् भ्रूमध्येद्विदलेहक्षावि
न्यस्यमातृकांन्यसेदिति तद्वर्णान्द्वादशवर्णान्कादिवान्तानितिसर्वः दशवर्णान्डादिफान्तान् षड्वर्णान्वादिलां
तान् चतुर्वर्णान्वादिसान्तानेतानितिडपुतान्न्यसेत् बिंदुयुक्तान्त्रवाणीतिज्ञानार्णववचनात् अथैतत्प्रयोगः तत्रमूला
धारस्थनिशुतामुद्बुद्धांकिकुंडली हलत्यावकसंकाशांमृत्युतेजःस्वरूपिणी मूलाधाराच्छिरःपद्मंस्पृशंतीविद्युदाकृ

रा०
पू० प
५०
57

ॐ ग्प्रः नमः

तिः तयास्त्रष्टशिरः पद्मादमृतौघस्वरूपिणः निर्गतान्मातृकावर्णान्सुषुम्णावर्त्मनाततः व्यापयित्वाखिलान्सर्वान्नेवं ध्या
त्वाथविन्यसेत् इतिवर्णांस्तन्नुं ध्यात्वा कंठे विशुद्धिचक्रे षोडशदलेकमलस्द्देम्रविधूम्रवर्णंध्यात्वा तद्दलेषु पूर्वादिप्रादक्षिण्ये
न ॐ अं नमः ॐ आं नमः ॐ इं नमः ॐ ईं नमः ॐ उं नमः ॐ ऊं नमः ॐ ऋं नमः ॐ ॠं नमः ॐ ऌं नमः ॐ ॡं नमः ॐ एं नमः ॐ
ऐं नमः ॐ ओं नमः ॐ औं नमः ॐ अं नमः इतिविन्यस्य हृदये अनाहतचक्रे द्वादशदलेकमले सिंदूराभं ध्यात्वा तद्दलेषु
पूर्वादिप्रादक्षिण्येन ॐ कं नमः ॐ खं नमः ॐ गं नमः ॐ घं नमः ॐ ङं नमः ॐ चं नमः ॐ छं नमः ॐ जं नमः ॐ झं नमः ॐ ञं
नमः ॐ टं नमः ॐ ठं नमः ततो नाभिमंडले मणिपूरचक्रे दशदलकमले नीलवर्णं ध्यात्वा तद्दलेषु पूर्वादिप्रादक्षिण्ये
न ॐ डं नमः एवं ढं णं तं थं दं धं नं पं फं इतिविन्यस्य लिंगमूले स्वाधिष्ठानचक्रे षड्दलेकमले रक्तवर्णं ध्यात्वा तद्दलेषु प्रादक्षि
ण्येन ॐ बं नमः एवं भं मं यं रं लं इतिविन्यस्य ततो गुदमेढ्रांतरे मूलाधारचक्रे चतुर्दलेकमले स्वर्णवर्णं ध्यात्वा तद्दलेषु प्रादक्षि
ण्येन ॐ वं नमः एवं शं षं सं इतिविन्यस्य ततो भ्रूमध्ये आज्ञाचक्रे द्विदलेकमले शुक्लवर्णं ध्यात्वा तद्दलयोः पूर्वदले ॐ हं नमः
पश्चिमदले ॐ क्षं नमः इत्यंतर्मातृकाविन्यस्य बहिर्मातृकान्यासं कुर्यात् सयथा तत्र ध्यानं पंचाशद्वर्णभेदैर्विहितवदन
दोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदातां अक्षस्रक्कुंभचिंतालिखितवरकरां त्रीं
क्षणां पद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि चिंतालिखितेपुस्तके दक्षिणेहृत्करमारभ्यदक्षिण

१०

षः करपर्यन्तमाङ्गुष्ठध्याने इति श्रीवीकेशवत्सरे ऽसत्त्वाणीरविंदे मातृकामरसेनी ध्याता अंगुष्ठानामिकाभ्यां तन्न्यासः सर्वत्रस
म्मत इति पद्मवाहिनीवचनादंगुष्ठानामिकाभ्यां मातृकान्यासे क्रियात शिरसि ॐ अं नमः मुखवृत्ते ॐ आं नमः दक्षिणनेत्रे ॐ
इं नमः वामनेत्रे ॐ ईं नमः दक्षिणकर्णे ॐ उं नमः वामकर्णे ॐ ऊं नमः दक्षिणनासापुटे ॐ ऋं नमः वामनासापुटे ॐ ॠं
नमः दक्षिणगण्डे ॐ लृं नमः वामे ॐ लॄं नमः ओष्ठे ॐ एं नमः अधरे ॐ ऐं नमः ऊर्ध्वदन्तपंक्तौ ॐ ओं नमः अधोदन्तपंक्तौ ॐ
औं नमः मूर्ध्नि ॐ अं नमः मुखे ॐ अः नमः दक्षिणबाहुमूले ॐ कं नमः कूर्परे ॐ खं नमः मणिबन्धे ॐ गं नमः
अंगुलिमूले ॐ घं नमः अंगुल्यग्रे ॐ ङं नमः वामबाहुमूले ॐ चं नमः कूर्परे ॐ छं नमः मणिबन्धे ॐ जं नमः अंगुलिमू
ले ॐ झं नमः अंगुल्यग्रे ॐ ञं नमः दक्षोरुमूले ॐ टं नमः जानुनि ॐ ठं नमः गुल्फे ॐ डं नमः अंगुलिमूले ॐ ढं नमः
अंगुल्यग्रे ॐ णं नमः वामोरुमूले ॐ तं नमः जानुनि ॐ थं नमः गुल्फे ॐ दं नमः अंगुलिमूले ॐ धं नमः अंगुल्यग्रे ॐ नं
नमः दक्षिणपार्श्वे ॐ पं नमः वामे ॐ फं नमः पृष्ठे ॐ बं नमः नाभौ ॐ भं नमः उदरे ॐ मं नमः उदरात् हृदयपर्यन्ते ॐ
यं नमः हृदयादिदक्षिणकक्षापर्यन्ते ॐ रं नमः हृदयात्ककुत्पर्यन्ते ॐ लं नमः हृदयादिवामकक्षापर्यन्ते ॐ वं नमः
हृदयादिदक्षिणपादाग्रपर्यन्ते ॐ सं नमः हृदयादिवामपादाग्रपर्यन्ते ॐ हं नमः हृदयादिनाभ्यन्ते ॐ लं नमः हृदया
दिमुखान्ते ॐ क्षं नमः इति केवलमातृकान्यासः अथ बिन्दुमातृकान्यासः तत्र सारसंग्रहे न्यासे हि द्वान्तिकामेतां सं

हृदयादिदक्षिणक
राग्रपर्यन्तं शं नमः
हृदयादिवामकराग्र
पर्यन्तं षं नमः

हारेण विलोमतः पूर्वोक्तायवमन्यायाः षडंगे वतथा भवेदिति अथ प्रयोगः तत्रऋष्यादिकरषडंगन्यासान् पूर्वोक्तायव
ग. ध्यानेन अक्षस्रजं हरिणपोतमुदग्रटंकं विद्याकरैरविरतं दधतीं त्रिनेत्रां अर्धेन्दुमौलिमरुणामरविन्दवासां वर्णेश्वरीं प्रण
पू.प. मतस्तनभारनम्रां विद्यापुस्तकं दक्षाधूर्ध्वकरयोराद्येतदाधः स्वयोरितरे इति वर्णेश्वरीं ध्यात्वा मस्तकादि हृदयान्ते
५८ ॐ लं नमः नाभ्यादि हृदयान्तं ॐ हं नमः दक्षिणपादाग्रादि हृदयान्ते ॐ सं नमः वामकराग्रादि हृदयान्ते ॐ षं नमः दक्षि
णकराग्रादि हृदयान्ते ॐ शं नमः इत्यादि ललाटे ॐ अं नमः इत्येवं संहारक्रमेण यस्य वर्णस्य यत्स्थानं तत्र तत्र तं वर्णं न्य
58 सेत् इति संहारमातृकान्यासः अथ विसर्गमातृकान्यासः तत्र सारसंग्रहे सविसर्गसृष्टिमार्गेण विन्यसेत्सर्गसंयुता
मिति अथ प्रयोगः तत्रऋष्यादिध्यानान्ते केवलमातृकास्थाने न्यासोक्तमेव ॐ अः नमः ॐ आः नमः इत्यादि क्षकारान्तान्वि
सर्गान्तान्वर्णान् केवलमातृकास्थानेष्वेवं न्यसेत् इति सविसर्गसृष्टिमातृकान्यासः अथ बिंदुविसर्गयुक्तास्थितिमा
तृकान्यासः सारसंग्रहे बिंदुसर्गयुतां स्थित्या डादिष्ठाणान्तिकां न्यसेत् पूर्वोक्तायवमन्यायाः षडंगं च न यथा भवेदिति
अथ प्रयोगः तत्रऋष्यादिकरषडंगन्यासः केवलमातृकान्यासवदेव ध्यानेन सिन्दूरकान्तिममिताभरणां त्रिनेत्रां विद्याक्षसू
त्रमृगपोतवरं दधानां पार्श्वस्थितां भगवतीमपि काञ्चनाभां ध्यायेत्कराब्जधृतपुस्तकवर्णमालां वामाधधः करयोराद्येन
दाधूर्ध्वयोरन्ये इत्याद्यूह्य ध्याने इति वर्णेश्वरीं ध्यात्वा दक्षिणगुल्फे ॐ डं नमः अंगुलिमूले ॐ ढं नमः अंगुल्यग्रे ॐ ण :

नमः वामोरुमूले ॐ तं नमः इत्यादि हृदयादिमध्यान्ते ॐ लं नमः इत्यन्तं केवलमातृकास्थानेष्वेव विन्यस्य पुनः
ललाटे ॐ अं नमः मुखवृत्ते ॐ आं नमः इत्यादि दक्षिणजानुनि ॐ वं नमः इत्यन्ते बिन्दुविसर्गयुक्तान् वर्णान् केवल
मातृकास्थानेष्वेव न्यसेत् इति स्थितिमातृकान्यासः अत्र यतिवै[illegible]नसैः कार्यः संहारान्तः कुलेश्वरिन्यासो गृहस्थैः
स्थित्यन्तः सृष्ट्याद्यो वर्णिनो भवेदिति कुलार्णववचनात् यतिवैखानसैरादौ सृष्टिस्ततः स्थितिस्ततः संहार इति क्रमेण
कार्यः गृहस्थैस्तु प्रथमं संहारस्ततः सृष्टिस्ततः स्थितिरिति क्रमेण कार्यः ब्रह्मचारिभिरादौ स्थितिस्ततः संहार
स्ततः सृष्टिरिति क्रमो विधेयः अत्र केचित् गृहस्थैः सृष्टिस्थितिसंहारानन्तरं पुनः सृष्टिस्थितीवकार्ये तेनास्थित्य
न्तता स्यात् एवं ब्रह्मचारिभिः सृष्टिस्थितिसंहारानन्तरं पुनः सृष्टिः कार्या एवं कृते सृष्ट्यन्तता यतिवैखानसैः सृष्टिस्थि
तिसंहारानन्तरं पुनः सृष्टिस्थितिसंहारानन्तरं पुनः सृष्टिः कार्या एवं कृते स्थितिन्यासानां फलं विष्णुयामले संहृते दो
षसंहारः सृष्टेश्च शुभसृष्टयः स्थितेश्च शान्तिर्विन्यासे तस्मात्कार्यस्त्रिधा बुधैः अथ केशवादिमातृकान्यासः सारसंग्रहे
केशवादिहृदा युक्तो न्यसेत्तावामरविंदको पादीन धातुयुता न्यसेत्प्राणशक्त्यात्ममूर्तिभिः साध्यनारायणऋषिर्गायत्र
छन्द उच्यते लक्ष्मीनारायणो देवो देवतापरिकीर्तितः षड्दीर्घयुक्तकामान्तैः प्राग्वदङ्गैः षडङ्गकमिति अयमस्य शिरोव
दनहृतादिस्थानेष्वेव विधिः स्मृतः ॐकारं मारबीजं वा मातृकाक्षरमेव च एकैकं वे तथा शक्तिमेकोनमश इति क्रमः अथ

गा॰
सू॰प॰
५५

59

प्रयोगः तत्र साध्यनारायणाय ऋषये नमः शिरसि गायत्रीछन्दसे नमः मुखे लक्ष्मीनारायणाय देवतायै नमः हृदि ह
ल्भ्यो बीजेभ्यो नमः गुह्ये स्वरसंयुक्ताय शक्तये नमः पादयोः व्यक्ताय कीलकाय नमः हृदि शरीरशुद्धिपूर्वकचतुर्वर्गसि
द्ध्यर्थे विनियोग इति कृताञ्जलिर्वदेत् इति ऋषिन्यासं विधाय ॐ कं खं गं घं ङं श्रां क्रां हृदयाय नमः ॐ चं छं जं झं ञं ई क्रीं शि
रसे स्वाहा ॐ टं ठं डं ढं णं ऊं क्रूं शिखायै वषट् ॐ तं थं दं धं नं ऐं क्रैं कवचाय हुं ॐ पं फं बं भं मं श्रौं क्रौं नेत्राय वौषट् ॐ यं रं लं वं शं षं
सं हं ळं क्षं अः क्रः अस्त्राय फट् इति मंत्रैः प्राग्वत् करषडंगन्यासं कृत्वा विद्युद्विदम्बुजरामृतजं भपद्मकौमोदकीदरसुदर्श
नशोभिहस्तं सौदामिनीमदिरकांतिविभाति लक्ष्मीनारायणात्मकमवेहि तमात्मपूर्तेः वपुरितिशेषः वामाधः
करमारभ्य दक्षिणाधः करपर्यंतमायुधध्याने इति ध्यात्वा संपूज्य ॐ ह्रीं अं केशवाय कीर्त्यै नमः ॐ ह्रीं आं नारा
यणात्मकान्त्यै नमः ॐ ह्रीं इं माधवाय तुष्ट्यै नमः ॐ ह्रीं ईं गोविंदाय पुष्ट्यै नमः ॐ ह्रीं उं विष्णवे धृत्यै नमः ॐ ह्रीं ऊं म
धुसूदनाय शान्त्यै नमः ॐ ह्रीं ऋं त्रिविक्रमाय क्रियायै नमः ॐ ह्रीं ॠं वामनाय दयायै नमः ॐ ह्रीं ऌं श्रीधराय मेधायै
नमः ॐ ह्रीं ॡं हृषीकेशाय हर्षायै नमः ॐ ह्रीं एं पद्मनाभाय श्रद्धायै नमः ॐ ह्रीं ऐं दामोदराय लज्जायै नमः ॐ ह्रीं ओं
वासुदेवाय लक्ष्म्यै नमः ॐ ह्रीं औं संकर्षणाय सरस्वत्यै नमः ॐ ह्रीं अं प्रद्युम्नाय प्रीत्यै नमः ॐ ह्रीं अः अनिरुद्धाय र
त्यै नमः ॐ ह्रीं कं चक्रिणे जयायै नमः ॐ ह्रीं खं गदिने दुर्गायै नमः ॐ ह्रीं गं शार्ङ्गिणे प्रभायै नमः ॐ ह्रीं घं खड्गिने सत्या

रोय

यैनमः ॐ ह्क्लीं इं शाखिने वेडायै नमः ॐ ह्क्लीं वं हलिने वा[illegible]नमः ॐ ह्क्लीं कं मुसलिने विलासिन्यै नमः ॐ ह्क्लीं जं शूलि-

ने विजयायै नमः ॐ ह्क्लीं डं पाशिने विरजायै नमः ॐ ह्क्लीं जं अंकुशिने विश्वायै नमः ॐ ह्क्लीं टं मुकुंदाय विमदायै नमः ॐ ह्क्लीं वं

नेदा[illegible]य मनेदायै नमः ॐ ह्क्लीं डं नंदिने स्मृत्यै नमः ॐ ह्क्लीं वं नराय ऋद्ध्यै नमः ॐ ह्क्लीं णं नरकजिते समृद्ध्यै नमः ॐ ह्क्लीं तं हर-

ये शुद्ध्यै नमः [redacted]: ॐ ह्क्लीं थं कृष्णाय बुद्ध्यै नमः ॐ ह्क्लीं दं सत्याय भुक्त्यै नमः ॐ ह्क्लीं धं सात्वताय मत्यै नमः ॐ

ह्क्लीं नं शौरये क्षमायै नमः ॐ ह्क्लीं पं शूराय रमायै नमः ॐ ह्क्लीं फं जनार्दनाय उमायै नमः ॐ ह्क्लीं बं भूधराय क्लेदिन्यै नमः

ॐ ह्क्लीं भं विश्वमूर्तये क्लिन्नायै नमः ॐ ह्क्लीं मं वैकुंठाय वसुदायै नमः ॐ ह्क्लीं यं त्वगात्मने पुरुषोत्तमाय वसुधायै नमः ॐ

ह्क्लीं रं असृगात्मने बलिने परायै नमः ॐ ह्क्लीं लं मांसात्मने बलानुजाय परायणायै नमः ॐ ह्क्लीं वं मेदआत्मने बलाय सू-

क्ष्मायै नमः ॐ ह्क्लीं शं अस्थ्यात्मने वृषघ्नाय संध्यायै नमः ॐ ह्क्लीं षं मज्जात्मने वृषाय प्रज्ञायै नमः ॐ ह्क्लीं सं शुक्रात्मने हंसाय प्र-

भा भायै नमः ॐ ह्क्लीं हं प्राणात्मने वराहाय निशायै नमः ॐ ह्क्लीं लं शक्त्यात्मने विमलाय मोघायै नमः ॐ ह्क्लीं क्षं क्रोधात्म-

ने नृसिंहाय विद्युते नमः इत्येकपंचाशन्मूर्तीः शक्तीः केवलमातृकामासस्थाने पुनः मसेत् इति जीर्णमतेन न्यासं बीजा-

न्तादिवर्वनान्तमनुन्यासमिच्छेति तत्र केशवकीर्तिभ्यां नमः इति प्रयोगः धर्मार्थकाममोक्षेषु एकैकमिच्छद्भिः क्रमे-

ण ह्रीं श्रीं क्लीं स्त्रीं ॐ इत्येकैकबीजपूर्वः सर्गायेमासः कर्तव्य इति संप्रदायिकाः केवलस्तु सकलवैभवविधायस्यपिकार

द्रात्मनेनमः पादयोः। छंनमः परायपाय्वात्मनेनमः

ग०

कृ०प०

८०

60

सेपादद्वयान्ताङ्गः इतिकेशवादिमातृकान्यासः अथतत्त्वन्यासः मेनमः परायजीवात्मनेनमः १ मेनमः परायप्राणात्मनेनमः २
इतिहृदयेसकलशरीरे वेनमः परायबुद्ध्यात्मनेनमः फेनमः परायअहंकारात्मनेनमः ३ पेनमः परायमनआत्मनेनमः ४
एतत्त्रयंहृदि नेनमः परायशब्दात्मनेनमः शिरसिधेनमः परायस्पर्शात्मनेनमः मुखेदंनमः परायरूपात्मनेनमः
हृदिथेनमः परायरसात्मनेनमः लिङ्गेतेनमः परायगन्धात्मनेनमः पादयोः णंनमः परायश्रोत्रात्मनेनमः कर्णयोः
ढंनमः परायत्वगात्मनेनमः त्वचि डेनमः परायचक्षुरात्मनेनमः नेत्रयोः ठेनमः परायजिह्वात्मनेनमः रसने टंनमः
परायघ्राणात्मनेनमः नासि ञंनमः परायवागात्मनेनमः मुखेकंनमः परायपाण्यात्मनेनमः हस्तयोः जंनमः पराय
पा[illegible]त्मनेनमः पायौ छंनमः परायउपस्थात्मनेनमः गुह्येङंनमः परायआकाशात्मनेनमः शिरसिघंनमः पराय
वाय्वात्मनेनमः मुखे गंनमः परायतेजआत्मनेनमः हृदिखंनमः परायपृथिव्यात्मनेनमः पादयोः शंनमः पराय
हृत्पुण्डरीकात्मनेनमः १ हंनमः परायद्वादशकलाव्याप्तसूर्यमण्डलात्मनेनमः २ संनमः परायषोडशकलाव्याप्तचन्द्र
मण्डलात्मनेनमः ३ रंनमः परायदशकलाव्याप्तवह्निमण्डलात्मनेनमः ४ एतच्चतुष्टयंहृदि षंनमः परायवासु
देवायपरमेष्ठ्यात्मनेनमः शिरसि यंनमः परायसंकर्षणायपुरुषात्मनेनमः मुखेलंनमः परायप्रद्युम्नाय
विश्वात्मनेनमः हृदिवंनमः परायअनिरुद्धायनिवृत्त्यात्मनेनमः गुह्येलंनमः परायनारायणायसर्वात्मनेनमः

अबात्मने परायनमः लिङ्गे कंनमः ~ ५

पादयोः ह्रौंनमः परायनृसिंहायकोपतत्वात्मनेनमः सकलशरीरे अस्मिन्नात्मेसर्वत्रततपदंनिवेशयंतिकेचित्तहृषयं
तिवहवःसांप्रदायिकाःक्रमदीपिकाटीकाकृतश्चइतितन्न्यासः अथमूलमंत्रेणप्राणायामत्रयंकृत्वायोगपीठन्यासंकुर्या
त् अथप्राणायामविधिः तत्रबद्धपद्मासनऋजुकायःसन्मुपविश्यदक्षिणनासापुटंनिरुध्यवामनासापुटेनवायुमाकृ
ष्यस्वोदरेपूरयित्वाकनिष्ठानामिकाभ्यांवामनासापुटंचनिरुध्यहृदिदेवंध्यायन्मूलमंत्रंजपन्यावच्छक्तिवायुंकुंभकेनधृ
त्वादक्षिणनासारंध्रेणवायुंत्यजेदित्येकः पुनर्दक्षिणनासापुटेनवायुमाकृष्यतथैवकुंभयित्वातथैववामनासारंध्रेणवा
युंत्यजेदित्यन्यः पुनर्वामनासारंध्रेणाथवद्वायुमापूर्यतथैवकुंभयित्वातथैवदक्षिणनासारंध्रेणतंवायुंत्यजेदित्यपरः
इत्येवंप्राणायामत्रयंकृत्वा ऋष्यादिकरषडंगन्यासान्विधाय मूलाधारे ॐमंडूकायनमः स्वाधिष्ठाने॰ ॐकालाग्निरु
द्रायनमः मणिपूरे ॐआधारशक्त्यैनमः हृदये ॐकूर्मायनमः ॐअनंतायनमः ॐपृथिव्यैनमः ॐक्षीरसमुद्रायन
मः ॐश्वेतद्वीपायनमः ॐरत्नपर्वतायनमः ॐकल्पवृक्षायनमः ॐस्वर्णमंडपायनमः ॐपुष्पकविमानायनमः ॐरत्न
सिंहायनसयनमः इत्येतत्सर्वंतत्तत्स्थानभावनयाविन्यस्यस्वशरीरमंसद्वयोरूरुद्वयकल्पितपादवत्त्वद्वये सव्यवामपा
र्श्वनाभिमूलदलपार्श्वकल्पितगात्रवत्त्वद्वये रत्नसिंहासनेध्यात्वा॰दक्षिणांसे ॐधर्मायनमः वामांसे ॐज्ञानाय
नमः वामोरौ ॐवैराग्यायनमः दक्षिणोरौ॰ ॐऐश्वर्यायनमः मुखे ॐअधर्मायनमः वामपार्श्वे॰ ॐअज्ञानायन॰

रा.
पू.प.
८१

मः नाभिमूले ॐ वैराग्यायनमः दक्षिणपार्श्वे ॐ अनैश्वर्यायनमः इतिविन्यस्य पुनर्हृदये ॐ मायायैनमः ॐ विद्यायैनमः
इतिमायाविद्ये ॐ तमोनुरूपेविन्यस्यतदुपरिसिंहासनमध्येनंतायनमः तस्योर्द्ध्वे ॐ पद्मायनमः ॐ आनंदकंदायनमः
ॐ संविन्नालायनमः ॐ प्रकृतिमयपत्रेभ्योनमः ॐ विकारमयकेसरेभ्योनमः ॐ पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायैक
र्णिकायैनमः ॐ अंद्वादशकलाव्याप्तसूर्यमंडलायनमः ॐ उंषोडशकलाव्याप्तचंद्रमंडलायनमः ॐ मंदशकलाव्याप्तव
ह्निमंडलायनमः ॐ संबोधात्मनेसत्त्वायनमः ॐ रंकर्मात्मनेरजसेनमः ॐ तंमोहात्मनेतमसेनमः ॐ आंआत्मनेनमः
ॐ अंतरात्मनेनमः ॐ पंपरमात्मनेनमः ॐ ह्रींज्ञानात्मनेनमः इतिविन्यस्य कर्णिकायांस्वाग्रादिप्रादक्षिण्येनचतुर्दि
क्षुमध्येच ॐ ज्ञानतत्त्वात्मनेनमः ॐ मायातत्त्वात्मनेनमः ॐ कलातत्त्वात्मनेनमः ॐ प्रह्व्यैनमः ॐ सत्यायैनमः ॐ ईशानायै
नमः ॐ अनुग्रहायैनमः इतिपद्मकेसरेषुकर्णिकामूलेचपूर्वादिप्रादक्षिण्येनविन्यस्य ॐ नमोभगवतेविस्वेसर्वभू
तात्मनेवासुदेवायसर्वात्मसंयोगयोगपीठात्मनेनमः इतिहृदयकमलकर्णिकायांविन्यस्य तत्रसहस्रादित्यसंकाशंमंत्रं
ध्यात्वाश्वासमार्गेणमातृकुसुमांजलावानीय मूर्द्धादिपादपर्यंतेन्यसेत् इतियोगपीठन्यासः अथमंत्रपुटितमातृकान्या
सः मूलमंत्रांतेअंनमःनयमारारोधीरसि एवंसर्वाणिमातृकाक्षराणिमातृकास्थानेन्यसेत् इतिमंत्रपुटितमातृका
न्यासः अथमूलमंत्रन्यासः अस्यश्रीतारकषडक्षरमंत्रस्यब्रह्माऋषिर्गायत्रीछंदः श्रीरामःपरमात्मदेवतारांबीजंनमः श

61

क्लीं रामाय कीलकं रामप्रीत्यर्थे विनियोगः इति जलं स्पृष्ट्वा शिरसि ॐ ब्रह्मणे ऋषये नमः मुखे गायत्री छंदसे नमः हृदि
ॐ रामाय देवतायै नमः गुह्ये ॐ रां बीजाय नमः पादयोः ॐ नमः शक्त्यै नमः हृदि ॐ रामाय कीलकाय नमः इति ऋषिन्यासं
विधाय रां हृदयाय नमः रीं शिरसे स्वाहा रूं शिखायै वषट् रैं कवचाय हुं रौं नेत्राय वौषट् रः अस्त्राय फट् इति मंत्रैः करषडंग
न्यासं विधाय मंत्रवर्णन्यासं कुर्यात् यथा ॐ श्री ॐ नमः शिरसि ॐ रां ॐ नमः भ्रूमध्ये ॐ मां ॐ नमः हृदि ॐ यं ॐ नमः नाभौ
ॐ नं ॐ नमः गुह्ये ॐ मः ॐ नमः पादयोः इति वर्णन्यासः ॐ रां ॐ नमः शिरसि ॐ रामाय ॐ नमः नाभौ ॐ नमः ॐ नमः पा
दयोः इति पदन्यासः सकलेन मंत्रेण व्यापकं कुर्यात् इति मंत्रन्यासः अथ मूर्तिपंजरन्यासः ॐ अं ॐ रां केशवाय धात्रे नमः
ललाटे ॐ आं नं रां नारायणाय अर्यम्णे नमः नाभौ ॐ इं मं मां माधवाय मित्राय नमः हृदि ॐ ईं भं यं गोविंदाय वरुणाय
नमः कंठे ॐ उं रां नं विष्णवे अंशवे नमः दक्षिणपार्श्वे ॐ ऊं वं मं मधुसूदनाय भगाय नमः दक्षिणभुजे ॐ एं तं रां त्रिविक्रमा
य विवस्वते नमः दक्षिणकर्णमूले ॐ ऐं वां रां वामनाय इंद्राय नमः वामकुक्षौ ॐ ओं मां श्रीधराय पूष्णे नमः वामभुजे ॐ औं दं यं
हृषीकेशाय पर्जन्याय नमः वामकर्णमूले ॐ अं वां नं पद्मनाभाय त्वष्ट्रे नमः पृष्ठवंशे ॐ अः यं मं दामोदराय विष्णवे नमः ककु
दि ॐ नमो भगवते वासुदेवायेति मूर्ध्नि न्यसेत् तेन सकलशरीरव्याप्तिं विन्यसेत् इति मूर्तिपंजरन्यासः अथेंद्रियन्यासः
ॐ दिग्भ्यो नमः इति श्रोत्रयोः ॐ वायवे नमः इति त्वचि ॐ आदित्याय नमः इति चक्षुषोः ॐ वरुणाय नमः इति जिह्वायां

ॐ=४

रा॰
पू॰ प॰
६२

62

ओं अश्विभ्यां नमः इति घ्राणे ओं अग्नये नमः इति वाचि ओं इन्द्राय नमः इति पाण्योः ओं विष्णवे नमः इति पादयोः ओं मित्राय नम
इति पा[illegible]यौ ओं प्रजापतये नमः इत्युपस्थे ओं चन्द्रमसे नमः इति मनसि ओं ब्रह्मणे नमः इति बुद्धौ ओं रुद्राय नमः इत्यहं
कारे ओं क्षेत्रज्ञाय नमः इति चित्ते ओं ईश्वराय नमः इति मनसि इतीन्द्रियन्यासः अथालंकारन्यासः ओं श्रं मल
मेत्रांते सहस्रशीर्षाय पुरुषाय अव्यक्तात्मने कुंतलबंधाय नमः कुंतलबंधे १ ओं ग्रां मेत्रांते सहस्रशीर्षाय पुरुषाय महदा
त्मने किरीटाय नमः किरिटे २ ओं इं मेत्रान्ते सहस्रशीर्षाय पुरुषायं [illegible] क्षरात्मने कर्णो
त्पलाभ्यां नमः कर्णोत्पलयोः ओं ईं मेत्रांते सहस्रशीर्षाय पुरुषाय नमस्त्रात्मने तिलकाय नमः तिलके ४ ओं उं मेत्रांते स
हस्रशीर्षाय पुरुषाय ब्रह्मात्मने कुंडलाभ्यां नमः कुंडलयोः ५ ओं ऊं मेत्रांते सहस्रशीर्षाय पुरुषाय अहंकारात्मने वनमा
लायै नमः वनमालायां ६ ओं ऋं मेत्रान्ते सहस्रशीर्षाय पुरुषाय चित्तात्मने हाराय नमः हारे ७ ओं ॠं मेत्रान्ते सहस्र
शीर्षाय पुरुषाय श्रोत्रात्मने केयूराभ्यां नमः केयूरयोः ८ ओं लृं मेत्रांते सहस्रशीर्षाय पुरुषाय क्षेत्रात्मने वलयाभ्यां नमः
वलययोः ९ ओं लॄं मेत्रान्ते सहस्रशीर्षाय पुरुषाय परमात्मने कटकाभ्यां नमः कटकयोः १० ओं एं मेत्रांते सहस्रशी
र्षाय पुरुषाय ज्ञानात्मने रत्नांगुलीयकेभ्यो नमः रत्नांगुलीयकेषु ११ ओं ऐं मेत्रांते सहस्रशीर्षाय पुरुषाय प्राणात्मने
श्रीवत्साय नमः श्रीवत्से १२ ओं ओं मेत्रांते सहस्रशीर्षाय पुरुषाय सर्वात्मने कौस्तुभाय नमः कौस्तुभे १३ ओं औं मेत्रा

त्नेसहस्रशीर्षायपुरुषायपद्मनाभात्मनेउदरबंधायनमः उदरबंधे १४ ॐ ग्रंमंत्रांते सहस्रशीर्षापुरुषायजीवात्मनेपीतां
बराभ्यांनमः पीतांबरयोः १५ ॐ ग्रंमंत्रांतेसहस्रशीर्षायपुरुषायवागात्मनेजंघाभूषणाभ्यांनमः जंघाभूषणयोः १९
ॐ हंमंत्रांतेसहस्रशीर्षायपुरुषाययोन्यात्मनेनूपुराभ्यांनमः नूपुरयोः १७ ॐ सः मंत्रांते सहस्रशीर्षायपुरुषाय
घ्राणेन्द्रात्मनेपादांगुलीयकेभ्योनमः पादांगुलीयकेषु १८ ॐ सोंमंत्रांतेसहस्रशीर्षायपुरुषायप्रकृतिपुरुषसर्व
विलासात्मनेचक्रभ्रमणायनमः चक्रभ्रमणे १९ ॐ हंमंत्रांतेसहस्रशीर्षायपुरुषायसर्ववागुन्यात्मनेधनुर्बाणा
भ्यांनमः धनुर्बाणयोः २० इतिभूषणन्यासः पतत्फलंगोविंदार्चानसुधायां यःकुर्याद्भूषणन्यासेस्वांगेमूर्तिपुवा
हरेः नमातः स्तनपोभूयोभवेन्नारायणेनरः इति अमुमेवन्यासंमंत्रेमंजूषाकाराः मूलमंत्रांतेऊर्जनलवेधायन
मः एवंमंत्राहस्ताकेवलानिभूषणानामानि '' इतिमन्यन्ते इतिभूषणन्यासः पुनः ऋषिन्यासकरन्यासषडंगन्या
सान्विधाय मुद्रादर्शयेत् वनमाला १ शंख २ चक्र ३ गदा ४ पद्म ५ श्रीवत्स ६ कौस्तुभ ७ धनुः ८ बाण ९ यो
नि १० गरुड ११ कपि १२ धेनु १३ महामुद्राः १४ तत्रपद्म १ शंख २ चक्र ३ गदा ४ दत्वाधःकरमारभ्यवामा
धःकरपर्य्यंतंदर्शयित्वा वामभागेयोनिमुद्रां शिरसिधेनुमुद्रांवक्षदेशे हृदि देवे च प्रदर्शयेत् मुद्रादर्शनप्रकारः
स्वक्लीं इत्यनेनमुद्रांबधामूलमंत्रेणदर्शयित्वाहं इत्यनेनत्यजेदितिततः श्रीरामोहमस्मीतिक्षणंविश्रम्य प्रसन्ना

रा.
पू.प.
८२

लत्रयेदशादिग्विधनेचक्रतात्ध्यानंकुर्यात् तद्यथा अयोध्यानगरेरम्येरत्नमंडपमध्यगे स्मरेत्कल्पतरोर्मूलेरत्नसिं
हासनेशुभे तन्मध्येष्टदलेपद्मेनानारत्नप्रवेष्टिते तत्रश्रीरामचंद्राख्यंध्यायेतेजःपरात्परं प्रकृत्यासीनयाध्यासे
ष्ठितस्तनतयाघावहे देवासुरमनीद्रैश्चयोगीद्रैस्ससेविते चतुर्भुजंशंखचक्रगदापंकजधारिणं किरीटहार
केयूररत्नकुंडलशोभितं देवतागुरुमंत्राणांभावयेदैक्यमात्मना दक्षोर्ध्वकरमारभ्यतदधःकरपर्यंतमायुधध्या
नं एवंध्यात्वाजपेन्मंत्रंषट्सहस्रंदिनेदिने वाचःश्रियःपतिर्भूत्वाकविभर्वतिवत्सरात् रोहिकानाविलानकामा
न्मुक्त्वायोनेपदेव्रजेत् पद्मासिंहासनेतस्मिन्वीरासनसमाश्रिते सम्यग्ज्ञानमयींमुद्रांदधानंदक्षिणेकरे तेजः
प्रकाशनेवामेजानुमूर्द्धनिवापरं जानकीवल्लभंदेवमिंद्रनीलमणिप्रभं व्याख्याननिरतंदेवंहिभजेरघुनंदनं
वसिष्ठवामदेवादिमुनिभिःपरिसेविते वामभागेसमासीनोसीताकांचनसन्निभो भजतोकामदांनित्यंरक्तो
त्पलकरांबुजो लक्ष्मणंपश्चिमेभागेधृतछत्रंसचामरं पार्श्वेभरतशत्रुघ्नौतालवृंतकरावुभौ अग्रेव्यग्रेहनूमंतंवा
चयंतंसुपुस्तकं एवंध्यात्वाजपेन्मंत्रंज्ञानलक्ष्म्योःसभाजनं जपतोमंत्रिणामेवंध्यानयोगेनधीमतोपुरश्चरण
कृत्सेनविनापिःफलदोमनुः भक्त्यार्पितोध्यानेन कालांभोधरकांतिकामममनिशंवीरासनाध्यासिनंमुद्रांज्ञान
मयींदधानमपरंहस्तांबुजेजानुनि सीतांपार्श्वगतांसरोरुहकरांविद्युन्निभांराघवं पश्यंतींमुकुटांगदादिविविधा

कल्पोक्तलोगेभजे एवं स्वाभेदेन रामं ध्यात्वा स्वशिरसि मूलमंत्रेण पुष्पांजलिं दत्वा ग्रेतयोगं कुर्यात् सयथा पुनर्हृदय·
कमले ध्यात्वा वक्ष्यमाणयोगपीठपूजापुरःसरं मानसैरुपचारैर्देवं सांगं सावरणं संपूज्य मानसमेव नैवेद्यं दत्वा देवं मे
जानं ध्यायन् मूलाधारे स्वात्मांऽतरात्मापरमात्माज्ञानात्मावेत्यात्मचतुष्टयाकारवत्तरस्तकुंडमध्ये विद्युत्किं कुंडलि
नीवह्निरूपां पश्यन्मायमेन्धनवितां ध्यात्वा मूलमंत्रमुच्चार्याहंग्रहंतां जुहोमि स्वाहा पुनर्मूले असत्यं जुहोमि स्वाहा
एवं मूले पैशून्यं जुहोमि स्वाहा मंत्रं कामं जुहोमि स्वाहा मंत्र क्रोधं जुहोमि स्वाहा मंत्रं लोभं जुहोमि स्वाहा मंत्रं
मोहं जुहोमि स्वाहा मंत्रं मदं जुहोमि स्वाहा मंत्रं मात्सर्यं जुहोमि स्वाहा इति क्रमेण सुषुम्णानालगगुरुमनःस्तु
वेण कृत्वा प्राणायामं ऋष्यादिकरषडंगन्यासान् कृत्वा मूलमंत्रं अष्टोत्तरशतवारं जपित्वा पुनः प्राणायामं कृत्वा ॐ पु
ण्डरीकाक्षविश्वात्मन्मंत्रमूर्ते जनार्दन गृहाणेमं जपं नाथ ममदीनस्य शाश्वत इत्यनेन मूलमंत्रपाठात् देवाग्रे किंचिज्ज ठान्तो
लं दत्वा जपं निवेद्य उत्तरापोशनं हस्तप्रक्षालनादिनीराजनान्तं विधाय पूजाहोमादिकं देवयत्कृतं तदनुग्रहात् तेन प्री·
तो भवतेभोः शुद्धे मे मानसं कुरु ॐ तत्सत्सर्वं निवेदयामि· इत्युक्त्वा श्वाससमार्गेण मातृकाकुसुमोजलावागते तेजोरू
पं जीवमर्पयेत् क्षणं तन्मयो भूत्वा सत्येसत्ये पुनः सत्यं भेदो पद्यपि नावयोः तथापि दासभावापन्नो नियोजपराघव
इत्यनुक्त्वा भावयन् दक्षिणनासारंध्रेनाग्रगे तेजीवेभायेदित्यन्तर्यागः ततः स्वपुरतः स्थंदनादिलिखेत् श्रीपर्णादि पीठे स

रा·
पू·प·
६४

धादिनिर्मितेस्थण्डिले वा ॐ ऊँमादिना षट्कोणं कृत्वा तन्मध्ये रामबीजं विलिख्य तदधः साध्यनाम द्वितीयान्तं विलिख्य
बीजस्योर्ध्वे साधकनाम षष्ठ्यन्तं संलिख्य बीजपार्श्वयोः ऊरुहृदये लिखित्वा बीजमध्ये श्रीबीजं विलिख्य तत्सर्वं मन्मोन्मा
भिमुखं यथा वा भवेत्तथा वेष्ट्य षट्सु कोणेषु षडंगमंत्रानालिख्य षट्कोणपार्श्वयोर्वामे मायाबीजं दक्षिणे श्रीबीजं च विलि
ख्य षट्कोणाग्रे कामबीजं च विलिख्य षट्कोणसंधिषु ह्रमिति बीजमालिख्य तद्बहिर्वृत्तत्रयं कृत्वा तदन्तरालवीथ्यां वा
ग्भवबीजानि निरंतरं हृतोंकारेण विलिख्य तद्बाह्ये अष्टदलपद्मं कृत्वा तत्केसरेषु द्वंद्वशः षोडशस्वरानालिख्य तद्दले
षु क· च· ट· त· प· य· श· ला· ख्यानष्टवर्गानालिख्य तत्पत्राग्रेषु ॐ नमो भगवते रघुनंदनाय रक्षोघ्नविशदाय मधुरप्र
सन्नवदनायामिततेजसे बलाय रामाय विष्णवे नमः इति मालामंत्रवर्णान् षट्षट्समालिखेदिति मेदवर्णानालिख्य
तद्बहिः पुनरष्टदलमालिख्य तत्केसरेषु श्रीबीजं पत्रेषु नारायणमंत्रस्याष्टाक्षराणि विलिख्य तद्बहिर्द्वादशदलं क
मलमालिख्य तत्केसरेषु मातृकाणां स्वतरस्वतरश्चालिखेदिति मेषड्वर्णानालिख्य तद्दलेषु ॐ नमो भगवते वासु
देवायेति मंत्रार्णानेकैकशो विलिख्य तद्बहिः षोडशदलकमलं कृत्वा तत्केसरेषु ह्रीमिति मायाबीजं इति केसरे विलि
ख्य तद्दलेषु वासुदेवद्वादशाक्षराणि द्वादशदलेषु अवशिष्टदलचतुष्टये हुं· फट्· न·मः इति विलिख्य तद्दलान्तरा
लेषु हनुमदाद्यष्टकस्याद्यष्टकयोर्नामाद्यक्षराणि सबिंदुकानि बीजानि विलिख्य तद्बहिर्द्वात्रिंशद्दलपद्मं कृत्वा तद

लेषु रामभद्रमहेष्वासरघुवीरनृपोत्तम दशास्यान्तक मां रक्ष देहि दापय मे श्रियमिति द्वात्रिंशदक्षरमंत्रवर्णान् उग्रं वीरं महा
विष्णुं ज्वलन्तं सर्वतोमुखं नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं इति नृसिंहानुष्टुब्वर्णांश्चैकैकशो विलिख्य पत्राग्रेषु प्रत्य
ग्रे वषट्‌त्रित्त्वक्षरद्वयं विलिख्य तद्बहिः स्वरस्वरं वज्राष्टपुटितं कृत्वा तत्र दिक्षु क्ष्रौं मिति नृसिंहबीजं विदिक्षु हुमिति वाराहबी
जं लिखित्वा दिक्षु पूजाचक्रं निर्माय तत्र मूलमंत्रेण पुष्पांजलिं दद्यात् यद्वा स्वर्णादिभिः शिल्पिवरैर्निर्मिते पूजाचक्रे वेद
नादिमंडिते प्राग्वत्पीठे संस्थाप्य पुष्पांजलिं दद्यात् अत्र स्वर्णरूप्यादिधातुनिर्मितस्य पूजाचक्रस्याम्लरसादिना संशुद्धस्या
दौ वैदिकमंत्रेण गन्धताराणं कलामधुघृतगोडम्घनारिकेरजलैः पृथक् पृथगभिषिच्य तन्मंत्रवर्णौषधिक्वाथजलैरभि
षिंचेत् अत्र मंत्रवर्णौषधिग्रहणे मंत्रवर्णेषु पुनरुक्तवर्णौषध्यो ग्राह्याः तासु र॰ इंद्रवारुणी १ म॰ तुलसी २ य॰ अपामा
र्गः ३ न॰ रोहिणी ४ इति चतस्रः ततः शुद्धजलैः प्रक्षाल्य चंदनागुरुकर्पूरकस्तूरीकुंकुमादिपंकैरालिप्य पुरतः शुभा
पीठे संस्थाप्य तच्चक्रं स्पृष्ट्वा मूलमंत्रमष्टोत्तरसहस्रं जपित्वा संशुद्धस्य तस्य चक्रस्य प्राणकर्षणप्रतिष्ठामंत्रेमममपदर
अमुकदेवता स्थाने श्रीरामपूजाचक्रस्येति पदं प्रयुंजन् चक्रं स्पृष्ट्वा प्राणप्रतिष्ठामंत्रं जपन् प्राणकर्षणप्राणशक्तिध्यानपूर्वकं प्राणप्रति
ष्ठां कृत्वा तत्र पीठपूजापूर्वकं देवमावाह्य सांगं सावरणं संपूज्य वक्ष्यमाणमहानैवेद्यबलिदानादिपूर्वकं महोत्सवं प्रवर्तयेद्दि
नत्रयपर्यंतं कुर्यात् दिनत्रयेपि प्रथमदिने आवाहितं देवं न विसर्जयेत् इति प्रतिष्ठिते चक्रे नित्यनैमित्तिकादिपूजनं कुर्यात्

तुम्बा इत्यपि नाम
मोरखकठडी

श्री प॰=२

ग॰ सू॰ प॰ ८५

अग्न्युत्तारणं तत्र ऋग्वेदोक्ताग्निसूक्तेन कार्यं सूक्तं तु अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठां। अग्नी रोदसी विचरत्स
मंजन्। अग्निर्नारीं वीरकुक्षिं पुरंधिं अग्नेरप्नसः समिदस्तु भद्रा। अग्निर्मही रोदसी आविवेश। अग्निरेकं चोदयत्समत्सु।
अग्निर्वृत्राणि दयते पुरूणि। अग्निर्ह त्यं जरतः कर्णमाव। अग्निरद्भ्यो निरदहज्जरूथं। अग्निरत्रिं घर्म उरुष्यदंतः अग्निर्नृमेधं
प्रजयासृजत्सं अग्निर्दाद्द्रविणं वीरपेशाः। अग्निरृषिं यः सहस्रा सनोति। अग्निर्दिवि हव्यमाततान अग्नेर्धामानि विभृता
पुरुत्रा। अग्निमुक्थैरृषयो विह्वयंते। अग्निं नरो यामनि बाधितासः। अग्निं वयो अन्तरिक्षे पतन्तः। अग्निः सहस्रा परि
याति गोनां। अग्निं विश ईलते मानुषीर्याः। अग्निं मनुषो नहुषो वि जाताः। अग्निर्गान्धर्वीं पथ्यामृतस्य। अग्नेर्गव्यूतिर्घृत आ
निषत्ता। अग्नये ब्रह्म ऋभवस्ततक्षुः। अग्निं महामवोचामा सुवृक्तिं। अग्ने प्राव जरितारं यविष्ठ। अग्ने महि द्रविणमा यज॰
स्वं ग्रंथास्य प्रयोग तत्र प्रथमिमैर्मंत्रैः प्रथमे प्रतिष्ठितस्य चक्रादिकमग्निशालारहितैः पानाहृत्या शुद्धजलैरभिषिच्यानंतरम
ग्निशालासहितैः पानाहृत्याऽभिषिंचेत्। अग्निः सप्तिमित्यस्य सूक्तस्य सौमिर्ऋषिरग्निर्देवता त्रिष्टुप्छंदः समस्तसूक्ते अग्न्युत्तार
णे विधिः ततः प्रत्यहं तु अम्लादिभिः शुद्धजलेन प्रक्षालनं धातुमयपात्रस्य स्फटिकस्य जलेनैव क्षालनं कार्यमिति शेषे
प्रतिष्ठिते प्रक्षालिते वंदनादि मंदिरे पूर्वतः शोकपीठे संस्थाप्य तत्र मूलमंत्रेण पुष्पांजलिं दत्वा संपूरतः किं विद्यामाथेव
न्तरस्वर्णलविकोणात्मकं मंडलं वंदनानालिखे भूतले मत्स्यमुद्रया विधाय श्रीरामार्चाधारमंडलायनमइति मंडले

अग्न्युत्तारणो विनियोगः
शिवार्चनचन्द्रिकागत यन्त्रसंस्कारविधिः

65

संपूज्य तत्राग्नेयेशाननैरृत्यवायव्यकोणेषु रां हृदयायनमः रीं शिरसेनमः रूं शिखायैनमः रैं कवचायनमः इतिसंपू-
ज्यपुरतो रौं नेत्रायनमः कोणाग्रादिवद्दिक्षु रः अस्त्रायनमः इतिषडंगानिसंपूज्य तत्रमूलमंत्रेणप्रक्षालितमर्घ्यपात्राधारेश्री
रामार्घ्यपात्राधारंस्थापयामीतिसंस्थाप्य मं धर्मप्रददशकलात्मनेवह्निमंडलायश्रीरामार्घ्याधारायनमः इतिसंपूज्य
स्वाग्रादिप्रादक्षिण्येनहन्नाकारेण यं धूम्रार्चिषेनमः रं ऊष्मायैनमः लं ज्वलिन्यैनमः वं ज्वालिन्यैनमः शं विस्फुलि-
ङ्गिन्यैनमः षं सुश्रियैनमः सं सुरूपायैनमः हं कपिलायैनमः लं हव्यवहायैनमः क्षं कव्यवहायैनमः इतिवह्निक-
लाः संपूज्य पूर्वोक्तप्राणप्रतिष्ठामंत्रे ममपदस्थाने धूम्रार्चिरादीनामितिपदं प्रयोज्याधारेस्थशानु प्राणप्रतिष्ठामंत्रंजपन्
तासां प्राणप्रतिष्ठांविधाय अस्त्रमंत्रेण शोधितं प्रक्षाल्य श्रीरामार्घ्यपात्रं प्रतिष्ठापयामीतितस्मिन्नाधारेसंस्थाप्य अं हं अर्थ-
प्रदद्वादशकलात्मनेसूर्यमंडलायश्रीरामार्घ्यपात्रायनमः इतिशोधितंसंपूज्य तत्रभूमिस्थमंडलवन्मंडलंविभाव्य
तथैवषडंगैः संपूज्य तत्रवृत्ताकारेणप्रादक्षिण्येनकं भं तपिन्यैनमः खं बं तापिन्यैनमः गं फं धूम्रायैनमः घं पं मरीच्यैन-
मः ङं नं ज्वालिन्यैनमः चं धं रुच्यैनमः छं दं सुषुम्णायैनमः जं थं भोगदायैनमः झं तं विश्वायैनमः ञं णं बोधिन्यैनम
टं ढं धारिण्यैनमः ठं डं क्षमायैनमः इतिसूर्यद्वादशकलाः संपूज्य प्राग्वत्प्राणप्रतिष्ठामंत्रेतपिन्यादीनामितिपदंनि-
योज्यतासांप्राणप्रतिष्ठांविधाय मूलमंत्रजपांते क्षंलंहंसंषंशंवंलंरंयंमंभंबंफंपंनंधंदंथंतंणंढंडंठंटंञंझंजंछंचंङं

ॐ

घं गं ऌं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं स्वाहा इति स्वाहान्तां विलोममातृकां जपन् शुद्धोदकैः श्रीगामार्घपात्रं पूर
ग॰ यामीति संपूर्य तत्र ॐ गं हृदयाय नमः इति गन्धपुष्पाक्षतयवकुशतिलसर्षपदूर्वाश्च सर्वं द्रव्याष्टकं निक्षिप्य [illegible] मं॰ का
भू॰प॰ मप्रदषोडशकलात्मने सोममण्डलाय श्रीगामार्घामृताय नमः इति तज्जलं संपूज्य तत्र प्राग्वद्वह्निसूर्यमण्डले विभाव्य तथैव
५५ वषडन्तैः संपूज्य तत्र हुतात्कारेण प्रादक्षिण्येन अं अमृतायै नमः आं मानदायै नमः इं पूषायै नमः ईं तुष्ट्यै नमः उं पु ३
३ ष्ट्यै नमः ऊं रत्यै नमः ऋं धृत्यै नमः ॠं शशिन्यै नमः ऌं चन्द्रिकायै नमः ॡं कान्त्यै नमः एं ज्योत्स्नायै नमः ऐं श्रियै न
66 मः ओं प्रीत्यै नमः औं अङ्गदायै नमः अं पूर्णायै नमः अः पूर्णामृतायै नमः इति चन्द्रकलाः संपूज्य प्राग्वत्प्राणप्र
तिष्ठामन्त्रं अमृतादीनामिति पदं नियोज्य प्राणप्रतिष्ठामन्त्रं जपन् तासां प्राणप्रतिष्ठां विधाय प्राग्वत्सूर्यमण्डलात्स्नान
प्रकरणोक्तविधिना तीर्थानि मातृकाक्षरसमं जलं वा नीत्वा निध्यायेत् तत्र चन्द्रमण्डलगां गौरीं गङ्गां शुक्लमाल्यानुले
पनां वेददेवत्रयीं मूर्तिं त्रिनेत्रां चन्द्रभूषणां भक्तिमुक्तिप्रदां गङ्गां वरदाभयपाणिनीं अतसीकुसुमश्यामां हेमा
भरणभूषितां पीताम्बरधरां नूत्नयौवनां यमुनां परां पूर्वां मकरमारूढां द्वितीयां [illegible] सर्ववाहिनीमिति ध्यात्वा मूलमन्त्रेणार्घ
जले संयोज्यावाहनादिमुद्रां दर्शयेत् शिखामन्त्रेण मालिनीमुद्रां शंखोपरि भ्रामयित्वा तत्र स्वहृदयकमले देवं तेजोम॰
यं ध्यात्वा सुषुम्णावर्त्मना भ्रूमध्यमानीय तत्तेनोद्दलनासारन्ध्रेण तत्र मातृकाक्षरसमं जलं ततः शंखजले इति एवं भावना

पुरः सरं हेरामइहह्यावाहितोभव हेरामइहह्यावाहितोभव २ हेरामइहसंस्थापितोभव २ हेरामइहसंनिहितोभव ३ हेरा
मइहसंनिरुद्धोभव ४ हेरामइहसंमुखोभव ५ हेरामइहअवगुंठितोभव ६ देवस्यहृदयेरांहृदयायनमः देवशिरसिरीं
शिरसेस्वाहा देवशिखायांरूंशिखायैवषट् देवकवचेरैंकवचायहुं देवनेत्रेरौंनेत्राभ्यांवौषट् देवपरितोदिक्षुरः अस्त्रायफ
ट् एवंषडंगैः हेरामसकलीकृतोभव इतिशांखेअग्यावाहितंदेवंसकलीकृत्यअस्त्रमंत्रेणदिग्बंधनंविधायजलेगंधादिभिर्दे
वंसंपूज्य नेत्रमंत्रेणस्वप्रतिबिंबोयथानभवतितथाशांखेजलेवीक्ष्यकवचमंत्रेणावगुंठनमुद्रयादोर्युजाऽवगुंठ्य
अस्त्रमंत्रेणचक्रमुद्रयासंरक्ष्यशांखेमुद्रयाऽवष्टभ्ययोनिमुद्रयाउद्दीप्यशांखस्यपरितः अग्नीशासुरवायव्यानेषुहृ
दयादिषु रतोनेत्रंअस्त्रंपूर्वादिदिक्षुसंपूज्य पुनर्हृदयायनमइतिमंत्रेणगंधपुष्पाक्षतंशांखेदत्वा सर्वान्साभ्यंतरे
शांखेरामरूपंध्यात्वा ऊर्ध्वमालोक्य ॐअमृतेअमृतोद्भवेअमृतस्राविणिअमृतंस्रावयस्रावयस्वाहा ॐह्रींश्रीं
क्रोंइतिमंत्रेणधेनुमुद्रांदर्शयित्वामत्स्यमुद्रयाऽऽच्छादयेत्शांखेशंखचक्रगदा १ पद्म २ गरुड ३ महामुद्रादर्शयित्वा
स्वानामिकांगुष्ठाभ्यांशांखंअभयपार्श्वौधृत्वाउपरिप्रसारिततर्जनीमध्यमाश्रितविलेखमंजर्याः कुसुमेनवा शांखज
लेस्पृशन्नष्टवारंमंत्रंजपेत् अथकेचित् त्रिकोणगर्भषट्कोणवर्तुलचतुरस्रमर्घ्याधारमंडलमाहुः इतिसामा
न्यार्घ्यपूजनविधिः शांखस्याग्रतः पंक्त्याकारेणत्रिकोणमंडलचतुष्टयंकृत्वा तेषुमाधाराणिपाद्यार्घ्याचमनमधु

चूर्णं १ लवङ्ग

पञ्चपात्राणि स्थापयित्वा तत्र क्रमेण पञ्चामाक १ दूर्वा २ अब्जं ३ विष्णुक्रान्ताः ४ गन्ध १ पुष्प २ अक्षत ३ कुशाग्र ४
रा॰ यव ५ तिल ६ सर्षप ७ दूर्वाः ८ जातीफलचूर्णं २ कंकोलचूर्णानि ३ गव्यदधि १ घृत २ मधूनि ३ क्षिपेत्
पू॰ प॰ अत्र पाद्यादिद्रव्यालाभे यथालिखिताधारेषु नवचमनपात्रे स्थापयित्वा शंखदक्षिणे प्रोक्षणीपात्रे संस्थाप्य तत्र दीर्घं कूर्च
८७ मे संवेशो दत्तितं निक्षिपेत् यत आह स्म नारदः पुष्पेणापि गृहीतानि प्रोक्षयेत्सर्वसाधनमिति ततः सर्वाणि पा
त्राणि इमक्रमेण पुनराचमनीयपात्र प्रोक्षणीपात्रे च मूलमन्त्रमुच्चरन् कलशजलेन पूरयित्वा गन्धपुष्पैरभ्यर्च्य तत्
त्र शंखोदकं अर्घ्यपात्रान्तरेण हुत्वा किंचित् किंचित् विनिक्षिप्य कलशे च निक्षिप्य केक पात्रे मूलेनाष्टवारमभिमन्त्र्य धेनुमु
द्राम् महामुद्रां मत्स्यमुद्रां दर्शयित्वा प्रोक्षणीजलेनात्मानं पूजावस्तून् पूजाद्रव्याणि मूलमन्त्रमुच्चरन् संप्रोक्ष
येदिति यात्रासादनं अथात्मार्चनं तद्यथा स्वदेहे [illegible] पृथक् स्थापितगन्धपुष्पैरलंकृत्य स्वेष्टदेवतारूपम् विचि
न्त्य प्रागुक्तयोगपीठदेवतानां स्वतन्न्यासस्थानेषु संपूज्य हृदयकमलकेसरेषु वक्ष्यमाणपीठशक्तीश्च संपूज्य पीठमन्त्रेण
सर्वांगे पुष्पाञ्जलिं दत्वा स्वेष्टदेवतारूपमात्मानं ध्यायेत् मूलमन्त्रेण मूर्ध्नि हृदये गुह्ये पादयोः सर्वांगे च पञ्चस्थाने
षु पञ्च पुष्पाञ्जलीन् दत्वा धूपदीपौ निवेद्य प्राग्वन्मूलाधारे च तारस्वरूपं संचिन्त्य तत्र कुण्डल्यात्मकपरमात्मवह्निं
संचिन्त्य मूलमन्त्रमुच्चार्य ॐ धर्माधर्म हविर्दीप्ते आत्माग्नौ मनसा स्रुचा सुषुम्णा वर्त्मना नित्यमक्षवृत्तीर्जुहोम्य

67

हे पुण्यं जुहोमि स्वाहा पुनर्मूले प्रागुक्तश्लोकमेवं च पवित्राः पापं जुहोमि स्वाहा इत्थं पुण्यपापे हुत्वा कृत्याकृत्ये संक
ल्पविकल्पौ यथैव पृथक्पृथक् हुत्वा पुनर्मूलमुच्चार्य ॐ प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुवं धर्माधर्मकलास्नेह
पूर्णं वह्नौ जुहोम्यहं इति स्वाहांतमुच्चार्य धर्माधर्मात्मकं सकलप्रपंचं पूर्णाहुतिं तेन हुत्वा निरस्तनिखिलोपाधिना निरति
शयस्वात्मानंदविहिलासात्मकं स्वात्मानं ध्यायन् प्राणायामऋष्यादिकरषडंगन्यासपूर्वकं मूलमंत्रमष्टोत्तरशतवारं जपित्वा
जपं समर्पयेदित्यात्मपूजा अथ पीठपूजा सा यथा अर्घजलेन पूजाचक्रमभ्युक्ष्य पूजाचक्रस्योत्तरभागे ॐकारपूर्वं गुरुभ्यो न
मः गुरुपादुकाभ्यो नमः अपरमगुरुभ्यो नमः परमगुरुपादुकाभ्यो नमः आदिगुरुभ्यो नमः आदिगुरुपादुकाभ्यो नमः म
हागुरुभ्यो नमः महागुरुपादुकाभ्यो नमः अस्मद्गुरुभ्यो नमः अस्मद्गुरुपादुकाभ्यो नमः सर्वगुरुभ्यो नमः सर्वगुरुपादुका
भ्यो नमः नारदादिदेवर्षिभ्यो नमः सर्वसिद्धेभ्यो नमः भागवतेभ्यो नमः इति गुरुपंक्तीः संपूज्य पूजाचक्रस्य दक्षिणे गं गणप
तये नमः डुं दुर्गायै नमः क्षं क्षेत्रपालाय नमः सं सरस्वत्यै नमः इति संपूज्य पूजाचक्रस्याधस्तादनलादि भावनया ॐ मंडूकाय न
मः तदुपरि ॐ कालाग्निरुद्राय नमः तदुपरि ॐ आधारशक्त्यै नमः तदुपरि ॐ कूर्माय नमः तदुपरि ॐ अनंताय नमः तदुप
रि ॐ पृथिव्यै नमः तस्यां ॐ क्षीरसमुद्राय नमः तन्मध्ये ॐ श्वेतद्वीपाय नमः तस्मिन् रत्नपर्वताय नमः तस्मिन् ॐ कल्प
वृक्षेभ्यो नमः तदधः ॐ स्वर्णमंडपाय नमः तन्मध्ये ॐ पुष्पकविमानाय नमः तदुपरि ॐ रत्नसिंहासनाय नमः इति तत्र

ठ

त्थ्यानभावनयासंपूज्य पूजाधारपीठे सिंहासनत्वेनपरिकल्प्य तस्यचाग्नेयादिकोणचतुष्टयस्यपादचतुष्टये· ॐधर्मायनमः ॐज्ञानायन
रा. मः ॐवैराग्यायनमः ॐऐश्वर्यायनमः पूर्वादिचतुर्दिक्षुगात्रचतुष्टये ॐअधर्मायनमः ॐअज्ञानायनमः ॐअवैराग्यायनमः
सू.प. ॐअनैश्वर्यायनमः इतिप्रादक्षिण्येनपूजयेत् ततःसिंहासनस्यमध्ये ॐमायायैनमः ॐविद्यायैनमः पट्टसूत्रमयपट्टिका
६८ रूपेण लौकिकमंचवद्वानप्रोतरूपेण ग्रथिते स्थिते ध्यात्वासंपूज्य तदुपरिअनंतायनमः इतितल्पाकारमनंतंसंपूज्य तस्यमू
र्ध्निपद्मायनमः आनंदकंदायनमः संविन्नालायनमः तद्दलेषु प्रकृतिमयपत्रेभ्योनमः तत्केसरेषुविकारमयकेसरेभ्यो
नमः तत्कर्णिकायां पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायैकर्णिकायैनमः पत्रमूलेषु अं अर्कमंडलायनमः केसरेषु उं
68 सोममंडलायनमः कर्णिकायां मंवह्निमंडलायनमः हृत्तत्त्वयेसंबोधात्मनेसत्त्वायनमः रंप्रकृत्यात्मनेरजसेनमः तंमो·
हात्मनेतमसेनमः कर्णिकायांस्वाग्न्यादिचतुर्दिक्षुआंआत्मनेनमः अंअंतरात्मनेनमः पंपरमात्मनेनमः ह्रींज्ञानात्मनेन
मः इतिसंपूज्य पुनःकर्णिकायांस्वाग्न्यादिचतुर्दिक्षुमध्येच ज्ञानतत्त्वात्मनेनमः मायातत्त्वात्मनेनमः कलातत्त्वात्मनेनमः
विद्यातत्त्वात्मनेनमः परतत्त्वात्मनेनमः पद्मकेसरेषुस्वाग्न्यादिप्रादक्षिण्येन विमलायैनमः उत्कर्षिण्यैनमः क्रियायैनमः
योगायैनमः॥प्रह्वैनमः सत्यायैनमः ईशानायैनमः पुनःकर्णिकामूले अनुग्रहायैनमः इतिनवशक्तीः संपूज्य मू
लमंत्रमुच्चार्य ॐनमोभगवतेविष्णवेसर्वभूतात्मनेवासुदेवायसर्वात्मसंयोगपीठात्मनेनमः इतिकर्णिकायांपुष्पांजलिंदत्वा

मूलमुच्चार्य श्रीराममूर्तिमविकल्पयामीति पीठमध्ये पुष्पं निधाय ध्यानोक्तां मूर्तिं विभावयेत् इति पीठपूजा ततः
पुनर्मूलमंत्रेण प्राणायामत्रयं कृत्वा मूलमंत्रस्य ऋष्यादिकरषडंगन्यासांश्च कृत्वा कराभ्यां पुष्पांजलिमादाय पद्मपुटा
वध्याय पूर्वोक्तमातृकांभोजं तेन ध्यात्वा पद्मासनेनोपविष्ट ऋजुकायो ऽनन्यधीः स्वहृदये पूर्वोक्तं देवं ध्यात्वा तेजोरूपं वह
न्नासा ऽध्वना करस्थमातृकांभोजे निःसार्य मूलमुच्चार्य श्रीराम इहागच्छागच्छ इति यंत्रे मूर्तेः शिरसि पुष्पांजलिप्रक्षेपे
ण तत्तेज आवाहनीमुद्रया समावाह्य तत्तद्रूपं ब्रह्मरंध्रेण प्रविष्टं संचिंत्य श्रीरामरूपेण परिणतं ध्यानोक्तरूपं रामं ध्यायन् मंत्रमु
च्चार्य श्रीराम इह तिष्ठ तिष्ठ इति स्थापनीमुद्रां प्रदर्श्य ॐ देवेश भक्तिसुलभ सर्वाभरणैर्युत यावत्त्वां पूजयिष्यामि तावत्त्वं
सुस्थिरो भवेति प्रार्थ्य पुनर्मूलमंत्रमुच्चार्य श्रीराम इह संनिधेहि संनिधेहि इति संनिधापनमुद्रया संनिधाय पुन
र्मूलमंत्रमुच्चार्य श्रीराम इह संनिरुद्धः संनिरुद्धो भव इति संरोधनीमुद्रया संनिरुध्य पुनर्मूलमंत्रमुच्चार्य श्रीराम इह संमु
खः संमुखो भवेति संमुखमुद्रया संमुखीकृत्य पुनर्मूलमंत्रमुच्चार्य श्रीराम इहावगुंठितो भवेत्यवगुंठनमुद्रया ऽवगुंठ्य
देवस्य हृदयादिषडंगस्थानेषु षडंगमंत्रान् विन्यस्य पुनर्मूलमंत्रं पठित्वा श्रीराम सकलीकृतो भव इति सकलीकृत्य
धेनुमुद्रां बध्वा देवस्य शिरसि अमृतवर्षिं ध्यायन् मूलमुच्चार्य श्रीरामामृतीकृतो भवेत्यमृतीकृत्य महामुद्रां बध्वा मूल
मुच्चार्य श्रीराम परमामृतीकृतो भवेति देवस्य मूर्ध्नि परमामृतवर्षिं ध्यात्वा मूलमंत्रमुच्चार्य्य अर्घोदकेन देवं त्रिः प्रोक्ष्य देवस्य

हृदयं स्पृशन् पूर्वोक्तप्राणप्रतिष्ठामंत्रेण मम पदस्थाने श्रीरामस्येति पदं प्रक्षिप्य प्राणप्रतिष्ठामंत्रं जपन् देवस्य प्राणप्रतिष्ठां वि
धाय मूलमंत्रमुच्चार्य श्रीरामाय नमः इति त्रिः पुष्पांजलिं दत्वा देवस्यांगेषु षडंगन्यासं सपिंडकमातृकान्यासं च विधाय शंख
रा. चक्र गदा पद्म वनमाला धनुर्बाण योनि कपि गरुड दशमुद्राः प्रत्येकं कामबीजेन विरच्य मूलमंत्रेण प्रदर्श्य हृ
पू. प. इति मंत्रेणेति दशमुद्राः प्रदर्श्य वक्ष्यमाणविधिना पूजयेत् सालग्रामशिलायां तु सालग्रामे या प्रांतरे संस्थाप्य स
६५ हस्रशीर्षामंत्रेण मूलमंत्रेण वोच्चार्य देवे पुष्पांजलिं दत्वा धेनुमुद्रां बध्वा देवस्य मूर्द्ध्नि अमृतहार्द्धिं ध्यायन् मूलमुच्चार्य
श्रीरामामृतीकृतो भवेत् अमृतीकृत्य महामुद्रां बध्वा मूलमुच्चार्य श्रीरामपरमामृतीकृतो भवेति देवस्य मूर्द्ध्नि पर
69 मामृतहार्द्धिं ध्यात्वा मूलमंत्रमुच्चार्य अर्घ्योदकेन देवं त्रिः संप्रोक्ष्य पुष्पेण देवांगेषु षडंगन्यासं सपिंडमातृकान्यासं च वा
विधाय पूर्वोक्तादशमुद्राः प्रदर्श्य मुद्रादर्शनपूर्वकमुपचारान्निवेदयेत् ततो मूलमुच्चार्य श्रीरामेतत्ते आसनं न
मः इति वा दद्यात् केवले पीठे वा यथासंभवमासनं देवस्य वामभागे विन्यस्य ॐ हे हे हृदमिद मिदं गृहाण स्वाहेति
निवेद्य हस्तौ प्रक्षाल्य मंत्रमुच्चार्य श्रीरामाय पुष्पांजलिर्नमः इति पुष्पांजलिं दत्वा पुनर्मूलमुच्चार्य राम स्वागतं इति
स्वागतं भावयित्वा निवेदनां विधाय पुनर्मूलमुच्चार्य श्रीराम पाद्यं ते बं स्वाहा इति पूर्वस्थापितात्पाद्यपात्राद्गंधपुष्पा
क्षतयवकुशाग्रतिलसर्षपदूर्वान्वितं जलं पात्रान्तरेण गृहीत्वा देवस्य शिरसि दत्वा ॐ हे हे हे हृदमिद मिद मिदं गृहाण

विधाय द्या

स्वाहेति निवेद्य हस्तप्रक्षालनं मंत्रोच्चारणपूर्वकं पुष्पांजलिं च दत्वा मूलमुच्चार्य्य श्रीरामैतत्ते पाद्यं नमः इति पाद्य
पात्राच्छ्यामाकदूर्वाब्जविष्णुक्रांतान्वितं जलं पात्रान्तरेण गृहीत्वा देवपादयोर्दत्वा ॐ हं हं हं इदमिदमिदं गृहाण स्वाहेति निवे
द्य हस्तप्रक्षालनं विधाय मूलमंत्रेण प्राग्वत्पुष्पांजलिं दद्यात् अत्र सर्वत्रोपचारेषु प्रोक्तमंत्रेण निवेदनं हस्तप्रक्षाल
लनं मूलमंत्रेण पुष्पांजलिं च प्रत्युपचारं कुर्यात् ततश्चाचमनीयपात्राज्जातीफललवंगकक्कोलचूर्णयुतं जलं पात्रां
तरेण गृहीत्वा मूलमुच्चार्य्य श्रीरामैतत्ते आचमनीयं स्वधेति देवस्य मुखकमले दत्वा प्राग्वन्निवेदनहस्तप्रक्षाल
नपुष्पांजलीन् विधाय मधुपर्कपात्राद्दधिघृतमधुयुतं जलं पात्रान्तरेण गृहीत्वा मूलमुच्चार्य्य श्रीरामैष ते मधु
पर्कः स्वधेति देवस्य मुखकमले दत्वा प्राग्वन्निवेदनहस्तप्रक्षालनपुष्पांजलीन् कृत्वा पुनराचमनीयपात्रा
त्पात्रान्तरेण जलं गृहीत्वा मूलमुच्चार्य्य श्रीरामैतत्ते पुनराचमनीयं स्वधेति पुनराचमनीयं दत्वा निवेदनादि पूर्वव
त् विधाय रत्नपादुके उपनीय पादुकामुपगम्य आरुह्य भगवत् रत्ननिर्मिते प्राक्दिगते स्नानमंडपमायाहि स्नानार्थ
मिति प्रार्थ्य पूर्वसंपादितविरचिते स्नानमंडपं नीत्वा प्राग्वदासनं दत्वा अर्घ्यपाद्याचमनीयानि प्राग्वन्निवेद्य सुगं
धतैलादिकमुपनीय मूलमुच्चार्य्य श्रीरामैतत्ते सुगंधतैलाभ्यंगसुगंधामलकाद्युद्वर्तनस्नानादिकं नमः इति सु
गंधतैलाभ्यंगसुगंधामलकाद्युद्वर्तनं च विधाय पुरुषसूक्तेन महाराजोपचारवन्नानाविधैर्जलैरभिषिच्य गंगादिती

र्थाहृतजलपूर्णकनककलशसहस्रैर्देवकन्याभिरभिषिक्तं विभाव्य प्राग्वदाचमनीयं दत्वा जलापकर्षणार्थं वस्त्रं दत्वा अंग
रा॰ प्रोक्षनं परिकल्प्य निवेदनादि विधाय पीतदुकूलयुग्ममानीय वामितिवरुणबीजेनाभिमंत्रितजलेनास्त्रमंत्रेण संशोध्य
पू॰प॰ बृहस्पतिदेवताभ्यां वासोभ्यां नमः इति वासोयुगं संपूज्य मूलमुच्चार्य श्रीरामैतेते वाससी नमः इति वाससी परिधाप्य पूर्ववत्
८० न्निवेश्य पूर्ववदाचमनीयं दत्वा हस्तप्रक्षालनादि विधाय स्वर्णादिनिर्मितं यज्ञोपवीतमादाय मूलमुच्चार्य श्रीरा
मयन्तेयज्ञोपवीतं नमः इति यज्ञोपवीतं दत्वा प्राग्वन्निवेश्य प्राग्वदाचमनीयं दत्वा हस्तप्रक्षालनादि कृत्वा रत्नपा
दुके उपनीयं पादुकायुगमारुह्य भगवन् रत्ननिर्मिते प्रागुक्तनिर्मिते याम्यामलंकारसमंडपे इति दक्षिणदिग्गत
70 मलंकारमंडपं नीत्वा तत्र सिंहासने उपवेश्य नानाविधालंकरणानि समुपनीय॰ प्राग्वत्प्रोक्ष्य नानादैवतेभ्यो मु
कुटाद्याभरणेभ्यो नमः इति संपूज्य मूलमुच्चार्य श्रीरामैतत्ते मुकुटं नमः एते रत्नकुंडले नमः इति नानाभरणानि तत्तन्नाम्ना
समर्पयेत् अलंकाराभावे भूषणमंत्रेणालंकारसिद्धिरिति सांप्रदायिकाः रत्नपादुके उपनीय पादुके परिधापयेदेवं॰
वाद्यः पुरःसरे यागमंडपमायाहि परिवारगणैः सहेति प्रार्थ्य प्रदानमंडपं नीत्वा तत्र प्राक्कल्पितयोगपीठे देवं समुपवे
श्य तत्र छत्रचामरादि नानाविधोपकरणव्यग्रहस्तैः परिवारदेवतागणैः सूर्यकिरणसमूहैरिव देवशरीरादिनिर्गतैः स्वे
स्वे स्थाने समुपविष्टैर्वन्द्यमानं सदेशाकाराभरणादिशोभितं स्थिरीभूतं परितश्चक्रमध्ये ध्यात्वा वेदनागुरुकर्पूरादिना

नोगंधमानीयंप्रागवत्प्रोक्ष्य विसृद्देवस्यायगंधायनमः इतिगंधंसंपूज्य मूलमुच्चार्य्य श्रीरामैषतेगंधोनमः इतिदेवायगंधं
समर्प्य प्रागवन्निवेदनादिविधाय पुष्पाणिप्रागवत्संप्रोक्ष्य वनस्पतिदेवताभ्यः पुष्पेभ्योनमइतिपुष्पाणिसंपूज्यपंचपुष्पां
जलीन्दद्यात् तद्यथा सितरक्तचंदनलिप्तसितरक्ततुलसीद्वयेनमूलमंत्रमुच्चार्य्यश्रीरामैयतेपुष्पांजलीन्दद्यात् तद्यथा
नेमइतिपादयोरेकः श्वेतचंदनयुक्तानिश्वेतानिसर्वाणिवाममागे तथाश्वेतरक्तकरवीरद्वयेनहृदयेद्वितीयः श्वेतरक्त
कमलाभ्यांशिरसितृतीयः सिततुलसीकरवीरकमलैर्दक्षभागेशिरसिरक्ततुलसीकरवीरकमलैर्वाममागेशिरसिचतुर्थः
षड्भिःसकलांगेपंचमः इतिपुष्पांजलीन्समर्प्यप्रागवन्निवेदनादिविधाय देवस्यहृदयादिषु षडंगन्याससस्थानेषु षडंगानिल
यांगतेनसंपूज्य देवस्यशरीरेमस्तकादिषुमातृकाक्षरन्यासस्थानेषुमूलपुटितैर्मातृकावर्णैर्देवंसंपूज्य देवस्यवाममभा
गेत्रिकोणेसमासीनां दक्षिणहस्तेधृतरक्तकमलोत्फुल्लवनाभांध्यात्वा श्रीसीतायैस्वाहेति सीतांसंपूज्य दक्षिणभागे त्रिकोणे
धनुर्वाणधरेसव्येवर्गेलक्ष्मणाययनमइति लक्ष्मणंसंपूज्य वामपार्श्वेत्रिकोणाग्रेशृंगशार्ङ्गायनमइतिशार्ङ्गं दक्षिणे त्रिकोणा
ग्रेशरेभ्योनमइतिशरांश्चसंपूज्य हनूमंतंवसुग्रीवंभरतंलक्ष्मणंतथा पूर्वयेदग्रकोणदिशीतुमंत्रंचविभीषणं वायव्यं
तेहनूमंतंदेवस्याग्रेसपुस्तकं रमौभरतशत्रुघ्नौपार्श्वयोर्धृतचामरौ धृतातपत्रंसौमित्रिंसुग्रीवंचविभीषणं अग्रपार्श्वद्व
येध्यायेत्तालव्यजनधारिणं इतिवचनात् षट्कोणेषुदेवाग्रकोणमारभ्यप्रादक्षिण्येन हंहनुमंतेनमइतिहनुमंतंसंसुग्री

वायनमः इति सुग्रीवं । भं भरताय नमः इति भरतं लं लक्ष्मणाय नमः इति लक्ष्मणं शं शत्रुघ्नाय नमः इति शत्रुघ्नं विं विभीषणाय नमः इति
विभीषणं च पूजयेत् इति प्रधानपूजां विधाय श्रीरामस्यावरणपूजार्थं मान्तो देहीति देवं संप्रार्थ्य देवाभिमुखो ग्न्यावरणदेवताः पूज
येत्तोदगादिभिः विलुक्तनातो दनुणीजलेन संशोध्यावरणदेवताः पूजयेत् तत्र हृदयदेवता तुषारगौराङ्गी १ शिरोदेवता स्फ
टिकवर्णा २ हेमपिङ्गलकमाल्यानुलेपने शिखादेवता नीलोत्पलवर्णा ३ कवचदेवता हरिद्दलश्यामा ४ हेमपिकौसुंभाव
दे ५ अग्निरीशाननिर्ऋतिवायव्यकेसरेषु नेत्रदेवता कुसुमवर्णा पीताम्बरा देवाग्रे अस्त्रदेवता रक्तवर्णा रक्तवेशा देवाग्रकेसराखत
दिक्षु अस्त्रवलयोवनाः सर्वादेवसंमुखसंस्थिताः वराभयकराः मुग्धा मोहनामोहनाशनाः एवं ध्यायन् क्रमेण प्रणवपूर्वं
नमोन्तैः षडङ्गमन्त्रैः पूजयेत् इति प्रथमावरणं अत्र केचित् प्रत्यावरणं मुद्राप्रदर्शनं वदन्ति तत्र मूलादर्शनादुपेक्षितं
प्रत्यावरणे हस्तप्रक्षालनं मूलमुच्चार्य दयाब्धे त्राहि संसारसर्पान्मां शरणार्थिनं भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं इ
ति पठन् तत्तदावरणे रेमदेवनाम गृहीत्वा हृदयाद्यावरणात्मने रामाय नमः इति देवे पुष्पाञ्जलिं दद्यात् अष्टदलमूले स्वाग्रा
दिप्रादक्षिण्येन प्रणवपूर्वकं पूजयेदिति सर्वत्र आं आत्मने नमः निं निवृत्त्यै नमः अं अन्तरात्मने नमः प्रं प्रतिष्ठायै नमः पं प
रमात्मने नमः विं विद्यायै नमः ज्ञां ज्ञानात्मने नमः शां शान्त्यै नमः यथा रामस्तथैवैताः शक्तयश्चकराम्बुजाः इति ध्यात्वा पू
जयेत् इति द्वितीयावरणं अष्टदले वां वासुदेवाय नमः श्रीं श्रियै नमः सं संकर्षणाय नमः शां शान्त्यै नमः प्रं प्रद्युम्नाय न

मः प्रींप्रींप्रेम्णेनमः अंअनिरुद्धायनमः रंरत्यैनमः शंखचक्रगदाकरो वासुदेवः। शार्ङ्गचक्राकरः संकर्षणः। शार्ङ्गचापकरः प्रद्युम्नः।
गदाचापकरो ऽनिरुद्धः। दलाहस्तोर्ध्वादितदधीनायुधान् स्फटिकस्वर्णदूर्वेन्द्रनीलाभान्वासुदेवादीन्॥ स्वर्णाभ्यच्छप
ग्रकिंजल्कश्यामलाः श्यादींश्च ध्यात्वा पूजयेत् इति तृतीयावरणं दलाग्रे हंहनुमतेनमः १ संसुग्रीवायनमः २ भंभरतायनम ।३
विंविभीषणायनमः ४ लंलक्ष्मणायनमः ५ अंअंगदायनमः ६ शंशत्रुघ्नायनमः ७ जांजाम्बवतेनमः ८ स्वर्णाभो श्यामलः कं
स्वस्वर्णाभौ नीलाभाः क्रमात् कृताञ्जलिपुटान् ध्यात्वा पूजयेत् इति चतुर्थावरणं द्वितीयाष्टदले धृंधृष्टयेनमः जंजयं
तायनमः विंविजयायनमः सुंसुराष्ट्रायनमः रांराष्ट्रवर्द्धनायनमः अंअकोपायनमः धंधर्मपालायनमः सुंसुमंत्रा
यनमः धृष्टयादिमंत्रिणः पूर्वादिक्रमेण कृताञ्जलीन् आग्नेयादिकोणेषु मंत्रयतो द्वितीयाष्टदले ऽर्चयेत् इति पंचमावरणं
द्वादशदले वंवसिष्ठायनमः १ वांवामदेवायनमः २ जांजाबाल येनमः ३ गौंगौतमायनमः ४ भंभरद्वाजायनमः ५ कौंकौ
शिकायनमः ६ वांवाल्मीकयेनमः ७ नांनारदायनमः ८ संसनकाय नमः ९ संसनंदायनमः १० संसनातनायनमः ११
संसनत्कुमारायनमः १२ कमंडलुधरान्सर्वान्मंत्रमुद्धरतो मुनीन् द्वादशाङ्गे ऽर्चयेत्सर्वादिक्रमेणव तत्परान् इति षष्ठा
वरणम् षोडशदले नींनीलायनमः सुंसुषेणायनमः मैंमैन्दायनमः शंशरभायनमः द्विंद्विविदायनमः वंवे
दनायनमः गंगवाक्षायनमः किंकिरीटायनमः कुंकुंडलायनमः श्रींश्रीवत्सायनमः कौंकौस्तुभायनमः शंशं

नंनलायनमः = २

स॰
रु॰प॰
७२
72

त्वायनमः वें वक्रायनमः गं गदायैनमः पं पद्मायनमः षोडशाक्षे ऽवयेत्सर्वं दिक्क्रमेणकृतांजलीन् इति सप्तमा

वरणे द्वाविंशद्दलेऽग्रं अंवायनमः धं धरायनमः सों सोमायनमः आं आपायनमः अं अनिलायनमः अं अनलायनम

प्रं प्रत्यूषायनमः प्रं प्रभासायनमः वीं वीरभद्रायनमः शं शंभवेनमः गिं गिरिशायनमः अं अजैकपादेनमः अं

अहिर्बुध्न्यायनमः पिं पिनाकिनेनमः भुं भुवनाधीश्वरायनमः कं कपालिनेनमः दिं दिक्पतयेनमः स्थां स्थाणवेनम

मः भं भर्गायनमः वं वरुणायनमः सूं सूर्यायनमः वें वेदांगायनमः भां भानवेनमः इं इन्द्रायनमः रं रवयेनमः गं ग

भस्तिनेनमः यं यम[illegible]यनमः हिं हिरण्यरेतसेनमः दिं दिवाकरायनमः मिं मित्रायनमः विं विष्णवेनमः

धां धात्रेनमः अथवा द्वौरष्टमाहतिर्द्वाविंशद्दलपत्रके अथवा धरश्च सोमश्च आपश्चैवानिलोनलः प्रत्यूषश्च प्रभासश्च

वसवोऽष्टौ प्रकीर्तिताः शूले खट्वांगं तथा वज्रं परिशं कमलं कुठारं कोदंडं मुद्गरं चैव वसूनामायुधक्रमः वीरभद्रश्च

शंभुश्च गिरिशश्च महायशाः अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः भुवनाधीश्वरश्चैव कपाली च दिशांपतिः स्थाणुर्भ

र्गश्च भगवान् रुद्राश्चैकादश स्मृताः भल्लकं तोमरं शूलं खट्वांगं यमदंष्ट्रकं कृपाणं हि कें पिनाकं वज्रं चोग्रं तथांकुशं

खड्गं गवस्याणवरं शक्तिहेतिश्च रामस्तथा रुद्रायुधानि चैतानि प्रोक्तवान्कमनः शिवः वरुणः सूर्यवेदांगो भानुरि

न्द्रो रविस्तथा गभस्तिस्तु यमः स्वर्णरेताश्च दिवाकरः मित्रो विष्णुरिति प्रोक्ता आदित्याश्चादितेः क्रमात् पाशं तम

ह्रंरे शोर्वेशत्वेशंगेकृपाणकं गदांदंडंवज्रमज्ञेतथासर्प्यसुदर्शने आदित्यानोद्वादशनामामाप्रुधानिविंडः क्रमात् इत्यष्ट
मावरणे प्रथमेभूगृहे लं इंद्रायहेमवर्णायऐरावतिपतयेसांगायसपरिवारायसायुधवाहनायनमः पूर्वे १ रं अग्न
येरक्तवर्णायतेजोधिपतयेनमः २ टं यमायतमालनीलायप्रेताधिपतयेनमः ३ क्षं निर्ऋतयेदलिताञ्जनवर्णायरक्षोधिप
तयेदालिनमः ४ वं वरुणायमुक्तावर्णायजलाधिपतयेनमः ५ यं वायवेधूम्रवर्णायमरुत्पतयेनमः ६ कुं कुबे
रायसौम्यभास्वररूपाययक्षाधिपतयेनमः ७ हं ईशानायकर्पूरगौरायविद्याधिपतयेनमः ८ इतिदिग्विदिक्षु ह्रीं अ
नंतायरजताद्रिधवलसहस्रफणामंडलरत्नकरनिकरनिकरोद्भासितदिगंतरायनागाधिपतयेनमः इतिनैर्ऋत्यपश्चिमयो
र्मध्ये आं ब्रह्मणेसकलवाङ्मयतपनीयपीततनवेसांगायसपरिवारायसायुधवाहनायनमः इतिपूर्वेशानयोर्मध्ये इ
तिनवमावरणे द्वितीयभूगृहे वज्रायपीतवर्णायवज्रलांछितमौलयेनमः १ शक्तयेरक्तवर्णायैशक्तिलांछितमस्तकायै
नमः २ दंडायआकाशवर्णायदंडलांछितमौलयेनमः ३ खड्गायमुकुरतलनिभायखड्गलांछितमस्तकायनमः ४
पाशायविद्युन्निभायपाशलांछितमस्तकायनमः ५ अंकुशायरजतांगायअंकुशलांछितमस्तकायनमः ६ गदायै
शरन्नभोनीलायैगदालांछितमस्तकायैनमः ७ त्रिशूलायसोमोद्भवलायत्रिशूललांछितमस्तकयेनमः ८ सुद
र्शनायकोटिसूर्यसदृशायचक्रलांछितमौलयेनमः ९ पद्मायरक्तवर्णायपद्मलांछितमौलयेनमः १० दिक्षु

रा॰
पू॰ प॰
७२
23

इतिदशमावरणं ततः बहिः देवाग्रे वषट्कारायनमः सत्वायनमः रजसेनमः तमसेनमः मेषादिराशिभ्योनमः
पूर्वादीशानांते अनंतायनमः वासुकयेनमः रक्षणवेनमः कर्कोटकायनमः पद्मायनमः महापद्मायनमः शंखाय
नमः कुलिकायनमः इत्यावरणांतरमपि सारसंग्रहोक्तं पूजयेदिति केचित् ततो मंत्रांते सांगायसपरिवाराय
रामायगंधपुष्पांजलिंवदन् भगवन्निवेदनादिविधाय धूपपात्रे सांगारं वामतर्जन्यास्पृष्ट्वा अस्त्रमंत्रेण संप्रोक्ष्य
हृदयमंत्रेण गंधपुष्पाभ्यामभ्यर्च्य क्लींसुरभितेजसे स्वाहा इतिमंत्रेण सद्गुडंगुग्गुलं निक्षिप्य गंधर्वदैवत्याय धूपायन
मः इतिधूपं संपूज्य मूलमुच्चार्य वनस्पतिरसोत्पन्नो गंधाढ्यो धूप उत्तमः आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्य
तां इत्युच्चार्य श्रीरामएषते धूपोनमः इतिधूपमुत्सृज्य तस्य वामभागे घंटां निधाय अस्त्रमंत्रेण प्रोक्षितां तेनैव मंत्रेण त्रि
रभ्यर्च्य ओंगजध्वनिमंत्रमातः स्वाहा इतिमंत्रेण त्रिरभिमंत्र्य वामकरेण तां घंटां वादयन् ओं हे हे हे इदमिदमि
दं गृहाण स्वाहा इतिमंत्रेण नीचैर्धूपं षड्वारं निवेद्य धूपभाजने देवस्य वामभागे निधाय दीपपात्रं वाममध्य
मयास्पृश्य पूर्ववत्प्रोक्षणं पूजनं विधाय गोघृतेन तिलतैलेन वा निक्षिप्य तत्र कर्पूरगर्भिणीं वर्त्तिं निधाय ह्रीं रत्नज्यो
तिषेनमः इतिप्रक्षाल्य विष्णुदैवत्याय घृतदीपायनमः तैलदीपश्चेद्वनस्पतिदैवत्याय तैलदीपायनमः इति
संपूज्य मूलमुच्चार्य स्वप्रकाशो महादीपः सर्वतस्तिमिरापहः सबाह्याभ्यंतरज्योतिर्दीपोऽयं प्रतिगृह्यतां इत्यु

स्वार्थ्यं श्रीरामराघवते दीपो नमः इति दीपमन्त्रं जपन् शङ्खं घंटां वादयन् ॐ हं हं हं इदमिदं मिदं गृहाण स्वाहेति मंत्रेण देव
स्य पादादिमूर्द्धान्तमवेद्दीपं षट्वारं प्रदर्श्य घृतदीपं देवस्य दक्षिणभागे तैलस्य दीपं देवस्य वामभागे निधाय हस्त
प्रक्षालनं पुष्पांजलिदानं च विधाय प्राग्वद्देवस्य पाद्याचमनीयं दत्वा स्वर्णादिपात्रे भक्ष्यभोज्य लेह्यचोष्यपेयात्मकं पं
चविधमन्नं कटुम्ललवणतिक्तकषायमधुरात्मकषड्रसोपेतं नानाविधव्यंजनसमेतं नैवेद्यमानीय विष्णुदेवता
यै नैवेद्याय नमः इति नैवेद्यं संप्रोक्ष्य देवस्य पुरतश्चतुरस्रमण्डले माधारे तत्पात्रं निधाय मूलमंत्रेण वीक्षणास्त्रमंत्रेण प्रोक्ष
णीजलेन प्रोक्ष्य तेनैव मंत्रेण चक्रमुद्रया संरक्ष्य कवचमंत्रेणावगुंठ्य अधोमुखवद दक्षिणहस्तोपरि तादृशं वामह
स्तं निधाय यमिति वायुबीजेनाष्टवारमभिमंत्रयन् नैवेद्यगतस्पर्शादिदोषान् शोषयित्वा पुनर्वामस्योपरि दक्षि
णं करं प्राग्वन्निधायाधोमुखवामहस्तेनाच्छादयन् रमिति वह्निबीजमष्टवारं जपन् तद्गतदोषान् दग्ध्वाधोमुद्रां
दर्शयन् वमित्यमृतबीजमष्टवारं जपन् नैवेद्यममृतीकृत्य मूलमंत्रेणाष्टवारमभिमंत्र्य दक्षिणहस्तेन जलं गृही
त्वा हेमपात्रगते दिव्ये परमान्ने सुसंस्कृते पंचधा षड्रसोपेते गृहाण परमेश्वर मूलमंत्रं स्वाहान्तमुच्चार्य श्रीराम
यते नैवेद्यं नमः इति चुलुकोदकं समर्प्य निवेदयामि भवते जुषाणेदं हविः रामेति मंत्रेण हस्ताभ्यां तत्पात्रं त्रिरुत्तोल्य दे
वाय दर्शयित्वा पुनराधारे संस्थाप्यामृतोपस्तरणमसि परिषिंचामि भूर्भुवः स्वरोमिति परिषिच्य पात्रान्तरे येन मुद्रया जलम

मृतीकृत्य देवस्य दक्षिणहस्तेन जले किंचिद्दत्वा अमृतोपस्तरणमसि स्वाहेति देवमाचामयित्वा वामहस्तेन विकचोत्पल
रा॰ सन्निभां ग्रासमुद्रां दर्शयन् दक्षिणकरस्य कनिष्ठानामिकांगुष्ठयोगेन ॐ प्राणाय स्वाहा एवं पुनस्तर्जनीमध्यमां
सू॰प॰ गुष्ठयोगेन ॐ अपानाय स्वाहा २ पुनर्मध्यमानामिकांगुष्ठयोगेन ॐ व्यानाय स्वाहा ३ पुनस्तर्जनीमध्यमा
७४ नामिकांगुष्ठयोगेन ॐ उदानाय स्वाहा ४ पुनः पंचांगुलिभिः ॐ समानाय स्वाहा ५ इति प्राणादिपंचमुद्राभिः
पंचग्रासान् ग्राहयित्वा स्वर्णादिपात्रे जलं धेनुमुद्रया अमृतीकृत्य नमस्ते देवदेवेश सर्वतृप्तिकरं वरं अमानि
74 वेदितं शुद्धं प्रकृतिस्थं सुशीतलं परमानंदसंपूर्णं गृहाण जलमुत्तमं इति देवस्य दक्षिणभागे जलपात्रं निवेशयन्
जलं निवेद्य स्वजानुहृदये उत्तानं हस्तौ स्थाप्य करद्वये ऽनामांगुष्ठौ योजयित्वा ॐ ह्रौं नमः परायात्मने ऽनिरुद्धा
यनैवेद्यं कल्पयामीति सकृन्मंत्रमुच्चार्य पुष्पांजलिमादाय सत्पात्रे सिद्धहविः सौख्यविविधानेकभक्षणं निवे
दयामि ते देव सानुगाय जुषाण तत् इति पुष्पांजलिं दत्वा अस्त्रमंत्रेण दिग्बंधं कृत्वा देवस्य परितो जवनिकां भाव
यन् देवं स्वजाने ध्यायेत् यथा ब्रह्मेंद्राद्यैः सुरसमभितः सूपविष्टैः समेतो देव्या सिंजद्वलयकरया सादरं वीज्य
मानः नर्मक्रीडाप्रहसनसुखो हासयन् पंक्तिभोक्तॄन् भुंक्ते पात्रे कनकघटिते षड्रसान् देवदेवः इति ध्याय
न् मूलमंत्रं दशसंख्यं जपित्वा जपं समर्प्य नित्यहोमं [illegible] कुर्यात् तत्र पूजास्थानस्य ऐशानभागे कुंडे स्थंडिले वेदि

कापम्नतमेगोमयेनोपलिप्य मूलमंत्रेण वीक्षणं १ अस्त्रमंत्रेण प्रोक्षणीजलेन प्रोक्षणं २ अस्त्रमंत्रेण वदर्भैस्ता
डनं ३ कवचमंत्रेणाभ्युक्षणं ४ इति चतुःसंस्कारैः संस्कृते हृन्मंत्रेण विष्णुरुद्रेंद्रदेवताकाः प्रागग्रास्तिस्रो रेखाः ब्रह्म
यमचंद्रदेवताका उदगग्रास्तिस्रो रेखाः कुशमूलेन विलिख्य तन्मध्ये श्रावसथ्यं पूर्वे सभ्यं पश्चिमे आहवनीये उत्तरे अ
न्वाहार्ये दक्षिणे गार्हपत्ये इति पंचवह्निस्थानानि संचिंत्य कुशांकुरानस्त्रमंत्रेण संप्रोक्ष्य ॐ नमो भगवते विश्ववेश
वीभूतात्मने वासुदेवाय सर्वात्मने योगयोगपीठात्मने नमः इति तन्मध्ये योगपीठं संपूज्य तत्र लक्ष्मीमृतुमतीं विवि
न्तयोनावावसथ्यस्थाने नारायणबीजधियास्तूर्य्यकोनादिभवमग्निमस्त्रमंत्रेण नैर्ऋत्यकुण्डादादाय प्रणवेन सं
स्थाप्य चित्पिंगल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहेति मंत्रेण कुशैर्वेष्टितस्याग्निं प्रज्वाल्य काष्ठैः प
रिकल्प्य अग्निं प्रज्वालितं वंदे जातवेदं हुताशनं सुवर्णवर्णममलं समिद्धं सर्वतोमुखं इति तिष्ठन्कृताञ्जलिरुपस्था
योपविश्याग्निगोस्थे हिरण्यायै नमः गुदे कनकायै नमः शिरसि रक्तायै नमः भ्रुवि कृष्णायै नमः नासिका
यां सुप्रभायै नमः नेत्रयोः अतिरक्तायै नमः सर्वांगेषु बहुरूपायै नमः इति सप्तजिह्वा विन्यस्य सहस्रा
र्चिषे हृदयाय नमः स्वस्तिपूर्णाय शिरसे स्वाहा उत्तिष्ठपुरुषाय शिखायै वषट् धूमव्यापिने कवचाय हुं सप्त
जिह्वाय नेत्राय वौषट् धनुर्धराय अस्त्राय फट् इति षडंगमंत्रान्करयोर्विन्यस्य हृदयादिषु विन्यसेत् ततः स्रुक्स्रु

रा० प्र०प० ७५ अग्नयेजातवेदसेनमः वामांसे अग्नयेसप्तजिह्वायनमः वामपार्श्वे अग्नयेहव्यवाहनायनमः वामकट्यां अग्नयेअश्वो
दरजायनमः लिंगेअग्नयेवैश्वानरायनमः दक्षिणकट्यां अग्नयेकौमारतेजसेनमः दक्षिणपार्श्वे अग्नयेविश्वमुखायन
मः दक्षिणांसेअग्नयेदेवमुखायनमः इत्यग्नेर्मूर्तीर्विन्यस्य गर्भरहितैर्दर्भैः प्रागादिक्रमेणोत्तराग्रैः सर्वाग्नेश्च परिस्तीर्यंव
ह्नेर्मुखेषट्कोणंविभाव्य तत्रमध्येषट्सुकोणेषुवमध्यादिप्रादक्षिण्येनप्रागुक्ताः सप्तजिह्वाः संपूज्य तद्बहिरष्टदलेक
मलेविभाव्यतत्केसरेषुअग्नीशाननिरृतिवायुकोणेषुवन्हेस्तदग्रादिचतुर्दिक्षुषडंगानिप्रागुक्तानिसंपूज्य अष्टदले
षु स्वाग्रादिप्रादक्षिण्येनाष्टमूर्तीः प्रागुक्ताःसंपूज्य तत्बहिर्दिक्पालांस्तदायुधानिचसंपूज्यमध्येओंवैश्वानरजातवे
दइहावहलोहिताक्षसर्वकर्माणिसाधयर स्वाहा इतिमंत्रेणाग्निंगंधादिभिःसंपूज्य अस्त्रमंत्रेणक्षालितायमाज्य
स्थाल्यामाज्यंनिक्षिप्यमूलमंत्रेणाष्टवारमभिमंत्र्यवमितिधेनुमुद्रयामृतीकृत्य दर्भद्वयंवन्हौप्रक्षाल्यहृदयमंत्रेण
तेनाज्यंपर्यग्निकृत्वा दर्भेपुरमग्नौनिक्षिप्य० पुनःकवचमंत्रेण प्रदीप्तदर्भद्वयेनतद्धृतेनीराज्याग्नौदर्भद्वयंनिक्षिप्य
पुनर्दर्भौप्रक्षाल्यअस्त्रमंत्रेणप्रदर्श्याग्नौतान्निक्षिप्य स्रुक्स्रुवौ तदभावेपलाशस्यमध्यमपत्रद्वयं अश्वत्थपत्रद्वयं
वागृहीत्वाऽग्नौप्रताप्यकवचमंत्रेणदर्भैःसंमार्ज्यपुनःप्रताप्य अस्त्रमंत्रेणप्रोक्ष्यदर्भेषुनिधायमार्जनदर्भानग्नौनि
क्षिपेत् आज्यमध्येकुशेदत्वादक्षिणभागात् स्रुवेणाज्यमादायाग्नयेस्वाहा इत्यग्नेर्दक्षिणनेत्रेजुहुयात्अग्नयेइदंनमम ७४

स्वदेशत्यागं कृत्वा एवं सर्वत्र तत्तन्नाम्नोद्देशत्यागः कृत्वा हुतीयः ततः पुनर्वामभागादाज्यमादाय सोमाय स्वाहेति वह्नेर्वामनेत्रे हुत्वा
पुनर्मध्यभागादाज्यमादाय अग्नीषोमाभ्यां स्वाहेति वह्नेर्भालनेत्रे हुत्वा पुनराज्यमादायाग्नये स्विष्टकृते स्वाहेति वह्नेर्वक्त्रे जु
हुयात् ततः ॐ भूः स्वाहा अग्नये इदं न मम ॐ भुवः स्वाहा वायवे इदं न मम ॐ स्वः स्वाहा सूर्याय इदं न मम ॐ भूर्भुवः स्वः
स्वाहा प्रजापतये इदं न मम इत्याहुतिचतुष्टयं हुत्वा ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय २
स्वाहा इत्यग्निमन्त्रेणाहुतित्रयं हुत्वा अग्ने गर्भाधाने सम्पादयामि स्वाहेत्यादि गर्भाधान पुंसवन सीमन्तोन्नयन जातक
र्मान्नप्राशन चूडाकरणोपनयन समावर्तन विवाहाख्यान्संस्कारान् पृथक् पृथगष्टाहुतिभिः कृत्वा पूर्वोक्तजिह्वादिस्
थितदेवतानां सं हिरण्यायै स्वाहेत्यादि तत्तन्नामभिश्चतुर्थी स्वाहान्तैरेकैकामाहुतिं हुत्वा ॐ स्वाहा ॐ श्रीं स्वाहा
ॐ श्रीं ह्रीं स्वाहा ॐ श्रीं ह्रीं क्लीं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा ॐ श्रीं ह्रीं ग्लौं गं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वा
हा ॐ श्रीं ह्रीं क्लीं ग्लौं गं ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरव
रद सर्वजनं मे वशमानय स्वाहा इति महागणपतिमन्त्रैर्दशधा विभज्य हुत्वा पुनः समस्तेन महागणपति मन्त्रेण
चत्वारिंशज्जुहुयात् इति संस्कृते ऽग्नौ देवं ध्यात्वा मूलमन्त्रेण गन्धादिभिः संपूज्य वह्निदेवतयोरैक्यं विभावयन्मूलम
न्त्रेण स्वाहान्तेनाज्यपायसतिलतण्डुलव्रीहियवभक्तानामन्यतमेन हुतयतिरिक्तद्रव्ये सत्रिमधुयोगं केवलघृतयोगं वा

रा॰ पू॰ प॰ ७६

76

कृत्वा तर्जनीरहितवत्तरेगुलियोगन्मुयाहंसीमुद्रया पंचविंशत्याहुतीर्हुत्वा सीतादिविभीषणान्तानां १० तत्तन्मं
त्रैरेकैकामाहुतिंहुत्वा रां हृदयाय स्वाहा रीं शिरसे स्वाहा रूं शिखायै स्वाहा रैं कवचाय स्वाहा रौं नेत्राय स्वाहा रः
अस्त्राय स्वाहा इति षडंगमंत्रैः षडाहुतीर्हुत्वा आवरणदेवतानां तत्तन्नाममंत्रेण स्वाहान्तेनैकैकामाहुतिंहुत्वा
ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा ॐ भुवो वायवे चान्तरिक्षाय च महते च स्वाहा ॐ स्वरादित्याय च दिवे च महते च
स्वाहा ॐ भूर्भुवः स्वश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा इति चतस्र आज्याहुतीर्हुत्वा ॐ इतः पूर्वं प्राण
बुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्नाय यत्स्मृतं य
दुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहेति मंत्रेणाज्याहुतीर्हुत्वा वह्निं प्राग्वत्संपूज्य न्यूनातिरिक्तसिद्ध्यर्थं
ददामि सघृतैस्तिलै ॐ हूं सांगं कुरु स्वाहा इति तिलैरेकामाहुतिंहुत्वा ॐ सहस्रार्चिर्महातेजा नमस्ते बहुरूपधृक्
सर्वाशिने सर्वगजपावकाय नमोस्तु ते त्वं रौद्रो घोरकर्मा च घोरहा त्वं नमोस्तु ते विश्वरूप लोकपालोसि शांति
मत्र प्रयच्छ मे इत्यग्निं प्रार्थ्य घृतेन स्रुचमापूर्य्य तदुपरि पुष्पं दत्वा अधोमुखस्रुवेण तन्मुखं पिधाय शंखवत्से
मुद्राभ्यां कराभ्यां गृहीत्वोत्थाय मूल मंत्रेण वौषडन्तेनाहुतित्रयं हुत्वा प्रोक्षणीजलेन वह्निं परिषिच्य मूलमं
त्रेण तत्र देवं संपूज्य संहारमुद्रया पूजावशेषे विसृज्य अग्निं संपूज्य भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक कर्मा

तेरेपि संप्राप्ते सन्निधिं कुरु सादरं इत्यग्निं प्रार्थ्य संहारमुद्रया स्वहृत्पद्मे समर्पयेत् इति नित्यहोमविधिः अत्रैवं विस्ताराश
क्तौ अग्न्याधानादिकं कर्म नित्यहोमे विनियते इति वसिष्ठसंहितावचनाल्लौकिकाग्नावेव देवं ध्यात्वा संपूज्य मूलमंत्रे
ण पंचविंशत्याहुतीः सीतालक्ष्मणशार्ङ्गशरमंत्रैस्त्रयाहुतीः षडंगमंत्रैश्च षडाहुतीः आवरणदेवतानामेकैकामाहु
तिं च जुहुयात् आवरणहोमाशक्तौ मूलमंत्रेण सीतादिमंत्रैः षडंगमंत्रैश्चैकसंख्यं जुहुयात् होमाशक्तौ प्रधानहो
मसंख्याद्विगुणो जपः कार्यः इति नित्यहोमं विधाय पूजास्थाने गत्वा स्वासने उपविश्य मूलमंत्रेण प्राणायामत्रयं
कृत्वा ऋष्यादिकरषडंगन्यासपूर्वकं मूलमंत्रेण पुष्पांजलित्रयं दत्वा पूजाचक्रस्येशानकोणे चतुरस्रवृत्तत्रिकोणमं
डले कृत्वा तत्र साधारे सव्यंजनान्नोदकसहितं ताम्रादिपात्रं निधाय सर्वभूतानि इहागच्छंतु इह तिष्ठंतु इत्यावाह्य सर्वभूते
भ्यो नमः इति पुष्पादिभिः संपूज्य ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः योगिन्यो ह्युग्ररूपाश्च गणानामधिपा
श्च ये भूचराः खेचराश्चैव तथैवान्तरिक्षगाः सर्वे ते प्रीतमनसो भूता गृह्णंत्विमं बलिं इति वामकरांगुलिभिर्धृतपा
त्रात्पात्रान्तरेण हृतजलधारां बलिपात्रे निक्षिपन् बलिमुत्सृज्य पुष्पांजलिमादाय भूतानि यानीह वसंति भूतले ब
लिं गृहीत्वा विधिवत्प्रयुक्तं संतोषमासाद्य व्रजंतु सर्वे क्षमंतु तान्यत्र नमोस्तु तेभ्यः इति पुष्पांजलिं दत्वा प्रणम्य यथा
सुखं विहरंतु भूतानीति नाराचमुद्रया विसृज्य अस्त्रमंत्रेण शुद्धजलैः स्वात्मानं प्रोक्ष्य देवं संध्यात्वा पात्रांतरे वामि

रा.
पू.प.
८८
77

तिधेन्नमुद्दयाजलममृतीकुरु अमृतापिधानमसिस्वाहेतिदेवायउत्तरापोशानंदत्वा नैवेद्यंगतसारंविभाव्य तस्मात्सह
स्रांशभागतोशेवानहृत्यतीर्थलिकेत्रे सर्वदेवस्वरूपायपरायपरमेष्ठिनेश्रीराममसेनायुक्ताय विष्वक्सेनायतेनमइतिदेवस्यवा
मभागेवतुरस्रेमंडलेविष्वक्सेनायतेनमइतिदेवस्यवाममभागेपरिकल्प्य हस्तंप्रक्षाल्य यस्योच्छिष्टंहिवांछंतिब्रह्मा
द्याऋषयोमलाः सिद्धाद्याश्चहरेस्तस्मैस्वयमुच्छिष्टभोजिनः यस्यनाम्नाविनश्यंतिमहापातककोटयः तस्यश्रीरघुना
थस्यस्वयमुच्छिष्टभोजिनः उच्छिष्टमेजिनस्तस्मैस्वयमद्भुतकर्मणः येनलीलावराहेणहिरण्याक्षोनिपातितः इत्युच्च
र्याथमहाप्रसादइत्युक्त्वानैवेद्यंततोनैवेद्यपात्रंविधायगोमयाद्भिरस्त्रमंत्रेणनतत्स्थानंशोधयित्वादेवायकरशोधना
र्थंस्रगंधचूर्णादिकं करप्रक्षालनार्थंजलंचदत्वा करंप्रक्षाल्यित्वागंडूषजलंदत्वादंतशोधनार्थंकर्पूरशकलानिदत्वा
पुनर्गंडूषजलंदत्वापादप्रक्षालनार्थंदत्वाआचमनीयंदत्वाकरवस्त्रेणप्रोंछनार्थंसूक्ष्मवस्त्रमुपनीयकरप्रोंछनं
भावयित्वास्रगंधचूर्णादिभिः करौसुरभितौकारयित्वाताम्बूलमादाय मूलमुच्चार्यश्रीरामतमालदलकर्पूरप्रगमभा
गतरंगितेस[redacted]संशोभितेस्रगंधवतीम्बूलेप्रतिगृह्यतां एततेताम्बूलंनमइतिताम्बूलंसमर्प्य प्राग्युक्तनिवेदनमं
त्रेणनिवेद्य हस्तौप्रक्षाल्यमूलमंत्रमुच्चार्य सुप्रसन्नायश्रीरामायराघवायांजलिर्नमइतिपुष्पांजलिंदत्वा पुनर्मू
लमुच्चार्यसुप्रसन्नायश्रीरामायएषगंधोनमइतिगंधंदत्वा एवंगंधपुष्पधूपदीपैराराधयेदितिप्रसन्नपूजा

३॥

विधायश्रादर्शं दर्शयित्वा छत्रचामरव्यजनादिराजोपचारान् परिकल्प्य दूर्वाक्षतकुशजलान्यादाय मूलमुच्चार्य श्रीरामप्रतने
नीराजनेन नम इति देवस्य मुकुटोपरि दूर्वादिकं निक्षिपेत् अत्र नीराजनशब्देनारात्रिकमुच्यते तच्च कांस्यादिहस्तत्कालपावे
दनादिना अष्टदलं कमलं कृत्वा तन्मध्ये ऽष्टदलेषु चापिष्टमयान्नवदीपान् घृतपूर्णान् कर्पूरगर्भवर्तिसहितान्प्रदी-
प्य ह्रीं इति प्रज्वाल्य क्वचिच्चतुरस्रमंडले निधाय वमिति धेनुमुद्रयाऽमृतीकृत्यास्त्रमन्त्रेण चक्रमुद्रया संरक्ष्य श्रीं ह्रीं
ग्लें ग्लें लें ह्रीं श्रीं इति रत्नेश्वरीविद्यया मूलमन्त्रेण च पृथक्पृथगभ्यर्च्य तत्पात्रं कराभ्यामादायोत्थाय मूलमन्त्रमुच्चरन्
देवस्य चरणात् मूर्द्धान्तं च पुनः पुनर्भ्रामयन् नवकृत्वो नीराजयेत् इति नीराजनविधिः ततः प्रणम्य मूलमन्त्रेण प्राणा-
यामत्रयं कृत्वा ऋष्यादिकरषडंगन्यासांश्च विधाय प्रणवादीनां ऋष्यादीनुच्चार्य प्रणवस्य ऋष्यादिकरषडंगन्यासान्
विधाय प्रतिष्ठितामक्षमालां संपूज्य मंत्राद्द्विगुणं प्रणवं जप्त्वा देवं ध्यायन् जपेत् प्रणवं मूलमन्त्रमष्टोत्तरसहस्रं तद-
र्द्धं त्रिंशतं अष्टोत्तरशतं वा जपित्वा दशदशसंख्याकान् सीतालक्ष्मण भरत शत्रुघ्नहनुमन्मन्त्रान्योगतो जपेत् तत्र
कार्यस्तु सीतामन्त्रस्य जनकाय ऋषये नमः शिरसि गायत्रीछन्दसे नमः मुखे श्रीसीतायै देवतायै नमः हृदये
श्रीं बीजाय नमः गुह्ये स्वाहा शक्तये नमः पादयोः श्रीसीताप्रीतये विनियोगः इति कृत्वांजलिं वदेत् इति ऋषिन्यासं
कृत्वा श्रां हृदयाय नमः श्रीं शिरसे स्वाहा श्रूं शिखायै वषट् श्रैं कवचाय हुं श्रौं नेत्राय वौषट् श्रः अस्त्राय फट् इति

रा० पू०प० ७८

78

मंत्रैः करांगन्यासौ विधाय ध्येयाद्दक्षिणपाणौ दधतीरक्तांबुजं स्ववर्णाभा रामं विलोकयंती सनन्नमेकासनस्था सीता इ
ति ध्यात्वा मंत्रं जपेत् लक्ष्मणमंत्रस्य अगस्त्यऋषये नमः शिरसि गायत्रीछंदसे नमः मुखे लक्ष्मणाय देवतायै नमः
हृदये लंबीजाय नमः गुह्ये नमः शक्तये नमः पादयोः पुरुषार्थचतुष्टये विनियोगः इति कृतांजलिर्वदेत् इति ऋषिन्या
सं कृत्वा लां हृदयाय नमः लीं शिरसे स्वाहा लूं शिखायै वषट् लैं कवचाय हुं लौं नेत्राय वौषट् लः अस्त्राय फट् इति
मंत्रैः करांगन्यासौ विधाय द्विभुजं स्वर्णरुचिरतनुं पद्मनिभेक्षणं धनुर्बाणकरं रामसेवासंसक्तमानसं इति ध्यात्वा मं
त्रं जपेत् भरतस्यैवमेव स्याच्छत्रुघ्नस्याप्ययं विधिः ध्याने नीलवर्णाविति विशेषः शेषं समाने हनुमन्मंत्रस्य ईश्वराय ऋषये न
मः शिरसि अनुष्टुभे छंदसे नमः मुखे हनुमते देवतायै नमः हृदे हंबीजाय नमः गुह्ये स्वाहा शक्तये नमः पादयोः हा हा
हा कीलकाय नमः हृदि हनुमत्प्रीतये विनियोगः इति कृतांजलिर्वदेत् इति ऋषिन्यासं विधाय नमो भगवते आंजनेया
य हृदयाय नमः रुद्रमूर्तये शिरसे स्वाहा वायुसुताय शिखायै वषट् अग्निगर्भाय कवचाय हुं रामदूताय नेत्राय वौषट्
ब्रह्मास्त्रनिवारणाय अस्त्राय फट् इति मंत्रैः करांगन्यासौ विधाय स्वर्णाभं द्विभुजं जेऊडलाढ्यं शोभिमुखांबुजे कृतांज
लिं हनुमंतं ध्यात्वा मंत्रं जपेत् न्यासः क्रमेण लिख्यते श्रीं सीतायै स्वाहा ६ लं लक्ष्मणाय नमः ७ भं भरताय नमः ८
शं शत्रुघ्नाय नमः ७ नमो भगवते आंजनेयाय महाबलाय स्वाहा १८ इति पुनः प्राणायामऋष्यादिन्यासपूर्वकं

रा

श्री

जपमालांशिरसिनिधाय अर्घोदकमादाय ॐपुंडरीकाक्षविश्वात्मन्मंत्रमूर्तेजनार्दन गृहाणेमंजपंनाथममदीन
स्यशाश्वतइति उच्चार्यमूलमंत्रेच देवस्यदक्षिणहस्तेगृहीतोदकदानेनजपंसमर्प्य जपमालांसंपूज्यरहसिधा
रयेत् अत्रजपमालाभावे अंगुलिभिर्वाजपगणनाकार्या अथजपंविधाय घंटावादनपूर्वकं श्रीहनुमानुवाच
तिरश्चामपिअरातिसमवायमपेयुषां यथाभग्रीवमुख्यानांयस्तमुग्रंनमाम्यहं १ सकृदेवप्रपन्नाय विशिष्टामैर
येच्छ्रियं विभीषणायाब्धितटेयस्तंवीरंनमाम्यहं २ योमहान्पूजितोव्यापीमहाब्धेःकरुणामृते स्तुतेयेनजटा:
योश्चमहाविष्णुंनमाम्यहं ३ तेजसाप्यायितायस्यज्वालाल्लिज्वलनादयः प्रकाशन्तेस्वतेजोयस्तंज्वलंतंनमाम्यहं ४
सर्वतोमुखतायेनलीलयादर्शितारणे राक्षसेश्वरयोधानांतंवंदेसर्वतोमुखं ५ नृभावेयःप्रपन्नानांहिनस्तिवत
यातृष्णु सिंहःसत्वानिवोत्कटस्तंनृसिंहंनमाम्यहं ६ यस्माद्विभ्यतिवातार्कज्वलनेंद्राःसमृत्यवः भियंतनोति
पापानांभीषणंतंनमाम्यहं ७ परस्ययोभवतापेदारहितोभितमंगलं ददात्येवनिजोदार्पापस्तंभद्रंनमाम्यहं ८
योमृत्युंनिजदासानांमारयत्यखिलेष्टदः अत्रोदाहृतयोवक्ष्यामृत्युमृत्युंनमाम्यहं ९ यत्पादपद्मप्रणतोभवत्यु
त्तमपूरुषः तमजंसर्वदेवानांनमनीयंनमाम्यहं १० अहंभावंसमुत्सृज्यदासस्तैनैवरघूत्तमं भजेहंप्रत्यहंरामंस
सीतंसहलक्ष्मणं ११ नित्यंश्रीरामभक्तस्यकिंकरायमकिंकराः शिवमय्यादिशास्तस्यसिद्धयस्तस्यदासिका: १२

रा॰
पू॰प॰
७२

79

इमेहनुमताप्रोक्ते मंत्रराजात्मकेस्तवे पठन्ननुदिनेयस्तु सरामेभक्तिमान्भवेत् १२ इतिश्रीहनुमताप्रोक्तेमंत्रराजा
त्मकेस्तोत्रेसंपूर्णं अनेनस्तोत्रेणपुरुषसूक्तेनमूलमंत्रेणवस्तुतानतः प्रदक्षिणांकुर्याद्रामवस्पनपस्तवैः सप्तद्वी
पधरादानपुण्यंविद्धिपदेपदे एकोपिकृष्णस्यकृतप्रणामोदशाश्वमेधावभृथेनतुल्यः दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणामीनपुनर्भवाय इति
प्रदक्षिणांकृत्वा ध्येयंसदापरिभवघ्नमभीष्टदोहंतीर्थास्पदंशिवविरिंचिनुतंशरण्यं भृत्यार्तिहंप्रणतपालभवाब्धिपो
तंवंदेमहापुरुषतेचरणारविंदं १ त्यक्त्वासुदुस्त्यजसुरेप्सितराज्यलक्ष्मीधर्मिष्ठआर्यवचसायदगादरण्यं मायामृ
गंदयितयेप्सितमन्वधावद्वंदेमहापुरुषतेचरणारविंदं २ श्रीरामचंद्ररघुपुंगवराजवर्य राजेंद्ररामरघुनायक
राघवेश राजाधिराजरघुनंदनरामचंद्र दासोऽहमद्यभवतःशरणागतोस्मि यस्यामलंनृपसदःसुयशोऽ
धुनापिगायंत्यघघ्नमृषयोदिगिभेंद्रपट्टं तंनाकपालवसुपालकिरीटजुष्टपादांबुजंरघुपतेःशरणंप्रपद्ये ४
नमोब्रह्मण्यदेवायरामायकुंठमेधसे उत्तमश्लोकधुर्यायन्यस्तदंडार्पितांघ्रये ५ इंदीवरदलश्यामोरामोरा
जीवलोचनः वर्ततेहृदयेयस्यास्तांसीतांप्रणमाम्यहं ६ दोर्भ्यांपद्भ्यांजानुभ्यामुरसाशिरसादृशा मनसाव
चसाचेतिप्रणामोऽष्टांगईरितः ७ जानुभ्यांचैवबाहुभ्यांशिरसावचसाधिया पंचांगकःप्रणामःस्यात्पूजा
सुप्रवराविमौ ८ कालिकापुराणे पूर्ववद्दंडवद्भूमौनिपत्यहृदयेनतुचिबुकेनमुखेनाथनासयाहनुकेन

दाभ्यां

वत्रस्त्रेणैकार्णाभ्यांपद्भूमिस्पर्शनेक्रमात् त्वदङ्गोगइतिशेकोनमस्कारोमनीषिभिः इतिप्रणम्यततोरामंसं
तोष्य ॐयद्दत्तंभक्तिमात्रेणपत्रंपुष्पंफलंजलं निवेदितंचनैवेद्यंतद्गृहाणानुकंपया मंत्रहीनंक्रियाहीनंभक्ति॰
हीनंचयत्तम यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे आवाहनंनजानामिनजानामिविसर्जनं पूजांचैवनजाना॰
मित्वंगतिःपरमेश्वर कर्मणामनसावाचात्वत्तोनान्यागतिर्मम अंतश्चारेणभूतानांदृष्टात्वंरघुनंदन नाथयो॰
निसहस्रेषुयेषुयेषुव्रजाम्यहं तेषुतेष्वचलाभक्तिरच्युतास्तुसदात्वयिअपराधसहस्राणिक्रियंतेऽहर्निशंमया
दासोऽयमितिमांमत्वाक्षमस्वरघुनंदन रामोदाताचभोक्ताचरामःसर्वमिदंजगत् रामोजयतिसर्वत्रयोरामःसो॰
हमेवहि इतिकृतांजलिःसमाप्य पुनःपुनःप्रणम्य इष्टार्थंप्रार्थनांकृत्वा अर्घ्यपात्रमुद्धृत्य ॐसाधुर्वाऽसाधु॰
र्वाकर्मयद्यदाचरितंमया तत्सर्वंभगवन्रामगृहाणाराधनंपरं इतिकृतमाराधनंकिंचिदर्घोदकदानेनदे॰
वस्यदक्षिणकरेसमर्प्य पुनःप्रागवदवसानार्घंदत्वासजलंशंखंदेवस्योपरिभ्रामयित्वातज्जलेनात्मानंप्रोक्षयेत्॥
तत्फलंस्कांदे शंखेविस्थितंयद्धरिमस्तकोपरिभ्रामयेद्यस्तुनरः सभक्त्यास्वयेवमहुर्नोजकृतेऽभिषेके गंगास्नाता॰
भःकृतकोटिभिः किंइतिततः आधारेतिर्यक्शंखंसंस्थाप्यतंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे नमितःसर्व॰
देवैश्चपांचजन्यनमोस्तुतेइतिमंत्रेणपूजयेत् तत्फलंपद्मपुराणे दर्शनादेवशंखस्यकिंपुनःपूजनेकृते

स्था द्य श्रा

विलयं यांति पापौघा हिमवद्भास्करोदये इति ततः पुष्पांजलिमादाय ॥ ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्व
रा० प्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वा
मू०प० हा श्रीगुरुदेवसमर्पितमस्तु इति देवस्य पादयोः पुष्पांजलिं दत्वा प्रणम्य ॥ प्रसादवेदमैदर्शयित्वा देवदेव जगन्नाथ शं
८० खचक्रगदाधर देहि राममानन्तोनवतीर्थनिषेवणे इति देवं प्रार्थ्य ॥ श्रीरामस्यात्मां भावयित्वा मत्वा वनार्घ्यं दत्वाय
सर्वतीर्थमयाय श्रीरामपादोदकाय गंध० पुष्प० धूप० दीप० नैवेद्य० तोहलानिदत्वा वरणे पवित्रे वितते पुराणे ये
न पूतस्तरंति दुष्कृतानि तेन पवित्रेण शुद्धेन पूता अति पाप्मानमरातिं तरेम लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्रा
जमानं महस्वत् अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधातु इति पठन् सवर्धमानं तीर्थपात्रं शिर
सि निधाय धन्योऽहं कृतकृत्योऽहं सभाग्योऽहं पुनः पुनः रामपादोदकं पुण्यं येन प्राप्तं मया भुवि त्यात्मानं कृतकृ
त्यं भावयित्वा कस्मिंश्चिदाधारे स्थापयेत् केवलायां भूमावितिसांप्रदायिकाः ॥ ततो रामपुरोभागे वलिर्विभीषणो भी
ष्मः कपिलो नारदोऽर्जुनः प्रल्हादश्चांबरीषश्च वसुर्वायुसुतः शिवः विष्वक्सेनोद्धवाक्रूराः सनकाद्याः शुकादयः
श्रायांतु वैष्णवाः सर्वे दीनोद्धरणतत्पराः इति तान्नावाह्य गंधादिभिः संपूज्य रामपादोदकधूप दीप प्रोष नैवे
द्य भोगैः संपूज्य ॥ मूलेन प्राणायामत्रयं कृत्वा करन्यासं विधाय पुष्पांजलिमादाय मूलमंत्रमुच्चार्य ॐ रश्मिमत्पारा

यवसपूजितायाश्च देवताः रायवांगे विलीनास्ताः सन्तु सर्वे स्वावहा इति पुष्पांजलिं निक्षिप्य द्वारदेवताग्रर्वदेवताश्चो
गावरणदेवताश्च देवस्यांगे विलीना इति विभाव्य देवं तेजोरूपं विभाव्य श्रीरामदत्तमस्ते निर्माल्यं दत्तासे ह्वारमुद्रांवध्वा
ॐ गच्छ गच्छ परे स्थाने स्वस्थाने परमेश्वर यत्र ब्रह्मादयो देवा न विदुः परमं पदं इति पठित्वा निर्माल्यपुष्पेण सह तत्ते
जः संहृत्याघ्राय वहन्नासापथनात्तेजो ब्रह्मरंध्रनीतात्मपुष्पाग्रगोणं हृदयकमलमानीय ॐ तिष्ठ तिष्ठ परे स्थाने
स्वस्थाने परमेश्वर यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठन्ति मे हृदि इति स्वहृदि संस्थाप्य तत्र यथोक्तरूपं देवं ध्याता
मानसैरुपचारैः संपूज्यांगन्यासं कुर्यात् सालग्रामेतु संहारमुद्रानंतरं मूलमंत्रस्यान्ते रश्मिरूपारायवस्येति
मत्रान्ते च पुष्पांजलिं दानानंतरं संहाराद्यावरणंतदेवादेवस्यांगे विलीना इति विभाव्य मूलमंत्रार्थं पयेनयत्नामि
ति मंत्रं पठित्वा पुष्पांजलिं देवे दत्वा अंगन्यासं विधाय ताम्रादिपात्रे गंधपुष्पान्वितं जलमापूर्य सूर्याभिमुखं स्थित्वा
त्वा ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे नमः सवित्रे शुचये सवित्रे कर्मदायिने इति पठित्वा ह्रीं ह्रीं सः श्री
सूर्यराघवेऽर्घ्यं स्वाहा इति सूर्यायार्घ्यं दत्त्वा कृतांजलिः ॐ यत्नाच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम सर्वं तदच्छिद्रम
स्तु भास्करस्य प्रसादतः इत्यच्छिद्रमवधार्य पूजावशिष्टं गंधं स्ववामकरे निधाय तत्र शंखोदकं किंचित्क्षिप्त्वा लो
ध्रमूलमंत्रेणाष्टवारमभिमंत्र्य तेन जलेन स्वात्मानं संशोध्य स्वनिकटस्थितं वैष्णवेभ्यो हरिनिर्माल्यपादोदक

एवं कालत्रये पूजा कार्या रात्रौ तु पूजानन्तरं शय्यामास्तीर्य जलपात्रं तदधो निवे
श्य प्रार्थयेत् बलीयसा पक्षाग्नाभिन्न पदवीमवधारयेन आगच्छ शयनागारं
सीतया सह माधव। पर्य्यङ्के तुले के प्रवालफलके भोगीन्द्रचित्राङ्के स्वच्छप्रच्छ
भावुके मृदुशिरःस्थानोपधानादिके। उन्मीलत्कुलशीलया दयिते या

दिनं एवं पूजा कार्या रात्रौ तु प्राणायामत्रयं करष्यादिन्यासं करषडङ्गन्यासं च कृत्वा

एवं कालत्रये पूजा कार्या सकृत्पूजायां तु रात्रौ पूजानन्तरं शय्यामास्तीर्य जलपूर्णपात्रमधो निवेश्य
पञ्चोपचारैः प्राणायामत्रयं करष्यादिन्यासं च कृत्वा करषडङ्गन्यासं च कृत्वा

श्रीसीतया सत्कृते शेते
श्रीते नित्यमगराप पुराय
फलदः रा। श्रीकोशले
न्द्रो नृपः इति श्रीरामं
शय्या शे। प। यां सुप्तं
विभाव्य द्वारं पिद
ध्यात् सकृत्पूजा
यां तु दिने एव पूजा
कार्या रात्रौ तु प्राणा
याम त्रयं करष्यादि
न्यासं करषडङ्गन्या
सं च कृत्वा संक्षेपे
ण संपूज्य नीरा
जनं कृत्वा शय्या
मास्तीर्य उक्तश्लो
केन प्रार्थयेत्
॥ ३ ॥

वज्रपञ्जराद्विभज्य पश्चात्स्वयं मूलमन्त्रेण निर्माल्यं शिरसि निधाय मूलेन ॐ अकालमृत्युहरणं सर्वव्याधिविनाशनं
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहमिति नेनैव चरणोदकं सेवयेत् नैवेद्यं वैष्णवेभ्यो विभज्य स्वयं भुक्त्वा श्रीराम
रूपः स्वयं विहरेत् इति श्रीरामनित्यपूजाविधिः अथ वैष्णवेति नित्यपूजां कर्तुमशक्तश्चेत् प्रातरुत्थाय शौचादिकं
विधाय गुरुं स्मृत्वा प्रणम्य उक्तविधिना स्नात्वा स्नाने विस्तारशक्तौ निर्मलादिस्नानानन्तरं ॐ भस्म इत्यादि शिरसि
त्रिरभिषिच्य उक्तविधिना सन्ध्यातर्पणसूर्यार्घ्यदानानि कृत्वा तर्पणेऽपि विस्ताराशक्तौ मूलमन्त्रेणाष्टाविंशतिवारं
देवं सन्तर्प्य सूर्यार्घ्यदाने विस्तारशक्तौ केवलसूर्यमन्त्रेणार्घ्यं दत्वा गृहं गत्वा प्रागुक्तविधिना पश्चिमद्वारमेवसं
पूज्य प्राग्वदन्यविन्यासने कल्पयित्वा आसने विस्ताराशक्तौ ह्रीं आधारशक्तिकमलासनाय नमः इत्यासने संपूज्योपवि
श्य प्राग्वद्भूतशुद्धिं विधाय भूतशुद्धावपि विस्तारमशक्तौ प्राग्वद्धृदये जीवात्मानं ध्यात्वा तत्रैव
देवं संयोज्य प्राग्वत्पापपुरुषं ध्यात्वा तत्रैव यंबीजेन संशोष्य रंबीजेन संदह्य वंबीजेन संप्लाव्य प्राग्वद्देहमन्त्र
विभाव्य देवाज्जीवात्मानं हृदयमानीय प्राग्वत्प्राणप्रतिष्ठां विधाय तत्राप्यशक्तश्चेत् सहस्रादित्यसंकाशं स्वदर्श
नतेजो विभाव्य तत्रोपविष्टः परिशुद्धोऽस्मीति विभाव्य प्रणवेन सबीजेन हंसः सोहमनेन मन्त्रेणावाव तद्वीरजमे
न प्राणप्रतिष्ठां विभाव्य मातृकान्यासं कृत्वा समस्तमातृकान्यासमकरणाशक्तौ केवलमातृकान्यासं केशवा

81

उत्त

प्र=

दिमातृकान्यासमेव विधाय तत्राशक्तौ केवलमातृकान्यासमेव कृत्वा प्राणायाम योगपीठन्यासमूलमंत्रन्यासं च विधा
य ध्यानानन्तरं पूजार्थं स्थापनादि सर्वं प्राग्वत्समापयेत् पाद्यादिपात्रस्थापनाशक्तौ अर्घपात्रं प्रोक्षणीपात्रं च संस्थाप्य प्रो
क्षणीपात्रजलेनैव पाद्यादीनि कल्पयेत् अथ शयनोपासना मूलेन प्राणायामत्रयं विधाय ऋष्यादिकरषडंगन्यासान्
कृत्वा सकृदभ्यर्च्य नीराज्य जानकीवल्लभं प्रार्थयेत् बलीयसापदास्वामिन्मदवीमवधारय आगच्छ शयनागा
रे सीतया सह राघव पर्यंके विमले प्रशस्तफलके भोगीन्द्रविन्यासके स्वच्छे प्रच्छदभावुके मृदुशिरः स्थानोपधा
नादिके उन्मीलत्कुलशीलया दयितया श्रीसीतया सत्कृते शेते नित्यमगण्यपुण्यफलदः श्रीकोशलेन्द्रो नृपः
इति शयनोपासना अथ संक्षेपपुरश्चरणविधिः तत्र कुम्भसंभवः कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशी दे
वं ध्यात्वा जपेन्मंत्रमयुतानां चतुष्टयं दशांशं होमयेत्तस्मात्तर्पयेदभिषेचयेत् ततः सिद्धो भवेन्मंत्र इति अथ मर्त्यः वि
विक्ते देशे गोमयेनोपलिप्ते चैलाजिनकुशोत्तरे आसने स्वस्तिकासनेन प्राङ्मुख उपविश्य मूलेन प्राणायामत्रयं ऋष्या
दिन्यासान्विधाय ओं अद्येत्यादि अमुकमंत्रसिद्धिकामः कृष्णाष्टमीं समारभ्य कृष्णचतुर्दशीपर्यन्ते अमुकमंत्रस्यायु
तचतुष्टयजपेन तत्संख्याविभज्य चतुर्दशोत्तरसप्तशताधिकसहस्रपंचकं जपमहं करिष्य इति संकल्प्य प्रत्यहं चतु
र्दशोत्तरसप्तशताधिकसहस्रपंचकं जपित्वा अन्तिमदिने षोडशोत्तरसप्तशताधिकसहस्रपंचकं जपित्वा इति मदि

तेषोऽष्टोत्तरसप्तशताधिकसहस्रं जपेदित्येवमयुतत्रयजपं कृत्वा तद्दशांशहोमं तद्दशांशतर्पणं तद्दशांशाभिषेकम्
ग॰ तद्दशांशब्राह्मणान्भोजयेदिति अपरः प्रकारः कुलप्रकाशतन्त्रे अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ग्रहणेऽर्कस्य
पू॰प॰ चेन्द्रोर्वा शुचिः पूर्वमुपोषितः नद्यां समुद्रगामिन्यां नाभिमात्रेऽम्भसि स्थितः स्पर्शाद्विमुक्तिपर्यन्तं जपेन्मन्त्रं समा-
८२ हितः तावत्कालं जपितेत्यन्ततो होमादिकं चरेत् अयमर्थः तत्र शास्त्रीयोपरागे त्रिरात्रमेकरात्रं वा पूर्वमुपोषित
स्तद्दशाक्तावेकभक्तं वा विधाय ग्रहणसमयात्पूर्वं विधसमये स्नानं विधाय अद्यामुके मासि अमुकराशिगते स
वितरि अमुकतिथौ अमुकपदे भारतवर्षाख्ये भूप्रदेशे अमुकतीर्थे सूर्यग्रहणे चन्द्रग्रहणे वा सति दर्श-
82 ने अमुकगोत्रोऽमुकशर्माहं अमुकमन्त्रसिद्धिकामोऽमुकग्रहणे तत्समयमारभ्याविमुक्तिपर्यन्तममु-
कमन्त्रजपमहं करिष्ये इति संकल्पं कृत्वा दर्शनादनु स्नात्वा विमुक्तिपर्यन्तं जपेत् नान्तरा क्रियां तु कुर्यात् त-
तो ग्रहणकालीनजपदशांशहोममहं करिष्ये इति होमसंकल्पः होमाशक्तौ द्विगुणो जपः कार्यः प्रका-
रान्तरं कुलार्णवे मेधीत प्रजपेन्मन्त्रं मातृकाक्षरसंपुटं अनुलोमविलोमेन मन्त्रसिद्धिः प्रजायते विषद्य-
न्तरमेयुक्तमातृकाक्षरसंपुटं क्रमोत्क्रमाज्जप्त्वा मासात्सिद्धो भवेन्मनुः मातृकाजपमात्रेण मन्त्राणां को-
टिकोटयः सिद्धाः स्युर्नैव संदेहो यस्मात्सर्वं तदुद्भवमिति अयमर्थः क्रमोत्क्रमान्मातृकापुटितमन्त्रप्र-

तिदिनेशतंमासमात्रंजपेदिति अत्रापि अयमादिक्रमोक्तमातृकापुटितमंत्रस्य मासमात्रंप्रतिदिनेशतंशतंशो
ध्येजपमहंकरिष्ये इतिसंकल्पंविधायप्रतिदिनेजपेत् अत्रशतशब्दोन्यूनसंख्याव्यवच्छेदकः अष्टोत्तरशतंशत
संख्येजपेदित्यर्थः मातृकासंपुटप्रकारस्तु अंआंइंईंउंऊंऋंॠंलृंॡंएंऐंओंऔंअंअः कंखंगंघंङं चंछंजंझंञं टंठं
डंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवं शंषंसंहंळंक्षं राम क्षंळंहंसंषंशं वंलंरंयं मंभंबंफंपं नंधंदंथंतं णंढंडं
ठंटंञंझंजंछंचं ङंघंगंखंकं अःअंऔंओंऐंएं ॡंलृं ॠंऋं ऊंउं ईंइं आंअं इतिशतवारंमूलमंत्रंजपेत् त्रिषष्टिमातृ
का तथातिशास्त्रे त्रिषष्टिश्चतुःषष्टिर्वावर्णाः संभवतो मताः प्राकृते संस्कृते वापि स्वयंप्रोक्ताः स्वयंभुवा
स्वरा विंशतिरेकश्च स्पर्शानां पंचविंशतिः यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः अनुस्वारो विसर्ग
श्च कँपौ चापि पराश्रयौ दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव चेति तद्विवेकस्तु अंआंआ३इंईंई३उंऊंऊ३ऋंॠंॠ३
ऌंॡंॡ३एंऐंऐ३ओंऔंऔ३ अं अः कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवं शंषंसंहं ज
णं नं मं अं अः ँकँपँॡ ६४ एवंत्रिषष्टिवर्णमातृकाऽनया मातृकापाठस्यन्तरं विंदुयुक्तया शारदातिलकमंत्रे
संपुटीकृत्य मासमात्रंप्रतिदिनमष्टोत्तरशतंजपेत् तत्संकल्पोपि प्राग्वदेव इतिसंक्षेपपुरश्चरणविधिः अ
थरामनवमी चैत्रशुक्लनवम्यां व्रतकर्तव्यं व्रतमाह अगस्त्यसंहितायां तन्माहात्म्यस्मृतौ दिनश्रीराम

रा॰
पू॰ प॰
८३
83

नवमीप्रोक्ताकोटिसूर्यग्रहाधिकातस्मिन्दिनेमहापुण्येराममुद्दिश्यभक्तितः यत्किंचित्क्रियतेकर्मतद्भवेत्क्षयकारकं उ
पोषणेजागरणेपित्रनुद्दिश्यतर्पणे तस्मिन्दिनेतुकर्तव्यंब्रह्मप्राप्तिमभीप्सुभिः रामप्रवपरंब्रह्मतद्दिनेरामतोषणं
इतिनवमीमहिमा सतीक्ष्णमाहवाराख्यः प्रकारःसोऽभिधीयते क्रमेणयोजपेत्सम्यक्द्विपमीयोव्रतार्थिनोषडक्षरादि
कैराममन्त्रैःस्यात्पूजनंयथा सर्वेषांराममन्त्राणांमन्त्रराजःषडक्षरः तारकब्रह्मवेत्युक्तंतेनप्रजाप्रशस्यते यद्यपुरु
षस्त्रस्यदेदीक्षाविधिमजानतः वैदिकस्याप्य भावेविनाममन्त्रैर्भवेद्ध्रुवं यःप्रोक्तंचैत्रमासस्यशुक्लपक्षेजितेन्द्रियः
दन्तधावनपूर्वंतुप्रातःस्नायाद्यथाविधि नद्यांतडागेकूपेवाह्रदेप्रस्रवणेऽथवा ततःसंध्यादिकंकुर्यात्संस्मर
न्राघवंहृदि गृहमागत्यविप्रेन्द्रः कुर्यादौपासनादिकंदान्तंजितंविनंविप्रंवेदशास्त्ररतंसदा श्रीरामपूजानिर
तंसुशीलंदम्भवर्जितं विधिज्ञंराममन्त्राणांराममन्त्रैकसाधकं आहूयभक्त्यासंपूज्यहणुयात्मार्थयेत्पवित्रिति श्री
रामप्रतिमादानंकरिष्येऽहंद्विजोत्तम त्वत्रावाच्योभवप्रीतः श्रीरामोस्मितमेवमे इत्युक्त्वातेनतेविप्रेस्नापयि
त्वाततःस्वयं तैलेनाभ्यञ्ज्यवस्नायाच्छिवितयतूराघवंहृदि श्वेताम्बरधरःश्वेतगन्धमाल्यानिधारयेत् शुचितोभूषित
श्चैवकृतमाध्याह्निकक्रियः आचार्यंभोजयेत्पश्चात्सात्त्विकान्नैःसविस्तरं भुंजीतस्वयमप्येवहृदिराममनुस्मरन्
नवम्यामेकभक्तेनत्वग्रगामिन्तेनराघव इत्वाकुवंशतिलकप्रीतोभवभवप्रिय इत्येकभक्तनिवेदनंमन्त्रमेकमेकवद्धे

तीतत्र सहाचार्यो जितेन्द्रियः स एवं रामकथां दिव्यामहः शेषेण नयेन्मुनिः सायं संध्यादिकाः कृत्वा क्रियां राममनुस्मरन्
आचार्यसहितो भ्रात्रा चाधः शायी जितेन्द्रियः वसेत्स्वयं तथैकान्ते श्रीरामार्पितमानसः आचार्यकरणेऽशक्तः स्वयं भक्तः स्वये
त्सत्रे व इत्यष्टमीकृत्ये ततः प्रातः समुत्थाय स्नात्वा संध्यां विधाय च प्रातः सर्वाणि कर्माणि शीघ्रमेव समापयेत् उपो
ष्येन्नवमीं त्वद्य यामेष्वष्टसु राघव तेन प्रीतो भव त्वं भोः संसारात्त्राहि मां हरे इत्युपवासनिवेदनमंत्रः ततः स्वस्वजनाभृता
विद्वद्भिः सहितोनघ स्वगृहे चोत्तरे भागे यागमण्डपमारभेत् वन्दनैर्ध्वजपताकाद्यैः सवितानैः सतोरणम् शंखचक्रहनूम
द्भिः प्राग्द्वारे समलंकृते गरुत्मच्छार्ङ्गबाणैश्च दक्षिणे समलंकृते गदाखड्गाङ्गदैश्चैव पश्चिमे समलंकृते पद्मस्वस्ति
कनीलैश्च कौबेरे समलंकृते मध्ये हस्तचतुष्काद्यं वेदिकायुक्तमायते विचित्रनृत्यगीतैश्च वाद्यैश्चैव सुसंभृते पुण्या
हं वाचयेत्तत्र विद्वद्भिः प्रीतमानसैः तत्र संकल्पयेद्धीरो राममेवमनुस्मरन् अस्यां रामनवम्यां तु रामाराधनतत्परः
उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि इमां स्वर्णमयीं रामप्रतिमां संप्रयत्नतः श्रीरामप्रीतये दास्ये रामभक्ताय
धीमते प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे अनेकजन्मसंसिद्धान्यभ्यस्तानि महान्ति च इति त्रिभिः संकल्पः
शक्ताशक्तस्य शक्त्यास्य मूर्तिनिर्माणमुच्यते ततः स्वर्णमयीं रामप्रतिमां पलमानतः निर्मितां द्विभुजां दिव्यां वा
मांकस्थितजानकीं बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महामते वामेनात्मकरेणाराद्देवीमालिंग्य संस्थिताम्

रा॰
पू॰ प॰
८४

84

सिंहासने राजतेः त्रपलद्वयविनिर्मिते अशक्तो यो महाभाग तस्य वित्तानुसारतः पलेनार्द्धेन तदर्द्धेन तदर्द्धार्द्धेन वा मते न
तो घशक्तो रौप्येन कारयेद्रघुनंदन लोहेन निर्मिते वापि शिलया दारुणापि वा पद्मालेप्ये विलेख्ये वा मातृ रङ्कगते हरिं
कोमलांगं विशालाक्षं मिंद्रनीलमणिप्रभं दक्षिणे गे दशरथपुत्रान्वेशवणतत्परं पृष्ठतो लक्ष्मणं देवं सहच्छत्रं सचामरं
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ अग्रे व्यग्रे हनूमन्तं रामानुग्रहकांक्षिणं वित्तशाठ्यमकृत्वैव मूर्तिं कुर्यात्प्रयत्न
तः विभवे सति यो मोहान्न कुर्याद्विधिविस्तरं न तत्फलमवाप्नोति देवद्रोही स उच्यते इति मूर्तिलक्षणं आसनीय
रिमे विष्णुन्यासजालं विधाय च शालं प्रपूजयेदग्रे गंधपुष्पाक्षतादिभिः कलशं वामभागस्थं पूजाद्रव्याणि चादरात्
पात्रे च शोधयेद्धीमान् आत्मानं मंत्रमुच्चरन् विलिखेत्सर्वतोभद्रं वेदिकोपरि सुंदरं तिर्यगूर्ध्वगता रेखाः कुर्याद्देकोनविं
शति खंडेंदुस्त्रिपदा कोणे शृंखला पंचभिः पदैः एकादशपदा वल्लीभद्रं तु नवभिः पदैः चतुर्विंशत्पदा वापी परि
धिर्विंशतिः पदैः मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतं मेखंडः शृंखला कृष्णा वल्ली नीलेन पूरयेत् भद्रारुणी
सिता वापी परिधिः पीतवर्णकः वाह्ये नदले रक्ता कर्णिका पीतवर्णिका खंडेंदुः शृंखला वापी वल्ली भद्रं तु पंचम
परिध्या वेष्टितं पद्मं वाह्ये स्यात्तेरजस्तमः सर्वव्रते समुद्दिष्टं सर्वतोभद्रमंडले मध्ये ब्रह्माष्टाब्दिक्षु सोमाद्या देवताः
स्मृताः वायुसोमद्वयोर्मध्ये वसूनष्टौ च कारयेत् सोमेशानयोर्मध्ये रुद्रानेकादशैव तु ईशानेंद्रयोर्मध्ये आदित्या

नद्वादशार्वयेत् इंद्राग्निमध्येचतथाअश्विनौसंजयेत्ततः आग्नेययमयोर्मध्येविश्वदेवान्सपैतृकान् याम्यनैर्ऋतयो
र्मध्येसप्तयक्षांश्चकारयेत् नैर्ऋत्यवारीशयोर्मध्येनागाभूतांश्चकारयेत् आप्यवायव्ययोर्मध्येगंधर्वाप्सरसः ऊरु ब्रह्म
सोमद्वयोर्मध्येरुद्रानेवचकारयेत् स्कंदनंदीश्वरंशूलंमहादेवंचकारयेत् ब्रह्मेशानद्वयोर्मध्येदक्षादिःसप्तकोणगः
ब्रह्मेंद्रयोस्तथामध्येऽदितिंविस्वंचकारयेत् ब्रह्माग्निमध्येचतथास्वधादेवींचकारयेत् ब्रह्मयामद्वयोर्मध्येमृत्युरोगौ
तथैवच ब्रह्मनिर्ऋतिमध्येतुकुर्याद्गणपतिंतथा ब्रह्मवरुणयोर्मध्येआपःकार्याःप्रयत्नतः ब्रह्मवायोस्तथामध्ये
मरुतःसर्वेऊरु ब्रह्मणःपादमूलेतुमेदिनीञ्चकारयेत् कावेरीनर्मदाचैवयमुनाचसरस्वती गंगाकुक्ष्यांतथागो
दावर्याःसप्तचसागराः क्षारक्षीरमधुसर्पिर्नीरेक्षुदधिसंभवाः ब्रह्मजज्ञानमित्याद्यैर्मंत्रैस्तास्तुदेवताः गंधपुष्पा
दिभिःअर्घ्यादीयात्पायसमर्वतः सर्वत्रभद्रंयस्मात्तत्सर्वतोभद्रमुच्यते इतिसर्वतोभद्रः मध्येतीर्थोदकैःकुंभंप्र
पूर्यरत्नोदरंशुभं चूतपल्लवपुष्पैश्चयुक्तंसंस्थाप्यचार्चितं सौवर्णेराजतेताम्रेपात्रेषट्कोणमालिखेत् अला
भेबिल्वपत्रेवाकलशोपरिसंस्थिते स्थाप्योपरिवस्त्रयुग्ममच्छिन्नंसदशंशुभं दिव्यसिंहासनेतत्रस्थापयित्वाऽथवै
पेत्सुधीः ॐनमोभगवतेविष्णवेसर्वभूतात्मनेवासुदेवायसर्वात्मसंयोगयोगपीठात्मनेनमः इतिमंत्रेणतन्म
ध्येऊर्पातुपुष्पांजलिंततः इतिपीठार्चा अर्घ्यपाद्यादिकंदत्वापंचामृतेनच लेपादौनाभिषेकःस्याद्यथाहेमा

रा॰ पू॰ प॰ ८५

85

पवीतकं इति स्नानं ततः सिंहासनपीठे तत्पूजां कुर्याद्यथाविधि आवाहनं स्थापनं च सन्निधापनमेव च सन्निरोधन
मेव स्यादवगुंठनमंजसा ततस्तु मुद्राभिरेव स्याद्देवं सेव्यार्घ्यभक्तितः नानारत्नविचित्राणि दद्यादाभरणानि च हिमांबु
वृष्टिरुचिरचन्दनसारसमन्वितं गंधं दद्यात्प्रयत्नेन मासहं च सकुंकुमं कस्तूरिकाद्याहोभागो कुंकुमस्य च चंदनस्य त्रयो भा
गाः शशिनस्तिकषवहिः पद्मकर्दम इत्येष समस्तसुरवल्लभः कल्हारकेतकीजातीपुन्नागाद्यैः प्रपूजयेत् चंपकैः श
तपत्रैश्च सुगंधैः सुमनोहरैः वृतपल्लवपुष्पैश्च दूर्वाभिस्तुलसीदलैः कोमलैर्बिल्वपत्रैश्च अशोककुसुमैस्तथा राम
स्य जननी चासि रामात्मकमिदं जगत् अतस्त्वां पूजयिष्यामि लोकमातर्नमोस्तु ते इति कौशल्यां वा नमो दशरथा
येति पूजयेत्पितरं च ततः इति दशरथपूजनं ततोऽनन्तादिदेवं श्रीपरिवारान्समर्चयेत् अग्नौ हृदयमीशाने शि
रो नैऋते तु कोशिखां वायौ कवचमग्रे तु नेत्रं दिक्षु समर्चयेत् पूर्वादिषु प्रथमावरणं हनूमन्तं सुग्रीवं भरतं च
विभीषणं लक्ष्मणं गदं शत्रुघ्नं जांबवन्तं दलेष्विमान् द्वितीयं धृष्टिं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनं अकोपं
पंचमं पालं च सुमंत्रं दलमध्यतः तृतीये दलाग्रे लोकपालांश्च वज्राद्यं तदस्त्राणि ततो बहिः पंचमं नाममंत्रेण नम
स्कारयुतैर्धीमान् प्रपूजयेत् वेदोक्तवाद्यधूपं दीपं चास्मै निवेदयेत् भक्ष्यभोज्यादिनाभक्तानैवेद्यं विधिना
र्पयेत् आचामं च सतांबूलं महानीराजनं तथा नमस्कुर्यात्ततः स्तोत्रैः स्तुत्वा च प्रजपेन्मनुं शृणुवन्नूजय

नीमहात्म्यं दिव्यो रामकथोत्तथा रामभक्तैः समं यामं नयेद्राममनुस्मरन् इति प्रथमयामकृत्यं शंखपाद्यासनार्घ्यवस्त्र
यंयामे षष्ठे तद्दिनः यामे द्वितीये संप्राप्ते मध्याह्ने जन्म भावयेत् उच्चस्थे ग्रहपंचके मेषगुरौ सेंदौ नवम्यां मध्यौ लग्ने कर्का
कटके पुनर्वसु युते मेषंगते पूषाणि निर्देशे निखिलाः पलाशसमिधो मे ध्यादयो धारणे रविर्भूतमभूतपूर्वो
विभवे यत्किंचिदेकं महः पले मोमममग्रेतीति पलाशरात्समाप्त एव समिधः काष्ठानीत्यर्थः नवैवं वादयेद्वाद्या
नवेद्य जगत्पतेः फलपुष्पांबु मेघ्याणि गृहीताशेषमंगले प्रशोकर्णा तत्र समं सेकेवतलसीदलैः दशान
नवधा यो यधर्मसंस्थापनाय च दानवानां विनाशाय दैत्यानां निषूदनाय च परित्राणाय साधूनां जातो रामः स
पेहरिः गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितो नघ इत्यर्घ्यमंत्रः पुनः पुष्पांजलिं दत्वा यामे यामे स्नातं तद्दिनः पू
जयेद्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः इति नवमीकृत्यं ततः प्रातः समुत्थाय स्नानसंध्यादिकाः क्रियाः समा
प्य विधिवद्रामं पूजयेत्पूर्ववन्मुने ततो होमं प्रकुर्वीत मूलमंत्रेण मंत्रवित् पूर्वोक्तपद्मकुंडे वा स्थंडिले वा य
थाविधि लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः साज्येन पायसेनैव स्मरन्राममनन्यधीः ततो भक्त्या
हसेतो ब्रह्माचार्यं पूजयेन्मने कुंडलाभ्यां सरत्नाभ्यां मंगुलीयैरनेकधा गंधपुष्पाक्षतैर्वस्त्रैर्विविधैः सु
मनोहरैः ततो रामं स्मरन्दद्यादेवं मंत्रमुदीरयेत् इमां स्वर्णमयीं रामप्रतिमां समलंकृतां चित्रवस्त्रयुगच्छन्नां

रा॰
ह्रू॰प॰
८४

86

रामोऽहं राघवाय ते श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः इति प्रतिमादानमंत्रः इति दत्वा विधानेन दद्याद्वै दक्षिणा
शुभां अन्येभ्यश्च यथान्यायं गोहिरण्यादि शक्तितः दद्याद्दासो गृहं धान्यं यथाविभवमात्मनः ब्राह्मणैः सह भुंजी
त तेभ्यो दद्यात् दक्षिणां तव प्रसादस्वीकारं कृतं यत्कारणं मया अनेनैतेन संतुष्टः स्वामिन्भक्तिं प्रयच्छ मे इति पारणा
संकल्पः कृत्वैवं ब्रह्महत्यादिपापेभ्यो मुच्यते ध्रुवं बहुनाकिमिहोक्तेन मुक्तिस्तस्य करे स्थिता कुरुतेत्रेम
हापुण्ये सूर्यपर्वण्यनेकशः तुलापुरुषदानाद्यैः कृतैर्यल्लभ्यते फलं तत्फलं लभते मर्त्यो दानेनानेन सुव्रत
इति दशमीकृत्यं अकिंचनोऽपि नियतमुपोष्य नवमीदिने कृत्वा जागरणं भक्त्या पूजयेद्विधिवन्मुने जपन्
राममंत्रमाधारमानेगसमन्विते एकान्ते वा विधिवत्सर्वंन्यासकृतोन्वितः प्रातःसंध्यां तु विधिवद्दिवा संध्या
दिकाः क्रियाः गोभूतिलहिरण्यादि दद्याद्विभवानुसारतः एवं यः कुरुते भक्त्या सर्वपापैः प्रमुच्यते गंगायां
प्रलिपे हेम्यां लेप्यां मूर्तिं शृङ्गे ह्यस्य सेतु शक्तस्य पद्धते शक्तमशक्तो यापने चरेत् तदपि स्याद्यथाशक्त्यासौ
गत्नसमफलं तदा एकामपि नरो भक्त्या श्रीरामनवमीमृत उपोष्य कृतकृत्यः स्यात्सर्वपापैः प्रमुच्यते अ
पि प्राह्लाद शक्तस्य पूर्णैर्दानैस्तु विते इति किंचनमोद्यापने वर्षे वर्षे समर्थस्य व्रतेनैव प्रपूर्णता ततस्या
द्यापने किं विहृतादन्यद्विधीयते सर्वव्रतस्य पूर्णार्थं स्यव्रतेनैव प्रपूर्णता ततस्याद्यापने किं विहृतादन्य

मिदं रामव्रतं चरेत् नान्येनास्माद्विवत्सरितं तेनैनैव प्रपूर्णता इत्यसमर्थो यापननयइतिकुंभसंभवसंहितोक्तरामनवमीव्र
तेसमाप्तम् अथदमनपूजा तत्रस्नानार्णवे दमनारोपणंवक्ष्ये साधकानांहितायच सेवत्सरकृतापूजायेनपूर्णाभवे
त्प्रिये तयोर्भेगायमदनोममशैलभवेयदा भस्मीभूतस्तदाऽऽःखीरतिःप्रीतिश्चडःखिते तत्रेत्रवारिसंभूतादमनस्सल
ताभवत् तत्सौरभेवश्योमागस्मेहदासीत्सलोचने तेनसंतुष्टहृदयाच्छ्रोदत्तोमयाप्रिये तस्मैसैवतस्मात्दमनःयकटीकृ
तः दमनेनवयोमत्रीदृषमध्येनपूजयेत् तस्यसांवत्सरीपूजामदत्तायभविष्यति इतितस्मैवरोदत्तोमयैवसुरवंदिते
तस्माद्दमनपूजाहिकर्तव्याशीरवंदिते अन्यथातत्फलंवर्षकृतंकामायजायतेइतिदाक्षिणामूर्तिसंहितायां चैत्राद्य
स्वयोमासाः पक्षौसितासितेनरैः एतेषांसर्वपूर्वस्त्रकालः सर्वोत्तमोभवेत् अष्टम्यांवचतुर्दश्यांपौर्णमास्यामथापिवा
पूर्वरात्रौप्रकुर्वीत सर्वोवाधिवासनं आमंत्र्यदमनंवादौवक्ष्यःकल्पलतादिभिरिति ग्रंथांतरेपि मधुमासासितेप
क्षे द्वादश्यांदमनोत्सवः आगमोक्तेनमार्गेणकुर्यादिक्षोश्रुतेद्वितः अथप्रयोगः तत्रचैत्रे वैशाखे ज्येष्ठे वामासे
पक्षद्वयस्याष्टमीनवमीचतुर्दशीपूर्णमास्यन्यतमतिथौ विशेषोचैत्रादिशुक्लद्वादश्यामितिविशेषः पूजादिना
त्पूर्वेद्युःसायंकालेसाधकः कृतनित्यक्रियःवैसवैः सार्द्धंदमनसमीपंगत्वातत्रस्वासनेसमुपविश्यप्राणायाम
त्रयंकृत्वाऽऽद्यादिकरषडंगन्यासांश्चविधाय ॐकामभस्मसमुद्भूतरतिबाष्पजलोद्भव ऋषिगंधर्वदेवादिमोहना

रा॰
पू॰ प॰
८७
87

यनमोऽस्तुते सांवत्सरिकपूजायाः र्थ्यं ॐ रामप्रसादसंभूत अत्रत्वं संनिहितो भव रामकार्ये समृद्धिरूपेनेनयोसित
दात्तयेति दमनमामंत्र्य तत्र कामदेवं रतिवद्वमाणात तन्मंत्रेण संपूज्य गृहमागच्छेत् ततः पूजादिनात्पूर्वदिने
कृतनित्यकृत्यः वैष्णवैः सार्द्धं पुनर्दमनकसमीपंगत्वा अत्र मंत्रेण दमनं समूलमन्यापाशस्त्रेण वाछित्वा गृ
हमानीय अस्त्रमंत्रेणाभ्युक्ष्य पूजास्थानेकचित्वात्रे दमनं नवधा विभज्य मध्ये वाह्ये सदिक्षु संस्थाप्य हृन्मंत्रेण
चंदनागुरुकर्पूरकुंकुमादिपंकैरालिप्य मध्यमारभ्य स्वाग्रादिप्रादक्षिण्येन नवधा विभक्तं दमने ॐनमः सेनमः
हेनमः लेनमः वेनमः यनमः रेनमः ऊँनमः इति संपूज्य ततोऽस्त्रमंत्रेण संरक्ष्य चक्रमुद्रां वध्वा कवचमंत्रे
णदमनोपरिभ्रामयित्वा नूतनवस्त्रेणाच्छाद्य रक्षांसि स्थापयेदित्यधिवासने राज्ञौजयात् अत्रास्त्रमंत्रं हृन्मंत्रं कव
चमंत्रं हृन्मंत्रं कवचमंत्रादयो मूलमंत्रस्य षडंगाधोक्ता मंत्रा ज्ञेयाः एवं पूर्वदिने निमंत्रणाधिवासने न कृते वेत्पू
जादिने वा तद्द्वयं कार्यमिति ततः पूजादिने प्रातःकाले साधकः स्नानादिनित्यपूजां निर्वर्त्य वैष्णवैः सह स्वस्ति
वाचनपूर्वकं दमनं पूजास्थानमानीय शुचिस्थले सिंदूरेण चतुरस्रचतुष्टयवेष्टितमष्टदलं कमलं विधाय
तस्य मध्ये अष्टदलेषु वर्णादि रचित्वा नवकलशान्संस्थाप्य स्वासनपूजादि पीठपूजान्तं प्राग्वद्विधिना कृत्वा स्व
दक्षिणभागे सर्वतोभद्रमंडले प्राग्वदष्टदलकमलं वा सिंहादिना कृत्वा तन्मध्ये पंचवर्णरजोभिरष्टोक्तं तहेक

त्वा ॐ अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशक शोकार्तिं हर मे नित्यमानंदं जनयस्व मे इत्यशोकतरुं संप्रार्थ्य
संपूज्य युगादिप्रलयांतो यः कालरूपो महाबलः कलयत्यपि विश्वं यस्तस्मै कालात्मने नमः इति कालं च संपूज्य
तस्याशोकस्याधस्त्रिकोणमंडले मंडूकादितत्त्वान्तं पीठपूजां कृत्वा अष्टदलकेसरेषु स्वाहाद्यादिप्रादक्षिण्ये
न सौभाग्यायै नमः हृदयायै नमः वर्षायै नमः तुष्ट्यै नमः रत्यै नमः प्रीत्यै नमः संगमायै नमः निर्वाणायै नमः
कामुकायै नमः इति मध्ये संपूज्य तत्र वक्ष्यमाणकामगायत्र्या कामदेवमावाह्य आवाहनादिमुद्राः प्रतिष्ठा
ते पाशांकुशधनुर्बाणमुद्राः प्रदर्श्य कामदेवमरुणवर्णं रक्तवस्त्राभरणमाल्यानुलेपनं वामदक्षिणयो
रतिप्रीतिसुतं पाशांकुशपुष्पबाणेक्षुधनुर्द्धरं ध्यात्वा ॐ क्लीं कामदेवाय नमः इति मंत्रेण गंधादिपंचोपचा
रैः संपूज्य तद्वामभागे रतिं गौरवर्णां रक्तवस्त्रपरिधानां सर्वाभरणभूषितां पद्महृदयकरां ध्यात्वा श्रीं श्रीं श्रीं क्लीं र
त्यै नमः इति मंत्रेण रतिं गंधादिभिः संपूज्य कामस्य दक्षिणभागे प्रीतिं श्यामवर्णां सर्वाभरणभूषितां रक्तवस्त्र
परिधानां तांबूलकरां ध्यात्वा श्रीं श्रीं श्रीं क्लीं प्रीत्यै नमः इति मंत्रेण पंचोपचारैः संपूज्य कामदेवस्याग्रे कदंबव
नमध्ये वसंतं गौरवर्णं वामहस्तेन सहकारं दक्षिणहस्तेन नानापुष्पसमुच्चयं दधानं रक्तवस्त्राभर
णमाल्यानुलेपनालंकृतं ध्यात्वा वसंताय नमस्तुभ्यं वृक्षगुल्मलताश्रिय सहस्रमुखसंवाहकामसु

पनमोस्तुते वसंतायनमः इतिमंत्रेणपंचोपचारैःसंपूज्य पुनःकामदेवंतन्मंत्रेणसंपूज्य अष्टदलकेसरेषु आ
ग॰ ग्नीशासुरवायव्येषुअग्रेचतुर्दिक्षुच क्लांहृदयायनमः क्लींशिरसेनमः क्लूंशिखायैनमः क्लैंकवचायनमः
पू॰प॰ क्लौंनेत्रायनमः क्लःअस्त्रायनमः इतिषडंगानिसंपूज्य अष्टदलेषु देवाग्रादिप्रादक्षिण्येन ॐकामायनम :
८८ भस्मशरीरायनमः अनंगायनमः वसंतायनमः स्मरायनमः इक्षुधनुर्द्धरायनमः पुष्पबाणायनमः इत्य
ष्टौकामान्संपूज्य तद्बहिःलोकपालांस्तदस्त्राणिचसंपूज्य पुनःकामदेवंतन्मंत्रेणगन्धं धूपदीपादितांबूला
88 न्तानुपचारान्समर्प्यप्रणम्य ॐकामदेवायविद्महे पुष्पबाणायधीमहि तन्नोऽनङ्गःप्रचोदयात् इतिकाम
गायत्रींयथाशक्तिजपित्वासमर्प्य नमोस्तुपुष्पबाणायजगदानंदकारिणे मन्मथायजगन्नेत्रेरतिप्रीतिप्रियायच
इतिकामदेवंप्रणम्यऋष्यादिन्यासंकृत्वा मध्येकुंभेदेवमावाह्यप्राग्वत्सर्वोपचारैः सांगंसावरणंदमनैः
संपूज्य आवाहितोसिदेवेशसप्तमःकालेवरावच कर्तव्यंतुयथालाभंपूर्णपर्वंतदाज्ञया इतिविज्ञाप्यसांगंसा
वरणंदेवंदमनैसंपूज्यधूपदीपनैवेद्यानिनिवेद्य नित्यहोमोक्तविधिनातदुक्तद्रव्यैस्त्रिगुणसंख्ययाहुत्वा नित्यज
पसंख्यात्रिगुणंजपंचकृत्वा पूजाशेषंसमाप्य सर्वज्ञपजगन्नाथवांछितार्थफलप्रद हृत्स्थान्सरयमेदेव
कामान्कामेश्वरेश्वर इतिदेवंप्रार्थ्यविसृज्य गृहेवनितादिभिःपरितोष्यकुमारान् ब्राह्मणानन्नादिभिः

तोषयेत् इति दमनारोपणविधिः रामार्चनचंद्रिकायां च द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः बौधायनादिभिः
प्रोक्तः कर्तव्यः प्रतिवत्सरं तत्रस्यात्त्रीयतिथिषु वन्त्रादेर्दमनार्पणे वह्निर्विरंचिर्गिरिजागणेशः फणीविशाखो दि
नकृन्महेशः दुर्गान्तको विष्णुहरिस्मराश्च शर्वः शशी चेति तिथीशाः प्रतिपदातिथिषु पूज्याः क्रियालोपविघातार्थं य
त्त्वया विहितं प्रभो नमे विघ्नो भवेदत्र कुरु नाथ दयां मयि सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः त्वत्प्रसादेन तां देव
तोषयामि जगत्पते कामक्रोधादयो येमेन ते स्युर्व्रतघातकाः अद्यप्रभृति देवेश यावद्दौपयिके दिने तावद्रक्षा
त्वया कार्या सर्वस्यायनमोऽस्तु ते एवं विज्ञाप्य देवेशं गुरुपादौ प्रणम्य च प्रातः स्नात्वा समभ्यर्च्य देवेशं विधिव
त्ततः गच्छेद्दमनकारामं मेकादश्यां प्रशोभिते क्रयेणादाय तत्रैव पूजयेच्चंदनादिना नेष्यामि रामपूजार्थं मि
ति संप्रार्थ्य तत्र नयेत् उत्पाद्य पंचगव्येन प्रोक्ष्य प्रक्षाल्य वारिणा अशोकमूले गंधाद्यैः स्थंडिले पूजयेत्क्रमात् अशोकं
च तथा कालं वसंतं काममेव च अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन शोकार्तिं हर मे नित्यमानंदं जनयस्व मे
अनेन पूजयेत्पुष्पैरशोकं शोकनाशनं ब्रह्मादिकालपर्यंतः कामरूपो महाबलः कलनं चैव यः सर्वं तस्मै काला
त्मने नमः अनेन पूजयेत्कालमतिगर्वकलनात्मकं ॐ वसंताय नमः नमस्तेऽहद्रुमगुल्मलताश्रिय सहस्रभुजवसे
वाह कामरूप नमोऽस्तु ते वसंतं पुष्पैरनेनामन्त्रेणाकामरूपिणे ॐ कामभस्मसमुद्भूत रतिबाष्पपरिप्लुत अ

षिंगंधर्वदेवादिविमोहनननमोऽस्तु ते मंत्रस्यदमनेपुष्पंपूजयेन्मनुनानेन ॐनमोऽस्तुपुष्पबाणायजगदाल्हादका
ग॰ रिणेमन्मथायजगन्नेत्रेरतिप्रियनैमायते दमनेचोपतिष्ठेतमंत्रेणानेनमन्मथं दमनेनपृथक्कृत्वाभागेनैकेनम
पू॰प॰ न्मथंपूजयेत्क्रमागेणपरिवारसमन्विते कामायनमइत्येषमंत्रस्तुप्रणवादिकः मंत्रेणानेनदमनंपूजयेद्गंधपु
८९ ष्पकैः धौतेनवाससाच्छाद्यनिधायपटलेनवे वेदापुरुषस्कंधैः स्वनैः स्वगृहमानयेत् इतिगृहानयनम्
वक्ष्यमाणप्रकारेणदमनेनाधिवासयेत् निशायांरामबंद्धाग्रेकुर्यादष्टदलंशुभं चक्रंसितासितारक्तपीतवर्णप्र
89 पूरिते चतुःकोणेवहिःकृत्वापीतवर्णेनपूरयेत् तद्वाह्येश्वेतपीताद्यैर्वर्तुलंमंडलत्रये तद्वाह्येसाच्चतुःकोणं
रक्तवर्णेनपूरिते सार्वकामिकमेतद्वासर्वतोभद्रमुद्धरेत् कुंभेपुष्पोदकनाथंदेहेमरत्नसमंशुभं संस्थाप्यतास्मि
न्रामाग्रेदमनेपरिपूजयेत् वितानेपंचवर्णाख्यमाबध्यात्स्मनोसिव निर्मायमहतींपूजांकुर्यात्तदधिवासने पू
जार्थंदेवदेवस्यविष्णोर्लक्ष्मीपतेःप्रभोः दमनत्वमिहागच्छसांनिध्यंकुरुतेनमः इत्यधिवासनमंत्रः क्लींकामदेवा
यनमः ह्रींश्रींरत्यैनमोऽस्त्विति दिव्यस्मरशरीरायश्रृंगारायनमोनमः मन्मथायवराहायक्लींवसंतसखायच स्म
रायचेक्षुचापायपुष्पास्त्रायेतिपूजयेत् ॐतत्स्वरूपायविद्महेकामदेवायधीमहि तन्नोऽनंगःप्रचोदयात् इति
मन्मथगायत्र्यासमंत्राग्रहोनरेशांतंधूपदीपैश्चनैवेद्यैरुपचारैश्चपूजयेत् हार्देनमनुनापुष्पांजलिंदत्वाभिवंदना

भिर्वंदनाभिर्वंदयेत् नमोऽस्तु पुष्पबाणाय जगदाल्हादकारिणे मन्मथाय जगन्नेत्रे रतिप्रिय नमोऽस्तु ते इति
श्रामंत्रितोसि देवेश पुराणपुरुषोत्तम प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव क्षीरोदधिमहानागश
य्यावस्थितविग्रह प्रातस्त्वां पूजयिष्यामि सन्निधो भव ते नमः निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभं सर्वथा
सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे इत्यमामंत्र्य देवेशं दत्वा पुष्पांजलिं ततः पूजितं तं दमनकं कुंभस्योपरि संस्थि
तं वस्त्रेण सर्वतो रक्षेत्कवचेनावगुंठयेत् रक्षितावकमंत्रेण नृहरेर्मन्तुनाथवा ब्राह्मणैः सोनमस्कृत्य गुरु
पादौ प्रणम्य च गीतमंगलनिर्घोषैः कुर्याज्जागरणं ततः इति दमनाधिवासनं प्रातर्नत्वाथ देवेशं कृत्वा स्नानं य
थाविधि नित्यपूजां पृथक्कृत्वा कुर्यान्नैमित्तिकीं ततः दमनेडर्वयाग्रुकंगंधाक्षतसमन्वितं जयमंगलनिर्घोषै
र्देवदेवं समर्चयेत् ॐ देवदेव जगन्नाथ वांछितार्थप्रदायक हृत्स्थान्पूरय मे कामान्मम कामेश्वरेश्वर इदं दमन
कं देव गृहाण मदनुग्रहात् मूलमंत्रमुदितो ह्येष दमनारोपणे मनुः एवं संप्रार्थ्य देवाय प्रार्थये हि स्वमव्यय
मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयं सांवत्सरी पूजा तवास्तु गरुडध्वज वनमाला यथा देव कौस्तु
भं वहसे हृदि तद्वद्दामनकीं मालां पूजां च हृदये वह जानताजानता वापि न कृतं यन्मयार्चने तत्सर्वं पूर्ण
तां यातु त्वत्प्रसादाद्रमापते जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन नमस्तेऽस्तु हृषीकेश महापुरुष

सर्वज्ञ मंत्रहीनेक्रियाहीनेभक्तिहीनेजनार्दन यत्पूजितेमयादेवपरिपूर्णंतदस्तुमे एवंसंप्रार्थ्यदेवेशंनियतेंद
रा॰ द्रियवद्धवि अथसंपूजयेत्भक्त्यागुरुंवस्त्रादिकोवनैः स्वयंभुक्त्वाऽभ्यर्च्यवैपूर्वंविशान्संतोष्यपारयेत् स्वादस्वमेषजेषु
स्नं॰प॰ एवमित्याहभगवान्शिवः पारणाहेनलभ्येतद्वादशीचद्विकापिवेत् तदात्रयोदशीग्राह्यापवित्रादमनार्पणे
५० मायवेदमनारोपःस्यात्मचैत्रविस्मृतोयदि वैशाखेश्रावणेभाद्रेकर्तव्योवातदर्पणेमित्युक्तेरितिदमनारोपणविधिः
अथपवित्रारोपणं तत्रमिथुनसंक्रांतिमारभ्यतुलासंक्रमणावधिमासतष्टपक्षपत्रदयस्यचतुर्थ्येष्टमीनवमीद्वा
९० दशीचतुर्दशीपूर्णिमास्वन्यतमतिथौपवित्रैर्देवंसंपूजयेत् पवित्राणितुसौवर्णरजततामपट्टसूत्रत्रसरीपद्मसूत्रद
र्भसंजशणवल्कलकर्पाससूत्रेष्वन्यतमसूत्रैःकुर्यात् कार्पाससूत्रंचसुवासिनीभिःकर्तितंत्रिगुणंत्रिगुणीकृत्य
नवसूत्रैरेकसूत्रंतेनकल्पितैरुक्तसंख्यैःसूत्रैःपवित्राणिकुर्यात् तत्राष्टोत्तरशतसूत्रैःकृतमानिचतुःपंचाशद्भि
र्मध्यमानिसप्तविंशतिभिःकनिष्ठानितावत्तावदंगुलदैर्घ्याणिदशदशग्रंथियुक्तानिपवित्राणिकुर्यात्
उत्तमंपूजावरणदेवताहंदसमसंख्यानिपवित्राणिकृत्वाऽष्टोत्तरशतसूत्रसंग्रंथियुक्तंवितानात्पूजाविष्टर
मानदैर्घ्यमेकंहस्तपवित्रंकृत्वा आत्मनआमस्तकान्नाशीर्षाणांवक्षःस्थादिनाभिपर्यन्तदैर्घ्ययुक्तानिपदत्र
येथेकपत्नान्तसारग्रंथियुक्तानिपवित्राणिकुर्यात् अत्रग्रंथिषुसूत्रंवेष्टनसंख्यातत्तमपवित्रेषुषड्विंशत म

८१

ध्यमेषु च न विंशतिः कनिष्ठेषु द्वादश इति कवचमंत्रेणाग्रे ग्रंथयः कार्याः इत्थं पवित्राणि विधाय पवित्रारोपणादिना
त्पूर्वदिने साधकः कृतनित्यकृत्यः रात्रौ वैश्वदेवः सार्द्धं पवित्राणि पूजास्थानमानीय तत्र सिंहासनादिना ॐॐ मरत्नवेद
नकस्थरीकपूरलाव्नागोरिका येग्रंथिस्थानेषु विचित्राणि पवित्राणि संस्थाप्य तेषां मंत्रेषु ॐकाराय नमः वेदम
ये नमः वह्नये नमः ब्रह्मणे नमः नागाय नमः गुरवे नमः रवये नमः श्रीविल्वे नमः सर्वदेवेभ्यो नमः इति
संपूज्य शिरोमंत्रेणाभिमंत्र्य हृन्मंत्रेणाभ्युक्ष्य अस्त्रमंत्रेणावकुंठ्य तेषां दशग्रंथिषु ॐक्रियायै नमः ॐपौरुष्यै न
मः ॐवीरायै नमः ॐगायत्र्यै नमः ॐअपराजितायै नमः ॐविजयायै नमः ॐजयायै नमः ॐमुक्तिदायै नमः
ॐसदाशिवायै नमः ॐमनोन्मन्यै नमः इति दशशक्तीः संपूज्य पवित्रेषु मूलमंत्रेण षडंगमंत्रैश्च संपूज्य स
गंधपुष्पाणि पंचरत्नानि सर्वौषधीश्चानि दिव्यवस्त्रनवसहयेनाच्छादयेत् इत्यधिवासनं पंचरत्नानिश्चादित्य
पुराणे वज्रं मुक्ताफलं नीलं पद्मरागं तथैव च मरकतं नवमं प्रोक्तं पंचरत्नमिदं विदुः वज्रं हीरकं मरकतम्
पाचिरिति प्रसिद्धं सर्वौषधयश्च सिद्धार्थं कुष्ठं रजनीद्वयं लोध्रं मुस्ता लामज्जं शैलं फालिनी मुरमांसि शुक्ता इ
ति स्मृताः सिद्धार्थः सर्षपः रजनीद्वये हरिद्रादारुहरिद्रा वला मज्जकं उशीरभेदः फालिनी प्रियंगुः शैलं
शिलीरा इति प्रसिद्धं इत्यधिवासनं विधाय परेद्युः साधकः कृतनित्यकृत्यो वैश्वदेवः सार्द्धं पूजास्थाने वितान।

पा॰
पू॰प॰
९८
91

दिभिरलंकृतं प्रविश्य पूजाविष्टराद्दूर्ध्वं वितानात्पूजाविष्टरपर्यन्तं दत्त्वा पवित्रमालेवयित्वा स्वासनपूजादिन्यासजा
तं विधाय दमनपूजावत् ॐ मे स्वापयित्वा ग्रन्थिस्थापनाधारपूजापीठपूजां ते प्रोक्तविधिना विधाय तस्मिन् ॐ भे
देवमावाह्य सांगं सावरणं संपूज्य देवाय मूलमन्त्रेण पवित्रं समर्प्य गृहाण इति देवतानां च पवित्राणि समर्प्य धू
पदीपनैवेद्यनैमित्तिकहोमान् कृत्वा गुरुं संतोष्य तस्मै पवित्रं दत्त्वा पूर्णोऽहमिति कृत्वा स्वस्वश्रेयपवित्रं समर्प्य गुर्वे
न्द्रत्यासस्वयमपि पवित्रधारणं कृत्वा वैष्णवान्यानपि ब्राह्मणादीन् पवित्रदानदक्षिणादिभिः परितोष्य पू
जाशेषं समाप्य ब्राह्मणादीन् भोजयित्वा भूरिदक्षिणादिभिस्तोषयेत् इति पवित्रारोपणविधिः इयं पवित्रपू
जा इत्यावश्यकी अकरणे निंदाश्रवणात् तथा च कुलमूलावतारे पवित्रकेन नाचेन शैवमाराधितः शिवः अक्षा
दाभिमुखो भूत्वा तस्मै वरमदाद्विभुः प्रतिवर्षं च कर्तव्यं पवित्रारोपणं प्रियेन कुर्वन्ति च ये मोहात्पवित्रारोपणं नराः
तेषां सांवत्सरी पूजा न तु कृता भविष्यति ततः प्रभृति कुर्वन्ति शिवभक्ताः पवित्रकं सारार्थं कैश्च कर्तव्यं कामवारा
श्रयोगिनः कर्के मिथुनसंक्रान्ते तुलासंक्रमणावधि पक्षद्वयेऽपि पूजा स्यात् चतुर्थ्यामष्टमीदिने नवम्यां च
तुर्दश्यां पवित्रारोपणं चरेत् सौवर्णं राजतं ताम्रं कृताद्दिषु यथाक्रमं कलौ कर्पासजं चापि यथाशक्ति पवि
त्रकं कर्तितं द्विजकन्याभिस्त्रिगुणं त्रिगुणीकृतं धौतं शुक्लं शुभं सूत्रं मण्डपे गुरुणा ने पट्टवल्कलपट्टी

मेन्दौ मदार्भे श्रावणेऽङ्गवे संज्ञादिसे भवेस्तत्रेयपवित्राय प्रशस्तमिति इति दाक्षिणात्यस्मृतिः आषाढ उत्तमो मासः श्रा
वणो मध्यमो भवेत् हीनो भाद्रपदो मासः पक्षौ सितासितेतरौ प्रशस्तः शुक्लपक्षस्तु तदभावे सितेतर इति
रामार्चने वेदिकायां पवित्रारोपणे तु श्रावणस्य सितेपक्षे द्वादश्यां सौनकादिभिः उक्तस्तदा प्रकर्तव्यः पवित्रा
रोपणोत्सवः तथा च बह्वृचपरिशिष्टे सस्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः हरिस्य प्रीतिमाप्नोति यः प
वित्रं समाचरेत् विधिना शास्त्रदृष्टेन यो न कुर्यात्पवित्रकं हरेत्तिरात्तसांस्यसंवर्षपूजादिकं फलं इति पा
द्मे ऊर्जेव्रते मधौ दोला श्रावणे तन्तुरोपणे चैत्रे दमनकारोपमकुर्वाणो व्रजत्यधः पवित्रारोपणं विष्णोः श्राव
णे न भवेद्यदि कार्तिकावधि कुर्वीत कर्मैवमिति नारदः इति पवित्रनित्यता प्रयोगसारोक्तस्मृतिः पवित्रस
प्रतन्मते कनीयान्वा सकलं सर्वांसु पवित्रो नाम नागराट् निराहारव्रतो भूत्वा देविकं शारदीं शान्ते तपस्त्वेयसमा
श्रित्य देवदेवं महेश्वरं प्रसन्नस्त्वयमात्सस्य प्रस्तः कुरुक्षेत्रमः प्रणतार्तिहरः शम्भुरादिराक्षीड माधवः प्रसा
दाभिमतं दृष्ट्वा देवं सम्भुजगेश्वरः कण्ठाभरणतां प्राप्तं वद्देस वर मन्त्रमं तथेत्याभाष्य तेन हद्धारयं त्रिपुरान्तकः
प्रादात्तस्मै वरं वाक्यं पवित्रायात्मयोगिने ये त्वां न बहुमन्यन्ते यथासंभावितो मया जपहोमादिकं तेषां फ
लं तामेव निष्फलं यात् अत्रैव श्रावणे मासि सम्पदे वा पवित्रे सर्वे तस्मादाराधयन्तुं तां नित्यं नैमित्तिकोपमनाः वैदिकाः

सकृद्धोमेन पूजां कुर्वन्त्वनेन च तस्माद्ग्रन्थानुसारेण निर्वीतं नैव तांत्रिकः आराध्याराध्यपूजायै देवतायै पवि
रा०
त्रकं इति पवित्रोत्पत्तिः नानागमोक्तमार्गेण तस्य कर्तव्यतोच्यते हैमरौप्यताम्रसौमैः सूत्रैः कौशेयपट्टजैः
ऊर्णैः कार्पासकार्पासैर्वा ब्राह्मणपाकान्तितैः शुभैः कन्यया वा पवित्रं स्यान्नवतन्त्वल्पादिभिः कृतैः स्नातात्रिगु
पू० प०
५२
णितं सूत्रं त्रिगुणीकृत्य शोधयेत् अभिषिंचेत्पंचगव्यैरद्भिः प्रक्षालयेत्ततः मूलेनाष्टोत्तरशतं गायत्र्या राममंत्र
या शोखोदकेनाभिमंत्र्य पवित्राणि विनिर्मिमेत् उग्रपद्ध्यान्पवित्राणि सूत्रैः पंचगव्यक्रमेण विद्धः आप्यायस्वदधिक्रा
92
व्णो तेजोसि पंचगव्यके मधुवातेति गायत्रीक्रमः पंचामृतेन तथा इति सूत्रशुद्धिः तत्रोत्तमपवित्रं तु षष्ठ्यासह
शतैस्त्रिभिः संमितैः सहितं वाभ्यां पवित्रं मध्यमं स्मृतं साशीतेनाशतेनैव कनिष्ठं तत्समाचरेत् अष्टोत्तरेणतदर्द्धो
र्द्धेन वस्त्रीक्रमेण वा जान्वन्तनाभिपर्यन्तमस्तमादि त्रयं भवेत् अष्टोत्तरसहस्रेण वनमालां प्रकल्पयेत् उत
मस्य पवित्रस्य दैर्घ्यं प्रमाणमाचरेत् आरभ्य मकुटं यावत्सूत्रैर्विरचिता शुभा आपादलम्बिनी माला वनमा
ला प्रकीर्तिता यजमानपवित्रं वाधिवासनपवित्रकं कनिष्ठेन समं कार्यं मध्यमेन समं गुरोः ऊर्वीताग्रेः
पवित्रं च मध्यमेन समं शुभे साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् उत्तमे तु शतं ग्रंथिः पंचाशद्ग्रन्थिम
ध्यमे कनिष्ठे तु पवित्रे स्यात् षट्त्रिंशद्ग्रन्थिशोभितं षट्त्रिंशद्वा चतुर्विंशद्वा विंशतिकेन वा चतुर्विंशद्वादशाष्टावि

त्येकेमन्त्रयोविदः ग्रंगुष्ठपर्वमात्रंतुकुर्याद्ग्रन्थिमथोत्तमे तदर्द्धेनतदर्धेनमध्यमेवकनिष्ठके ग्रंथीन्कुर्वीतसर्वत्र
सुदृढान्सुमनोहरान् नवैविषमसंख्याकान्ग्रंथीन्कुर्वीतकर्हिचित् विशेषमस्त्रदानेनकर्तुःस्यादशुभंफलं पवि
त्रेपरस्यामतस्तात्तस्मात्कुर्वीतशोभनं कुंकुमेसचन्दनेचैवकर्पूरेणविमिश्रिते तेनसंरंजयेत्सूत्रमष्टोत्तरशताभिमंत्रितं त
तोभिमंत्रितंकुर्यादिदंविस्मृत्यमंत्रतः द्वादशाक्षरमंत्रेणवासर्वसाधारणःस्मृतः त्रिभिःकृतमसत्त्वेस्यात्तद्देवाधिवास
के ह्रिंमध्यमेऽभिमंत्रंस्यात्कनिष्ठेत्वसकृत्स्मृतः इतिपवित्रलक्षणं ततस्तानिपवित्राणिवैष्णवेपटलेशुभे संस्थाप्य
शुचिवस्त्रेणपिधायप्रयतोवसेत् अरात्रिमेमितोविष्णोःकुर्यात्सद्भिर्विशिष्टाकृतैः मंत्रयेन्मूलमंत्रेणपंचगव्येनशोधये
त् तोत्रकद्वान्तरेकृत्वामानसंस्नानमाचरेत् ततस्तुसर्वतोरक्षांकृत्वाग्नौहोममाचरेत् स्वयंतुभगवत्पूजांमहती
वसमाचरेत् महास्नानंप्रकुर्वीतउपचारांस्तथैवच देवस्यसर्वतःस्नाप्यंदेवंकाष्ठंजलंकुशाः मृत्तिकाचहरिद्राच
कुष्ठगोरोचनानिच पादुकोपानहेछत्रंचामरंव्यजनंतथा श्रीखण्डादीनिचधान्यानिशुभ्रतःस्नापयेत्तथा देवदत्तानिया
नेश्वरस्तोत्रैर्नानाविधैस्तथा वैदिकैश्चजपैर्देवंयथावत्प्रतिबोधयेत् क्रियालोपविघातार्थंयत्त्वयाविहितंप्रभो
मयैतत्क्रियतेदेवतवतुष्ट्यैपवित्रकं नहिविघ्नोभवेदत्रकुरुनाथदयांमयि सर्वथासर्वदाविष्णोममत्वंपरमाग
तिः उपवासेनतोदेवतोषयामिजगत्पते कामक्रोधादयोप्येतेनमेसन्तुव्रतघातकाः अद्यप्रभृतिदेवेशयावद्वैशेषि

रा॰
पू॰ प॰
९४

93

कं दिने तावद्दत्तानयाकार्यी सर्वस्यास्य नमोऽस्तुते एवं विज्ञाप्य देवेशं गुरुपादौ प्रणम्य च कुर्यान्नैवेद्यसंवैः सार्द्धं
पवित्रारोपणं हरेः ॐ मेपुण्योत्तुनाशुर्य्य सर्वतोभद्रके शुभे स्थापयेत्पुरतो विष्णोस्तत्र ...णि पूजयेत् सांवत्सर
स्य यागस्य पवित्रीकरणाय भोः विष्णोर्लोकात्पवित्रनमागच्छेह नमोऽस्तुते अनेनावाहयेत्सूत्रे मूलमंत्रयुतेन च
उन्मादित्रये विद्यान्सुरे देवत्रयं तथा गुणान्वेदत्रयं चैव ध्यायेल्लोकत्रयं तथा प्रकृतिवनश्रेवी यामालायां निखिला
त्मिका घुलोके मकुटे सूत्रे ध्यायेत्तन्त्रात्रशालिनी ॐ सर्वाभरणविज्ञांग सर्वदेवनमस्कृत लावण्यरूपविश्वात्मन्
ज्येष्ठसूत्रे समाश्रय सर्वलक्ष्मीकरश्रीश सर्वज्ञानमयात्मक निहतिरूपविश्वात्मन्मध्यसूत्रे समाश्रय ग्रतिवेश
जगद्योने उरुषात्मान्विवस्वते कनीयं मे प्रभो देव तेजसा सूत्रमाश्रया सर्वाधारधरारूप सर्वकर्त्तः प्रजायते सर्व
गात्मे सूत्रेऽस्मिन्सान्निध्यं कुरु तेन नमः सर्वरत्नोज्ज्वलाकारब्रह्मांडब्रह्मरोविषम कुटेमम सर्वांगाश्रियः सूत्रदृढे
हि भोः प्रकृते जगतः कर्त्रि सर्वलावण्यदायिनि श्रीसूत्रे नित्यकल्याणि सान्निध्यं कुरु तेन नमः उन्मादीनि सूत्राणि
क्रमादालभ्य याणि नामन्त्रभिर्मंत्रयेदेभिः पूजयेन्मूलमंत्रतः ब्रह्मा विष्णुमहादेवा त्रिसूत्रे देवतास्स्मृताः ॐका
रः सोमवन्हीवब्रह्मा नागः शशी रविः शिवश्च विश्वेदेवाश्च नवसूत्राधिदेवताः क्रियाचपौरुषी वीरा विजये शा
पराजिता मनोन्मना जयाभद्रा मुक्तिश्च ग्रंथिदेवताः ध्यात्वावाह्य मूर्तीकृत्य गंधपुष्पाक्षतैः ऊरैः धूपदीपात्र तां ९२

९४

सूत्रैः पवित्राणिबुधोर्वेयेत् अथदेवकरेविद्वान्पटसूत्रमयमङ्गवे वितस्तिमानकंडोरंवध्नीयात्मंगलात्म
कं ॐसंवत्सरकृतार्चायाः संपूर्णफलदोपियत् पवित्रारोपणायेतत्कंकेधरतेनमः ॐविस्नुतेजोद्भवंर
म्यंसर्वपातकनाशनं सर्वकामप्रदंदेवतवाङ्गेधारयाम्यहं मूलसंपुटितादस्मादयाद्वंधेपवित्रके नीरा
जयेत्ततोदेवंमंगलाघोषपूर्वकं नैवेद्यंविधिवद्दत्वाताम्बूलमनुलेपनं उपतिष्ठेत्ततोदेवंजितंमित्यादिभिः
स्तवैः मंत्रेणानेनमंत्रेशानदेवदेवंनिमंत्रयेत् आमंत्रितोसिदेवेश पुराणपुरुषोत्तम प्रातस्त्वांपूजयि
ष्यामिसान्निध्यंकुरुकेशव ॐक्षीरोदधिमहानागशय्यावस्थितविग्रह प्रातस्त्वांपूजयिष्यामिसान्निध्योभ
वतेनमः निवेदयाम्यहंतुभ्यंप्रातरेतत्पवित्रकं सर्वथासर्वदाविस्नोनमस्तुभ्यंप्रसीदमे निपतेदंडवद्भू
मौदत्वापुष्पाञ्जलिंपुनः देशकालविचक्षणः प्रत्यहंस्नानकार्याणिसूत्राण्युत्तार्यकारयेत् अभिषि
च्याथतोयेनपुनर्देवंनिवेदयेत् अथान्तेदेवमभ्यर्च्यविशेषात्पुष्पचंदनैः नैवेद्यंविधिवद्दत्वाततः सूत्रंविस
र्जयेत् ॐसांवत्सरींपूजांसंपाद्यविधिवन्मम व्रजेदानींपवित्रत्वंविस्नुलोकंविसर्जितः यावद्देवप
वित्राणितावत्तिष्ठेत्समाहितः ब्रह्मचारीहविष्याशीदेवपूजापरायणः पवित्रारोपणंकालेनकरोतिकाः
र्येवन तदाप्रतेजपेन्मंत्रंस्तोत्रंवापिसमाचरेदित्युक्तं इतिपवित्रारोपणं दंड १ कर्णाय रसोद वीभि १

रा.
पू.प.
५४

वेत्सरेयातिवैक्रमेकार्तिकेमासिशुक्लायांद्वादश्यांभौमवासरे काश्म्यांकृता ऽ नवयेयरामोपाध्यायसूरिणा रा
मपूर्वार्पितारामपूजापद्धतिरीदृशी २ इतिश्रीरामोपाध्यायकृतौश्रीरामपूजापद्धतिः समाप्ता ॥शुभंहरिॐ

94

८०

वासुदेव लखा

संवत् १८३३ आषाढ प्र. २१
श्रीरामप्रजापद्धति पत्रे ८४
श्लोक ३०००